ननु घटादिद्रव्यज्ञानार्थं संयोगः सन्निकर्षो मास्तु, अस्तु च संयुक्तसमवायसन्निकर्षः। यतो हि घटावय यवः संयुक्तः, घटस्य तत्र समवेतत्वात् तमेव सम्बन्धं परिकल्प्य कार्यनिर्वाहात्। न च वाग्व्यापारलाघवात् संयोग एव अस्त्विति वाच्यम्, रूपादिग्रहणे तस्य (संयुक्तसमवायसन्निकर्षस्य) स्वीकारमन्तरा कार्यासिद्धेः, घटग्रहणेऽपि तेनैव सिद्धेरिति चेत्, न, आत्मग्रहणे मनःसंयोगस्यानिवार्यत्वाद् घटादिग्रहणेऽपि तस्यैव स्वीकारादिति– .... **ननु संयुक्तसमवायेनावयविग्रहोऽस्तु न तु संयोगादिस्तत्र हेतुः तस्य रूपादिग्रहे क्लृप्तत्वात्। न च लाघवात् संयोग एव तथा, तस्य कल्पनीयकारणत्वाद् इति चेत्, न, आत्मग्रहे इन्द्रियसंयोगस्य कारणत्वादन्यत्रापि द्रव्यसाक्षात्कारत्वेन तथा कल्पनात्** (गङ्गेशोपाध्यायः, १९९०, पृ.५८९)। ननु तर्हीत्थं कुर्मः– बहिरिन्द्रियजन्यद्रव्यावग्रहे संयुक्तसमवाय एव सन्निकर्षत्वेनाऽऽस्ताम्, आस्ताञ्चाऽऽत्मादिग्रहे संयोग इत्यपि न वाच्यम्, तथा सति द्रव्यग्रहे एव कार्यकारणभावस्य द्वैविध्येन गौरवापत्तेः, उभयत्रापि संयोगस्यैव हेतुत्वकल्पने लाघवादिति– **न च बहिरिन्द्रियजन्यद्रव्यग्रहे अवयविग्रहे वा संयुक्तसमवायः कारणं, लाघवेन संयोगस्यैव कारणत्वेन कल्पनात्** (गङ्गेशोपाध्यायः, १९९०, पृ.५८९)।

**संयुक्तसमवायः**

संयुक्ते समवाय एव संयुक्तसमवायः। अयुतसिद्धयोर्द्वयोः सम्बन्धः समवायः, द्वयोरयुतसिद्धत्वात्। यथा घटे रूपं समवायेन तिष्ठति घटाभावे घटरूपस्यास्थितत्वात्। संयुक्ते समवाय एव संयुक्तसमवायः। घटगतरूपादिज्ञानेऽयं सम्बन्धः। चक्षुरिन्द्रियस्य घटेन सह संयोगः, घटश्च संयुक्तः। तत्र वर्तमाना गुणकर्मजातयः पदार्थाः समवायेन। एतावता च चक्षुषा तेषां ग्रहणं संयुक्तसमवायेनेति। एवमेव त्वगिन्द्रियेण घटगतस्पर्शस्य ज्ञानमथ च रसनेन्द्रियेण जलादिगतरसज्ञानमथ च घ्राणेन्द्रियेण पुष्पादिगतगन्धस्य ज्ञानमपि संयुक्तसमवायसम्बन्धेनैव जायते, तेषां जलादिषु समवेतत्वात्। एवञ्च मनसा आत्मगतसुखादिज्ञानञ्च तेनैव, तत्र प्रथमं मन आत्मानं संयुनक्ति, आत्मनि च सुखादीनि समवेतानीति–

> **कदा पुनः संयुक्तसमवायः सन्निकर्षः ? यदा चक्षुरादिना घटगतरूपादिकं गृह्यते घटे श्यामं रूपमस्तीति, तदा चक्षुरिन्द्रियं, घटरूपमर्थः, अनयोः सन्निकर्षः संयुक्तसमवाय एव। चक्षुः संयुक्ते घटे रूपस्य समवायात्। एवं मनसाऽऽत्मसमवेते सुखादौ गृह्यमाणेऽयमेव सन्निकर्षः** (मिश्रः, १९९५, पृ.७८)।

न्यायशास्त्रे 'येन इन्द्रियेण यद् गृह्यते तेनैवेन्द्रियेण तद्गता जातिस्तत्समवायस्तदभावश्च गृह्यते' इति नियमस्य प्रथितत्वात् तत्तत्पदार्थगतानां सामान्यसमवायाभावानामपि तेनैवेन्द्रियेण गृह्यते। एतावताऽऽन्तरेन्द्रियेण मनसाऽऽत्मगतानां सुखादिगुणानामात्मत्वजातेश्च बोधः संयुक्तसमवायसम्बन्धेनैव जायते। न्यायबोधिनीकारस्त्वेवमाह— **द्रव्यसमवेतवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसमवेतसमवायस्य हेतुत्वम्** (भट्टः, २००३, पृ.८१–न्या.बो.)।

ननु रूपमपि गुणः, परिमाणमपि गुणः। अथ च यथा गुणग्रहणे संयुक्तसमवायसन्निकर्षः, परिमाणम

ग्रहणेऽपि तथैव वेति चेन्न, घटस्य कार्ष्ण्यज्ञानाय अथ च रक्तिमज्ञानाय वावयवानां ज्ञानं नापेक्षितं परम् 'अयं घटः स्थूलः अयञ्च कृशः' इत्यादिरूपेण घटस्य परिमाणज्ञानाय तु घटस्यावयवा अपि प्रत्यक्षीकर्तव्या भवन्ति। तदर्थं चतुष्टयसन्निकर्षोऽपि स्वीकर्तव्यो भवति–

**घटगतपरिमाणादिग्रहे चतुष्टयसन्निकर्षोऽप्यधिकं कारणमिष्यते। सत्यपि संयुक्तसमवाये तदभावे दूरे परिमाणाद्यग्रहणात्। चतुष्टयसन्निकर्षो यथा– (क) इन्द्रियावयवैरर्थावयविनाम्, (ख) इन्द्रियावयविनामर्थावयवानाम्, (ग) इन्द्रियावयवैरर्थावयवानाम्, (घ) अर्थावयविनामिन्द्रियावयविनां सन्निकर्ष इति** (मिश्रः, १९९५, पृ.७८)।

ननु व्यवहारं पुरस्कृत्य सम्बन्धकल्पना न तु सम्बन्धं पुरस्कृत्य व्यवहारकल्पनेति प्रथितलौकिकन्यायास वलम्बनेन रूपादिज्ञाने संयुक्तसमवायसन्निकर्षः स्वीक्रियताम्, परं गन्धरसादिज्ञानार्थन्तु आश्रयसंयोगेनैव निरुह्यताम्। तथैवानुभावाच्चेति चेत्, न, घटादिसंयोगात् पटादिगन्धग्रहणप्रसङ्गात्– **ननु संयुक्तसमवायो न ग्रन्धग्राहकः किन्त्वाश्रयसंयोगः। .... तथा च घटसंयोगात्पटगन्धग्रहप्रसङ्गः** (गङ्गेशोपाध्यायः, १९९०, पृ.५८९, ५९२)।

**संयुक्तसमवेतसमवायसन्निकर्षः**

घटादिगतेषु रूपेषु स्थितानां रूपत्वादीनां ग्रहणे संयुक्तसमवेतसमवायसन्निकर्षः। तत्र घटादयस्तावत् संयुक्ताः, तत्र समवेतानि रूपादीनि, तत्र समवायेन स्थितानि (समवेतानि रूपत्वादीनि), तेषां ज्ञानं संयुक्तसमवेतसमवायसम्बन्धेनेति–

**कदा पुनः संयुक्तसमवेतसमवायः सन्निकर्षः ? यदा पुनश्चक्षुषा घटरूपसमवेतं रूपत्वादिसामान्यं गृह्यते, तदा चक्षुरिन्द्रियं, रूपत्वादिसामान्यमर्थः, अनयोः सन्निकर्षः संयुक्तसमवेतसमवाय एव। चक्षुःसंयुक्ते घटे रूपं समवेतं, तत्र रूपत्वस्य समवायात्** (मिश्रः, १९९५, पृ.८०)।

प्रसङ्गेऽत्रान्नम्भट्टस्यापि वचनरचनं ध्येयम्। स चाह– **रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतम्, तत्र रूपत्वस्य समवायात्** (भट्टः, २००३, पृ.८३)।

**समवायसन्निकर्षः**

येन इन्द्रियेण स्वस्मिन्नेव समवायसम्बन्धेन स्थितः पदार्थो ज्ञायते, तदा स पदार्थस्तेनैव सम्बन्धेन गृह्यते। यथा शब्दग्राहकम् इन्द्रियं श्रोत्रम्। तच्च स्वस्मिन्नेव स्थितं शब्दं गृह्णाति न चाऽन्यत्र स्थितम्। तथा च श्रोत्रं कर्णशष्कुल्यवच्छिन्नमाकाशम्– **कर्णविवरवत्र्त्याकाशस्य श्रोत्रत्वात्** (भट्टः, २००३, पृ.८४)। एतन्नाम यावताऽऽकाशभागेन शब्दो गृह्यते, तावदेव श्रोत्रमिति गौतमीयं चिन्तनम्। तेन च श्रोत्रेण श्रोत्रस्थितः शब्दः समवायसम्बन्धेन गृह्यते–

**कदा पुनः समवायः सन्निकर्षः ? यदा श्रोत्रेन्द्रियेण शब्दो गृह्यते तदा श्रोत्रमिन्द्रियं, शब्दोऽर्थः, अनयोः सन्निकर्षः समवाय एव। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। श्रोत्रस्याकाशात्मकत्वाच्छब्दस्य चाकाशगुणत्वाद् गुणगुणिनोश्च समवायात्** (मिश्रः, १९९५, पृ. ८१)।

किञ्चाऽन्यानीन्द्रियाणि अन्यत्र स्थितान् पदार्थान् गृह्णन्ति, श्रोत्रन्तु स्वस्मिन्नेव स्थितं शब्दं गृह्णातीति तु

विशेषः। प्रसङ्गेऽत्र कैश्चिद् उच्यते– न खलु स्वगुणान् उपलभन्ते इन्द्रियाणि, श्रोत्रञ्च कथं स्वगुणं शब्दं गृह्णातीति चेच्छ्रोत्रस्य गुणरहितस्येन्द्रियत्वेऽपि घ्राणादीनां तत्सहितस्यैवेन्द्रियत्वात्। एतावता घ्राणादीनां यत्स्वरूपमादाय इन्द्रियत्वं जायते, तदेव तेनैव न गृह्यते सहकारिवैकल्त्यादिति तदाकूतम्–

**स्वगुणान् नोपलभन्ते इन्द्रियाणि, कस्मादिति चेत् ?–**

**सगुणानामिन्द्रियभावात्** (गौतमः, न्या.सू., ३।१।७०)

**स्वान् गन्धादीन् नोपलभन्ते घ्राणादीनि। केन कारणेनेति चेत् ?, स्वगुणैः सह घ्राणादीनामिन्द्रियभावाद् = घ्राणं स्वेन गन्धेन समानार्थकारिणा सह बाह्यं गन्धं गृह्णाति तस्य स्वगन्धग्रहणं सहकारिवैकल्यान्न भवति, एवं शेषाणामपि** (वात्स्यायनः, न्या.भा. ३।१।७०)।

ननु घ्राणादिस्था गन्धादय एव सहकारित्वेन वर्त्तेरन् इति चेत्, न, स्वेनैव स्वस्याग्रहणादिति–

**यदि पुनर्गन्धः सहकारी च स्याद् घ्राणस्य ? ग्राह्यश्च (स्यादेव?) इत्यत आह–**

**तेनैव तस्याऽग्रहणाच्च।।७१।।**

**न गुणोपलब्धिरिन्द्रियाणाम्। यो ब्रूते– यथा बाह्यं द्रव्यं चक्षुषा गृह्यते, तथा तेनैव चक्षुषा तदेव चक्षुर्गृह्यतामिति तादृगिदम्– तुल्यो ह्युभयत्र प्रतिपत्तिहेत्वभाव इति** (वात्स्यायनः, न्या.भा., ३।१।७१)।

ननु श्रोत्रन्तु स्वस्मिन्नेव स्थितं गुणं गृह्णाति। इन्द्रियाणां सगुणत्वात् तद्गुणसाहित्येन इन्द्रियत्वाच्च तेनैव तस्य ग्रहणाभावे श्रोत्रेण स्वगुणा न गृह्येरन्, परं श्रोत्रेन्द्रियेण शब्दग्रहणात् न सगुणानाम् इन्द्रियत्वं सिद्ध्यति–

**न, शब्दगुणोपलब्धेः** (गौतमः, न्या.सू. ३।१।७२)। एतदेव स्पष्टीक्रियते तत्रस्थेन भाष्यवाक्येन– **'स्वगुणान् नोपलभन्ते इन्द्रियाणि' इत्येतन्न भवति– उपलभ्यते हि स्वगुणः शब्दः श्रोत्रेणेति** (वात्स्यायनः, न्या.भा. ३।१।७२)।

तत्खण्डनार्थमुच्यते– परं यथा घ्राणादीनां सगन्धादित्वेन इन्द्रियत्वं न तथा सशब्दत्वेन श्रोत्रस्येन्द्रियत्वम्। तथा कथमिति चेद् गन्धशब्दादीनां पारस्परिकवैधर्म्यात्। एतच्च सर्वं स्पष्टीभवत्यधस्तनेन गौतमीयसूत्रेणाथ च तत्रस्थेन भाष्यवचनरचनेन–

**तदुपलब्धिरितरेतरद्रव्यगुणवैधर्म्यात्।।७३।। न शब्देन गुणेन सगुणमाकाशमिन्द्रियं भवति, न शब्दः शब्दस्य व्यञ्जकः। न च घ्राणादीनां स्वगुणग्रहणं प्रत्यक्षं नाप्यनुमीयते, अनुमीयते तु श्रोत्रेणाकाशेन शब्दस्य ग्रहणं शब्दगुणत्वं चाकाशस्येति** (वात्स्यायनः, न्या.भा. ३।१।७३)।

अत्रेदमपि स्मर्तव्यं भवति यत् श्रोत्रस्य सगुणत्वेनेन्द्रियत्वे श्रोत्रेण स्वस्थितशब्दग्रहाभावे परस्थितशब्दग्रहणार्थं समवायसम्बन्धो न कल्प्यते स्म, अथ चोपरि व्याख्यातेन संयुक्तसमवायसम्बन्धेनैव कार्यं निरुह्यते स्म। परं न तथा वर्त्तते अपितु समवायेन शब्दो गृह्यत इति सिद्धान्तः सिद्धः।

**समवेतसमवायसन्निकर्षः**

शब्दत्वादिसाक्षात्कारे समवेतसमवायः सन्निकर्षः। एतन्नाम यत् समवायसम्बन्धेन तिष्ठति, तत् समवेब

तम्। तत्रैव पुनः समवायसम्बन्धेन किञ्चन तिष्ठति चेत् तत् समवेतसमवेतम्– समवेते समवेतमिति यावत्। तस्य ग्रहणे समवेतसमवायसम्बन्धः– समवेतसमवेतत्वसम्बन्ध इति। यथा श्रोत्रेण शब्दो गृह्यते। स च श्रोत्रे एव किञ्च कर्णशष्कल्यवच्छिन्ने आकाश एव समवायेन तिष्ठति। अतः श्रोत्रेण तस्य ग्रहणे समवायश्चेत् तत्र शब्दत्वं पुनः सवायसम्बन्धेन तिष्ठति। तस्य ग्रहणे समवेतसमवायसम्बन्ध इति–

**कदा पुनः समवेतसमवायः सन्निकर्षः ? यदा पुनः शब्दसमवेतं शब्दत्वादिकं सामान्यं श्रोत्रेन्द्रियेण गृह्यते, तदा श्रोत्रमिन्द्रियं, शब्दत्वादि सामान्यमर्थः। अनयोः सन्निकर्षः समवेतसमवाय एव। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्** (मिश्रः, १९९५, पृ.८१)।

**विशेष्यविशेषणभावः**

चक्षुःसंयुक्ते भूतलादौ ‘अत्र घटो नास्ति’ इत्यादिघटाभावप्रत्यक्षे कर्तव्ये विशेष्यविशेषणभावः सन्निकर्षः बोध्यः। तत्र द्रव्यद्रव्ययोः संयोग इति नियमाद् द्रव्य–अभावयोः संयोगस्य चासम्भवात् समवायादीनाञ्चाप्रसक्तत्वाद् विशेष्यविशेषणभावः परिकल्पितः। तथा हि यदा वयं ‘भूतले घटो नास्ति’ इति वदामः, तदा अभावस्य विशेष्यत्वेन भानाद् भूतलस्य च विशेषणत्वेन भानादुभयोर्विशेष्यविशेषणत्वम्। तदेव सम्बन्धं परिकल्प्य न्यायविचक्षणा अभावस्य ग्रहणं विशेष्यविशेषणभावेनेत्याचक्षते–

**कदा पुर्नविशेष्यविशेषणभाव इन्द्रियार्थसन्निकर्षो भवति ? यदा चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते ‘इह भूतले घटो नास्ति’ इति तदा विशेष्यविशेषणभावः सम्बन्धः। तदा चक्षुःसंयुक्तस्य भूतलस्य घटाद्यभावो विशेषणं, भूतलं विशेष्यम्** (मिश्रः, १९९५, पृ.८२)।

अत्र विशेष्यविशेषणभावपदगतभावपदं विशेषणपदे विशेष्यपदे च योज्यम्। तावता च विशेष्यत्वं विशेषणत्वञ्च भवति। एतावता सम्बन्धद्वयमित्यपि सिद्ध्यति। पुनरत्र दृढीभवामः– ‘भूतले घटाभावः’ इत्यत्र घटाभावो विशेष्यम्, भूतलञ्च विशेषणम्। अभावस्य ग्राह्यविषयत्वान्न्यायशास्त्रे प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधस्वीकाराच्च विशेष्यत्वेनैव तद्ग्रहणाद् विशेष्यत्वसन्निकर्षः। ‘घटाभाववद् भूतलम्’ इत्यत्र भूतलं विशेष्यम्। अभावश्च विशेषणम्। अतोऽभावस्य भूतलनिष्ठविशेष्यतानिरूपितविशेषणत्वात् तद्रूपेणैव ग्रहणात् स एव सन्निकर्ष इति न्यायविचक्षणानामभिमतिः। परं शाब्दबोधे शब्दप्रयोगाधीनत्वे भेदसत्त्वेऽपि वस्तुगत्या विशेष्यविशेषणभावस्य व्यत्यासाभावादाधाराधेयभाववद् विशेष्यविशेषणभावः किंवा विशेषणयविशेष्यभाव एव सन्निकर्ष इत्यपरे। एतदेव मतमादाय तर्कभाषाकारेण **‘इह भूतले घटो नास्ति’ इति तदा विशेष्यविशेषणभावः सम्बन्धः। तदा चक्षुःसंयुक्तस्य भूतलस्य घटाद्यभावो विशेषणं, भूतलं विशेष्यम्** (मिश्रः, १९९५, पृ.८२) इत्याद्यभिव्यक्तमित्यनुमीयते।

इदमत्राकूतम्– ‘घटाभाववद् भूतलम्, किंवा ‘भूतले घटाभावः’ इत्यत्र अभावो गृह्यमाणो वर्त्तते। तद्ग्राहकञ्च चक्षुः। चक्षुर्नाम तैजसम्। तेजसो द्रव्यत्वाच्चक्षुषोऽपि द्रव्यत्वं निराबाधम्। द्रव्याभावयोः संयोगादेरसम्भवादत्र कोऽयम् सम्बन्ध इति विचिकित्सा स्वाभाविकी। भूतलगतघटाभावबोधार्थं द्विधा व्यवहारो जायते। एको ‘घटाभाववद् भूतलम्’ अन्यश्च ‘भूतले घटाभावः’ इति। उभत्रयापि को भेदः ? इति चेद् आदौ भूतलं विशेष्यञ्चेद् अन्त्ये घटाभावः विशेष्यम्। तत्रादौ किंवा ‘घटाभाववद् भूतलम्’ इत्यत्र भूतले

घटाभावो विद्यते। स च संयोगादिना नाऽऽस्ते अथ च स्वरूपेणैव। स्वरूपेण नाम नान्यं सम्बन्धं कल्पते अथ च स्वं रूपमेव सम्बन्धं कल्पयित्वा तिष्ठति। एतावता घटाभावनिष्ठा वृत्तिता स्वरूपसम्बन्धावच्छिन्ना। सैव विशेषणता। या घटाभावे वर्त्तते। तथा च 'घटाभाववद् भूतलमि'त्यत्र अभावप्रत्यक्षे इन्द्रियसम्बन्धविशेषणभता हेतुरिति। एवमेव यदा 'भूतले घटाभावः' इति बोधो जायते तदा घटाभावो विशेष्यम्। 'घटाभावो वर्त्तते' इति व्यवहारात् तत्रस्था विशेष्यता घटाभावनिष्ठवृत्तिताया अवच्छेदिका। सा च वृत्तिता भूतलनिष्ठविशेषणतानिरूपिता (भूतलनिरूपिता)। 'भूतले घटाभावः' इत्यत्र अस्माकं बोधस्य विषयस्तावद् अभावः किंवा घटाभावः। तत्र भूतले घटाभावस्य वर्त्तनाद् भूतलं तेनैव सम्बन्धेन (वृत्तितासम्बन्धेन) घटाभावस्य विशेषणं घटाभावो विशेष्यम्, 'भूतलवृत्तितावान् घटाभावः' इति तदर्थत्वात्। अतः 'भूतले घटाभावः' इत्यत्र घटाभाववप्रत्यक्षे चक्षुःसंयुक्तभूतलनिरूपितविशेष्यताख्यः सन्निकर्षः कारणमिति। 'घटाभाववद् भूतलम्' इत्यत्र तु भूतलं विशेष्यम्, अभावश्च विशेषणम्। तदा चक्षुःसंयुक्तभूतलनिरूपितविशेषणताख्यः सन्निकर्षो बोध्यः इति सन्निकर्षद्वयमतावलम्बिनां हृदयम्। इतरमतमादायेदमित्थं व्याकर्तुं सुशकम्– विशेषणं विशेष्यञ्च न निरपेक्षमपि तु सापेक्षमेव। एतावता किमपेक्ष्य विशेष्यं विशेषणञ्च भवति इति चेच्छ्रूयताम्– भूतले घटो नास्ति इत्यत्र भूतले घटाभावः तत्र घटश्च विशेषणम्। भूतलञ्च विशेष्यम्। तदेव सम्बन्धं परिकल्प्य व्यवह्रियते। किञ्चित् स्पष्टीभवामः– घटवद् भूतलम् इति व्यवहारतो घटाभाववद् भूतलमिति व्यवहारो भिद्यते तद्वैलक्षण्यात्। अत्र भूतलं तावद् घटाभावविशिष्टम्। एतावता च घटाभावो विशेषणम्। भूतलञ्च विशेष्यम्। तथा ह्युभययोर्विशेष्यविशेषणभावः। विशेषणं विशेष्यञ्च तयोरेव सम्भवि ययोः कश्चन सम्बन्धः स्यात्। तावता च भूतल–अभावयोः कश्चन सम्बन्धः कल्पनीयः। तत्र संयोगः न सम्भवति द्रव्ययोरेव संयोगात्। अत्र च भूतलस्य द्रव्यत्वेऽपि अभावस्य तदभावात्। समवायोऽप्यसम्भवी भावस्यैव समवायात्। कालिकभदैशिकादीनाञ्चासत्त्वाद् घटाभावभूतलयोः स्वरूपमेव सम्बन्धत्वेन आदरणीयः। एतावताऽभावात्मकविशेषणस्वरूपे सम्बन्धत्वेन गृहीते सति तच्च विशेषणतापदेन व्यवह्रियते। अथ च भूतलाद्यात्मकविशेष्यस्वरूपे सम्बन्धत्वेन गृहीते विशेष्यतापदेन व्यवह्रियते। एतदेव व्याकर्तुं भूतलघटाभावसम्बन्धो विशेष्यविशेषणभावः किंवा विशेषणविशेष्यभावपदेन ज्ञाप्यते। परं सामान्यतो न्यायसिद्धान्तरीत्या तु विशेष्यभावपदस्य विशेषणभावपदस्य वा प्रयोगोऽवलम्ब्यते। एतावता 'घटाभाववद् भूतलम्' इत्यत्र अभावश्चक्षुःसंयुक्तविशेषणतासम्बन्धेन ग्राह्यश्चेद 'भूतले घटाभावः' इत्यत्र चक्षुःसंयुक्तविशेष्यतासम्बन्धेन ग्राह्यः। तत्रापि प्रायः प्रयोगे तूभयत्रापि विशेषणतापदमेव दृश्यते। तच्च वस्तुतस्तु न्यायसिद्धान्तं पुरस्कृत कृतस्य शब्दप्रयोगस्य दृष्ट्या यद्वा तद्वा भवतु वस्तुदृष्ट्या तु अभावस्य सर्वदा विशेषणत्वात् तथा प्रयोगाच्चेति विवेकः। उपरि व्याख्याने 'सामान्यतः' इति किमर्थमिति चेत् कैश्चित्तु विशेष्यविशेषणभावपदस्यापि प्रयुक्तत्वात्। यथा केशवमिश्रेण **'इह भूतले घटो नास्ति' इति तदा विशेष्यविशेषणभावः सम्बन्धः** (मिश्रः, १९९५, पृ.८२) इत्यादिकमुक्तम्।

ननु अत्र घटवद् भूतलमित्यादिषु विशेष्यविशेषणभावेन निरपेक्षाभावो गृह्यते वेति चेन्न, तथा असम्भवात्। किं तर्हि इति चेद् इतः पूर्वं व्याकृतेषु संयोग–संयुक्तसमवाय–संयुक्तसमवेतसमवाय–समवाय–समवेतसमवायेषु एकतमेन सम्बन्धेन सम्बद्धेन यथायथं विशेष्यविशेषणभावरूपेण सन्निकर्षेणैकतमेन सम्बन्धेन

सम्बद्धस्याभावो गृह्यते। एतन्नाम 'भूतले घटाभावः' किञ्च 'घटाभाववद् भूतलमि'त्यत्र संयुक्तविशेषणभावसन्निकर्षेणाभावो गृह्यते। तन्नाम 'भूतले घटाभावः' इत्यत्र चक्षुःसंयुक्तं भूतलं तद्विशेष्यभावेन (संयुक्तविशेष्यभावेन) घटाभावो गृह्यते। 'घटाभाववद् भूतलमि'त्यत्र तु संयुक्तविशेषणभावसन्निकर्षेण। 'घटरूपे घटाभावः' इत्यत्र पुनः चक्षुःसंयुक्तसमवेतविशेष्यभावसन्निकर्षेण। 'घटाभाववद् घटरूपम्' इत्यत्र चक्षुःसंयुक्तसमवेतविशेषणभावसन्निकर्षेणेति। एवमेव घटरूपस्थरूपत्वे घटाभावग्रहणे चक्षुःसंयुक्तसमवेतसमवेतविशेष्यभावसन्निकर्षो हेतुः। एवमेव 'घटाभाववद् घटरूपत्वम्' इत्यत्र तु चक्षुःसंयुक्तसमवेतसमवेतविशेषणभावसन्निकर्षः। एवमेव 'कवर्णे खत्वाभावः' इति प्रत्यक्षं श्रोत्रसमवेतविशेष्यभावसम्बन्धेन जायते। 'खत्वाभाववान् कवर्णः' इत्यत्र तु श्रोत्रसमवेतविशेषणभावसन्निकर्षेण। एवमेव कत्वे खत्वाभावस्य प्रत्यक्षं पुनः श्रोत्रसमवेतसमवेतविशेष्यभावसम्बन्धेन। अथ च 'खत्वाभाववद् कत्वम्' इति प्रत्यक्षं पुनः श्रोत्रसमवेतसमवेतविशेषणभावसम्बन्धेन जायते। एवमेवान्यत्रापि ऊह्यम्।

वस्तुतस्तूपर्युक्तस्य विवेचनस्य व्यवहारानुगतत्वाद् यथायथं विशेष्यतासन्निकर्षः, विशेषणतासन्निकर्ष इति सन्निकर्षद्वयं सिद्ध्यति। परं मुक्तावलीकारेण तु द्विविधेऽपि स्वरूपे विशेषणतासन्निकर्षपदस्यैव प्रयोगः कृतो लभ्यते। तत्र बीजञ्च वस्तुगत्याभावस्य सर्वदापि विशेषणत्वाभिमतिरित्यनुमीयते। यच्चात्रापि लेखनव्यापारे संसूचितपूर्वमेव–

> **अभावप्रत्यक्ष इति। विशेषण–विशेष्यभावो नाम विशेषणतासन्निकर्षः। पञ्चविधसन्निकर्षाणामुपरि विशेषणता योजनीया। तथा हि– द्रव्याधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणता। द्रव्यसमवेताधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणता। द्रव्यसमवेतसमवेताधिकरणकाभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता। संयोगस्थाने संयुक्तपदं घटयित्वा समवायस्थाने समवेतपदं घटयित्वा अभावप्रत्यक्षस्थलं निर्वाह्यम। तथा घटद्रव्यसमवेतं घटत्वं पृथ्वीत्वादिकं रूपादिकं च। तत्र नीलादौ पीतत्वाभावः घटत्वादिजातौ पटत्वाभावश्च वर्तते, स चाभावः सयुक्तसमवेतविशेषणतासन्निकर्षेण गृह्यते। एवं नीलत्वादिजातौ पीतत्वाभावोऽपीमन्द्रियसंयुक्तसमवेतसमवेतविशेषणतासन्निकर्षेण गृह्यते, घटसमवेतं नीलं तत्समवेतं नीलत्वं तद्विशेषणता पीतत्वाभावे वर्तते इति सङ्क्षेपः** (भट्टः, २००३, पृ.८२– न्या.बो.)।

मणिकारेण केवलविशेषणता–इन्द्रियसम्बद्धविशेषणताभेदेन विशेषणताया द्वैविध्यमभिमतम्। तत्र इन्द्रियसम्बद्धविशेषणता तूक्तरीत्या पञ्चविधा। केवलविशेषणता हि शब्दाभाववद् आकाशमित्यत्र ज्ञेयम्। तच्च पुनः मणिकृतो **विशेषणतया शब्दाभावस्य, इन्द्रियसम्बद्धविशेषणतया समवायघटाभावादेर्योग्यसन्निकर्षादेव ग्रहः** (गङ्गेशोपाध्यायः, १९९०, पृ. ५७६) इति वचनररचनात् पुष्यति।

**निष्कर्षः**

न्यायवैशेषिकशास्त्रयोः प्रत्यक्षज्ञानाय व्यापारत्वेन सन्निकर्ष उररीक्रियते। तत्र 'सम् नी'त्युपसर्गपूर्वकात् कृषधातो घञि निष्पन्नस्य सन्निकर्षस्यावयवार्थः सान्निध्यं सम्बन्धो वा। स च लौकिकालौकिकभेदेन द्विविधो वर्त्तते। लोकप्रसिद्धसंयोगादिरूपेण प्रथितः सन्निकर्षो लौकिकश्चेत् तद्भिन्नोऽलौकिकः। लौकिको

श्च भावपदार्थग्रहणार्थं पञ्चधा व्यवस्थापितः। तथा हि द्रव्यग्रहणार्थं संयोगः। द्रव्यगतानां रूपादिगुणानां ग्रहणार्थं संयुक्तसमवायः। तद्गतानां रूपत्वादीनां ग्रहणार्थं संयुक्तसमवेतसमवायः। अथ च शब्दग्रहणार्थं समवायः। शब्दग्राहकेण श्रोत्रेण स्वसमवेतं शब्दं गृह्णाति चेद् घ्राणादीनि तु स्वसमेवतगन्धादिकं न गृह्णन्ति। तेषां सगुणत्वेनैवेन्द्रियत्वात्, श्रोत्रस्य तु निर्गुणत्वेऽपि इन्द्रियत्वमित्येतावान् विशेषः। शब्दत्वग्रहणे समवेतसमवायः सन्निकर्षः। अभावग्रहणे विशेष्यविशेषणभावः सम्बन्धः। सन्निकर्षद्वयमतावलम्बिनस्तु यथायथं विशेष्यभावो विशेषणभावश्चेति। अन्ये तु विशेषणताख्य इति विवेकः। अयञ्च उपरिष्टाद् व्याख्यातेषु संयोग–संयुक्तसमवाय–संयुक्तसमवेतसमवाय–समवाय–समवेतसमवायेष्वन्यतमेन सम्बन्धेन सम्बद्धः सन्नभावग्रहणहेतुर्भवति।

**सन्दर्भग्रन्थसूचीः**

उदयनाचार्यः (१९१९), *किरणावली*, सम्पादक– विन्ध्येश्वरीप्रसाद द्विवेदी, वाराणसी : वनारस संस्कृत सिरिज।

उपाध्याय, बलदेव (प्र.सम्पा.) (वै.२०५६), *संस्कृत–वाङ्मय का बृहत् इतिहास* (नवम खण्ड), लखनऊ : उत्तर प्रदेश संस्कृत संस्थान ।

कणादः (२००४), *वैशेषिकसूत्रम्*, षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पा. जे.एल.गुप्तः, वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान ।

कृष्णमूर्त्तिः, जि.एस.आर. (प्रधानसम्पा.) (२०२३), महस्विनी, *सन्निकर्षविचारः* (पृ.७७–८४), तिरूपतिः : राष्ट्रियसंस्कृतविश्वविद्यालयः।

गङ्गेशोपाध्यायः(१९९०), *तत्त्वचिन्तामणिः* (प्रथमखण्डः), श्रीमथुरानाथकृत’रहस्य’नामकटीकासहितम्, सम्पादकः– कामाख्यानाथतर्कवागीशः, वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान ।

गिरिः, काशिकानन्दः (२००१), *द्वादशदर्शनसङ्ग्रहः*, वाराणसी : श्री स्वामी काशिकानन्दजी ट्रस्ट ।

गौतमः (१९८६), *न्यायदर्शनम्*, वात्स्यायनभाष्यसहितम्, विश्वनाथवृत्तियुतञ्च, श्रीमज्जीवानन्दविद्यासागरभट्टा–चार्यात्मजाभ्यां पण्डित–श्रीआशुबोध–विद्याभूषण–पण्डितश्रीनित्यबोधविद्यारत्नाभ्यां सम्पादितम्, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।

... (२००४), *न्यायसूत्रम्*, षड्दर्शनसूत्रसङ्ग्रहे सङ्गृहीतम्, सम्पा. जे.एल.गुप्तः, वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान ।

दीक्षितः, भट्टोजिः (१९८९), *वैयाकरणसिद्धान्तकौमुदी*, पुनर्मुद्रित संस्करण, वाराणसी : चौखम्बा विद्याभवन।

पाणिनिः (२०००), *धातुपाठः*, सम्पा.नरेश झा, वाराणसी : चौखम्बा सुरभारती प्रकाशन ।

... (२०१९), *अष्टाध्यायी*, पदच्छेदवृत्तिवार्त्तिकटिप्पणीसहिता, परिष्कर्ता श्रीगोपालशास्त्री, वाराणसी : चौखम्बा सुरभारती प्रकाशन ।

प्रशस्तपादाचार्यः (१९९७), *प्रशस्तपादभाष्यम्*, न्यायकन्दलीयुतम्, सम्पादकः, हिन्दीव्याख्याकारश्च– श्रीदुर्गानन्द झा, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय ।

भट्टः, अन्नम् (२००३), *तर्कसङ्ग्रहः*, गोवर्द्धनाचार्यकृत–न्यायबोधिनी–चन्द्रजसिंहकृतपदकृत्य–अन्नम्भट्टकृत–दीपिका–श्रीकृष्णवल्लभाचार्यकृत–किरणावली–व्याख्योपेतः, पुनर्मुद्रित संस्करण, वाराणसी : चौखम्बा संस्कृत संस्थान ।

... (२००७), *तर्कसङ्ग्रहः*, आलोकव्याख्याटिप्पणीभ्यां संवलितः, व्याख्याकारः– वरदाचार्यः, महीशूरपुरी : आर्षग्रन्थप्रकाशनम् ।

भट्टः, जयन्तः (१९८२), *न्यायमञ्जरी*, ग्रन्थिभङ्गव्याख्यया संवलिता, व्याख्याता– चक्रधरः, प्रथमो भागः, १–४ आह्निकयुतः, वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

भट्टाचार्यः, विश्वनाथपञ्चाननः (वै.२०५२), *न्यायसिद्धान्तमुक्तावली*, श्रीकृष्णवल्लभाचार्यकृत–किरणावलीव्याख्योपेता, पञ्चम संस्करण, वाराणसी : चौखम्भा संस्कृत संस्थान ।

भारद्वोजोद्योतकरः (१९९७), *न्यायवार्त्तिकम्*, अनन्तलालठक्कुरेण संस्कृतम्, दिल्ली : भारतीयदार्शनिकानुसन्धानपरिषद् ।

भासर्वज्ञः (२००४), *न्यायभूषणम्*, सम्पा. स्वामी योगीन्द्रानन्दः, पुनर्मुद्रित संस्करण, वाराणसी : चौखम्बा विद्याभवन ।

मिश्रः, केशवः (१९९५), *तर्कभाषा*, माधुरी हिन्दीव्याख्योपेता, तृतीयं संस्करणम्, वाराणसी : चौखम्बा सुरभारती प्रकाशन ।

वात्स्यायनः (१९९८), *न्यायभाष्यम्*, प्रसन्नपदापरिभूषितम्, व्याख्याता सुदर्शनाचार्यः, अभिनवसंस्करणम्, वाराणसी : बौद्धभारती ।

व्योमशिवाचार्यः (१९८४), *व्योमवती* (द्वितीयो भागः), वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

# चम्पूरामायणस्य बालकाण्डस्य पद्यानां काव्यसौन्दर्याणामनुशीलनम्

**डा. महानन्दतिमिल्सिना**

सहप्राध्यापकः साहित्यम्

नेपालसंस्कृतविश्वविद्यालयः, पिण्डेश्वरविद्यापीठम्, धरानः,

Email: timsinamahananda@gmail.com

**लेखसारः**

कविभोजराजेन विरचितं चम्पूरामायणकाव्यं चम्पूकाव्यपरम्परायां सुविख्यातमस्ति। विविधरसभावैः विलसितेऽस्मिन् महाकाव्ये शब्दार्थालङ्काराणां गुणरीतीनाञ्च सम्यक् संयोजनं संलक्ष्यते। लेखेऽस्मिन् कविभोजराजविरचितस्य चम्पूरामायणकाव्यस्य बालकाण्डे कीदृशानामलङ्काराणां रसभावानां गुणानां छन्दसां च प्रयोगो विहितोऽस्तीति तथ्यं काव्यशास्त्रीयसिद्धान्तदृष्ट्याऽनुशीलनं कृतमस्ति। अस्मिन् लेखे रसालङ्कार-गुण-छन्दसां विवेचनसामग्रीभिर्विवेचनपद्धतिमग्रे सारितं विद्यते। गुणात्मिकायामनुसन्धानपद्धत्यामाधारितेऽस्मिननुसन्धाने द्वितीयकस्रोतयुतानां सामग्रीणां संयोजनं वर्तते। अत्रोपमोत्प्रेक्षारूपकादीनां शब्दार्थालङ्काराणां शृङ्गारादीनां रसानां माधुर्यादीनां गुणानामनुष्टुप्प्रभृतीनां छन्दसां च प्रयोगस्थितिर्विवेचिता। काव्येऽस्मिन्नलौकिकचमत्कारजनक रसपरिपाकः, हृदयाह्लादका भावाः, मनोहरा अलङ्कारा गुणकगणाश्च विराजिता विद्यन्ते। भोजराजोऽसौ स्वाभाविकालङ्कारसंयोजने भावानुकूलरससंयोजने च कुशलो विद्यते। काव्ये प्रयुक्तैः शब्दार्थालङ्कारैः कथावस्तु स्वाभाविकं संलक्ष्यते। चम्पूरामायणकाव्यस्य बालकाण्डे प्रयुक्ता अलङ्कारा भावानुकूलाः, विषयानुकूलाश्च दृश्यन्ते। अतः सौन्दर्यपक्षदृष्ट्या चम्पूरामायणस्य बालकाण्डं समुचितं प्रतीयते। शब्दार्थालङ्काराणां कुशलेन संयोजनेनास्य काव्यं सहृदयहृदयाह्लादकं प्रतीयते। अत्र ललितानां पदानां मनोहरः सन्निवेशो वर्तते। काव्यमिदं श्रुतिमधुरमानन्दसन्दोहप्रदायकञ्च प्रतीयते। अस्मिन् काव्ये भामह-रुद्रट-दण्डि-मम्मट-विश्वनाथादिभिः पौरस्त्यकाव्यशास्त्रिभिः प्रतिपादितानामलङ्कार-रस-ध्वनि-गुण-रीति-छन्दसां च सान्दर्भिकं संयोजनं प्राप्यते। विषयवस्तूनां सन्दर्भानुसारेणात्रालङ्कार रसगुणछन्दसां च प्रयोगो विहितः संलक्ष्यते। अत्र संयोजितानि काव्यतत्त्वानि काव्यस्य सौन्दर्यपक्षं परिपोषयितुं सफलानि विद्यन्ते।

**बीजशब्दाः** अलङ्कारः, चम्पूकाव्यम्, छन्दः, व्याख्यानविधिः, सौन्दर्यम्।

## विषयपरिचयः

भोजराजः मालवदेशस्य महाराज आसीत्। असौ स्वयं कविः, कवीनां पोषकश्च। कविभोजराजेन रामायणचम्पूः कृता। कृतिरियं किष्किन्धाकाण्डावसाना एव। तस्या युद्धकाण्डं लक्ष्मणभट्टेन कृतम्। अयं भोजराज एकादशशतकोद्भवः प्रसिद्धः साहित्यसेवी। चम्पूरामायणस्य साहित्यिकं गौरवमतिमहत्त्वपूणर्मस्ति। भोजस्य शब्दगुम्फः स्वभावसरलोऽर्थराशिश्च चमत्कारातिशयशाली। असौ मुक्तकण्ठेन वाल्मीकिकाव्यस्य प्रशंसां च विदधाति। भोजराजस्य प्रमुखाः कृतयः - सरस्वतीकण्ठाभरणम् (अलङ्कारशास्त्रग्रन्थः), चम्पूरामाश यणम् (काव्यम्), राजमार्तण्डः (पातञ्जलयोगसूत्रभाष्यम्), राजमृगाङ्ककरणम् (रसायनशास्त्रग्रन्थः), नाममालिका (कोशः), शालिहोत्रम् (अश्वशास्त्रग्रन्थः), शृङ्गारमञ्जरीकथा (गद्यकाव्यम्), तत्त्वप्रकाशः (शैवसिद्धान्तग्रन्थः), व्यवहारमञ्जरी (धर्मशास्त्रग्रन्थः), समराङ्गणसूत्रधारः (शिल्पशास्त्रग्रन्थः)।

अनेन शृङ्गारप्रकाश-सरस्वतीकण्ठाभरणनामकयोः काव्यशास्त्रीयग्रन्थयोः काव्यस्वरूप-काव्यभेद-रसालङ्कार-नाटक-रीति-वृत्ति-साहित्य-नायकनायिकाभेद-शब्दशक्ति-ध्वन्यादीनाञ्च विस्तारपूर्वकं वणर्नं कृतमस्ति। अस्यानुसारेण काव्यं त्रिविधम् - वक्रोक्तिः, रसोक्तिः, स्वभावोक्तिश्च। तत्रापि रसोक्तिण स्तु सर्वाधिकं महत्त्वपूर्णं काव्यम्।

चम्पूकाव्ये वर्ण्यविषयस्य निरूपणं गद्यपद्ययोर्मिश्रितशैल्या विधीयते। कविभोजस्य चम्पूरामायणं संस्कृतसाहित्यस्यादिकवेर्वाल्मीके रामायणे आधारितमस्ति। अत्र बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दत्र रकाण्डानि भोजप्रणीतानि मन्यन्ते। एवञ्च षष्ठं युद्धकाण्डं लक्ष्मणभट्टसूरिविरचितं स्वीक्रियते। मूलतो बालकाण्डं सुन्दरकाण्डञ्चातीव जनप्रियमस्ति। प्रस्तुते लेखे भोजप्रणीतस्य चम्पूरामायणस्य बालकाण्डे संलक्षितानां सौन्दर्यपक्षान्तर्गतानामलङ्काररसगुणादीनां समीक्षणं कृतमस्ति।

## समस्याकथनम्

चम्पूरामायणकाव्यस्य बालकाण्डस्य पद्यानां काव्यसौन्दर्याणामनुशीलनम् इत्यस्मिन् लेखे निम्नाङ्किते समस्ये समागते स्तः -

क. चम्पूरामायणकाव्यस्य बालकाण्डस्य पद्येषु कीदृशाः शब्दार्थालङ्काराः प्रयुक्ताः सन्ति ?

ख. चम्पूरामायणकाव्यस्य बालकाण्डस्य पद्येषु कीदृशानां रसगुणछन्दसां प्रयोगोऽस्ति ?

## उद्देश्यम्

अध्ययनमेतत् निम्नाङ्कितयोरुद्देश्ययोः केन्द्रितमस्ति -

क. चम्पूरामायणकाव्यस्य बालकाण्डस्य पद्येषु प्रयुक्तानां शब्दार्थालङ्काराणामनुशीलनम्,

ख. चम्पूरामायणकाव्यस्य बालकाण्डस्य पद्येषु प्रयुक्तानां रसगुणछन्दसां समीक्षणम्,

## अध्ययनविधिः

एतदध्ययनं गुणात्मिकायामनुसन्धानपद्धत्यामाधारितं विद्यते। अध्ययनेऽस्मिन् पुस्तकालयीयानां सामग्रीणामुपयोगोऽस्ति। संस्कृतकाव्यशास्त्रिभिर्विरचितान्यलङ्कारसिद्धान्तविषयकानि पुस्तकान्यप्यत्र

सामग्रीरूपेण संयोजितानि विद्यन्ते। चम्पूरामायणकाव्यविषये लिखितानि पुस्तकानि, विचाराः, लेखाश्चात्र सङ्कलनं विधाय विश्लेषणं विहितं वर्तते। सङ्कलितानां सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेः प्रयोगः कृतो विद्यते।

**सीमा**

एतस्मिनध्ययने चम्पूरामायणकाव्यस्य बालकाण्डे विद्यमानानां काव्यसौन्दर्याणां समीक्षणं कृतमस्ति। काव्यस्यास्य विविधकाण्डस्थेषु सकलेष्वपि श्लोकेषु काव्यसौन्दर्यं प्रतिभाति। काव्येऽस्मिन् काव्यशास्त्रिभिः प्रतिपादितानामनेकेषामलङ्काराणां प्रयोगो विलोक्यते। काव्यस्य सकलेष्वपि काण्डेषु रसध्वनिगुणादीनां सम्मीलनं संलक्ष्यते, परमत्रास्य काव्यस्य बालकाण्डस्य पद्येषु विद्यमानानां प्रमुखाणां शब्दार्थालङ्काराणां रसगुणछन्दसां च सौन्दर्यस्याध्ययनं कृतमस्ति। अत्र बालकाण्डगतानां पद्यानामपि काव्यसौन्दर्यान्तर्गतानां ध्वनि-रीति-वक्रोक्तीनामाधारेण विवेचनं नैव कृतमस्ति। एतदेवास्य लेखस्य सीमा वर्तते।

**पूर्वकार्यसमीक्षा**

अस्मिन् लेखे चम्पूरामायणकाव्यस्य बालकाण्डस्य पद्यानां काव्यसौन्दर्याणामनुशीलनं विहितमस्ति। एतत्शीर्षकसम्बद्धानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयन्ते -

रामचन्द्र मिश्रः *'चम्पूरामायणम्'* (ई.२०१९) काव्यस्य भूमिकाखण्डे 'चम्पूरामायणस्य काव्यचमत्कारः' इति शीर्षके कविभोजराजस्य, तस्य चम्पूरामायणस्य च वैशिष्ट्यं प्रतिपादयति। अस्यानुसारेण भोजराजेन वाल्मीकिं प्रति कृतज्ञता प्रकटिता। भोजराजस्य कवितायामलङ्काराणामुत्तमः समावेशः प्राप्यते। श्लेषबन्धद्वारा उपमालङ्कारस्य प्रयोगेण पाठकान् रञ्जयितुमसौ बाणभट्टतुल्यो वर्तते। अस्य कवितायां कुत्रचिद् माघस्य शैली, कुत्रचित्तु कालिदासस्य शैली दृश्यते। चम्पूरामायणे प्रसादगुणस्य प्राबल्यं दृश्यते। एवमेव काव्ये वर्णनचातुर्यं च प्रतिभातीत्यादिना भोजस्य तत्काव्यस्य च वैशिष्ट्यं प्रकाशयति (मिश्रः, ई.२०१९ पृ.१०-११)।

डा.राजवंश सहाय 'हीरा' *'संस्कृत साहित्य-कोश'* (ई.२००२) इति कोशस्य 'भोज' इति शीर्षकेऽस्य जीवनवृत्तस्य काव्यानाञ्च वैशिष्ट्यं प्रतिपादयति, यत् - भोजस्य विद्वता दानशीलता चेतिहासे प्रसिद्धाः। राजतरङ्गिण्यां काश्मिरनरेशस्यानन्तराजस्य मालवाधिपतेर्भोजराजस्य च समानरूपेण विद्वत्प्रियत्वं प्रस्तुग तम् -

स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ।
सूरी तस्मिन् क्षणे तुल्यं द्वावास्तां कविबान्धवौ ॥

अस्यानुसारेण काव्यं त्रिविधम् - वक्रोक्तिः, रसोक्तिः, स्वभावोक्तिश्च। तत्रापि रसोक्तिस्तु सर्वाधिकं महत्त्वपूर्णं काव्यम् -

वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्।
सर्वासु ग्राहिणीं तासु रसोक्तिं प्रतिजानते ॥ (सरस्वतीकण्ठाभरणम्, ५/८)

इत्यादिनास्मिन् कोशे भोजराजस्य महत्तां तद्काव्यवैशिष्ट्यं च प्रतिपादितं वर्तते (राजवंश, ई.२००२, पृ.३५६-३५७)।

आचार्य बलदेव उपाध्याय *'संस्कृत साहित्य का इतिहास'* (ई.१९९२) इति ग्रन्थस्य अष्टमपरिच्छेदस्य 'गद्य तथा चम्पू साहित्य' इति शीर्षके महाकवेः भोजस्य तस्य काव्यानाञ्च चर्चां विदधाति। असौ कथयति यत् -

चम्पूकाव्येषु सर्वविश्रुतं भोजराजस्य लेखन्या प्रसूतं रामायणचम्पूकाव्यम्। अस्योपजीव्यं वाल्मीकिरामायणम्। रामायणचम्पूकाव्यं रोचकं मञ्जुलं च वर्तते। अत्र भोजेन कलापक्षस्य सौन्दर्यं पूणर्तः प्रदर्शितमस्ति। अत्र प्रसादमय्यां शैल्यां नवीनानां भावानां चमत्कारः संलक्ष्यत इत्यादिविषयं प्रतिपाद्य समीक्षको बलदेवो भोजस्य तस्य काव्यस्य च महत्तां प्रस्तौति। (उपाध्याय, ई.१९९२, पृ.४१८-४१९)।

कृष्णकुमारः *'अलङ्कारशास्त्र का इतिहास'* (ई.१९९८) इति पुस्तकस्य 'भोजराजः' इति शीर्षकमाध्यमेन कवेर्भोजराजस्य विषये तत्काव्यसन्दर्भे विवेचयति, यत् - काव्यशास्त्रस्य प्रायशः सर्वेषु विषयेषु भोजराजेन विवेचनं कृतम्। अनेन प्राचीनानामाचार्याणां मतानां स्वकीये ग्रन्थे समन्वयो विहितः। तथैवानेन नवीनं मौलिकञ्च चिन्तनं प्रस्तुतमस्ति। अनेन रसविवेचनेऽधिकं महत्त्वं प्रदत्तम्। अनेन दशसङ्ख्यकानां रसाणां विवेचनं कृतम्, तत्रापि सर्वेषां रसाणां मूलरूपेण शृङ्गार एव स्वीकृतः -

रसोऽभिमानोऽहङ्कारः शृङ्गार इति गीयते।
योऽर्थस्तस्यान्वयात् काव्यं कमनीयत्वमश्नुते ॥ (सरस्वतीकण्ठाभरणम्, ५/१)
शृङ्गारी चेत्कविः काव्य. जातं रसमयं जगत्।
स एव चेदशृङ्गारी नीरसं सर्वमेव तत् ॥ (सरस्वतीकण्ठाभरणम्, ५/३)

इत्यादिना समीक्षकः कृष्णकुमारः कवेर्भोजराजस्य काव्यशास्त्रविषयकं वैशिष्ट्यं प्रतिपादयति (कृष्णकुमार, ई.१९९८ पृ.१३९)।

आचार्यरामचन्द्र मिश्रः *'संस्कृतसाहित्येतिहासः'* (ई.२०१०) इति पुस्तकस्य 'भोजराजः' इति शीर्षके भोजराजस्य तस्य चम्पूरामायणकाव्यस्य च विषये स्वल्पैः शब्दैर्विवेचयति -

भोजराजेन धाराधीशेन कृता रामायणचम्पूः किष्किन्धाकाण्डावसाना एव, तस्या युद्धकाण्डं लक्ष्मणभट्टेन कृतम्। चम्पूरामायणस्य साहित्यिकं गौरवमतिमहत्त्वपूणर्म्। भोजस्य शब्दगुम्फः स्वभावसरलः अर्थराशिश्च चमत्कारातिशयशाली। सीताया अशोकवाटिकायां तिष्ठन्तया दशां वणर्यति कविः -

उपघ्नवृक्षस्य परोक्षभावादाश्रित्य भूमिं सुचिरं लुठन्त्याः।
नक्तञ्चरस्त्रीमुखकर्शितायाः सीतालतायास्त्रिजटा जटाऽभूत् ॥ (चम्पूरामायणम्, सुन्दर./२५)
तदिदमतिचमत्कारि चम्पूकाव्यम्। (मिश्रः, ई.२०१० : पृ.१४६)

अनेन प्रकारेण भोजराजस्य जीवनवृत्तविषये तस्य काव्य-काव्यशास्त्रविषये च विविधैः समीक्षकैर्विविधेषु सन्दर्भेषु समीक्षणं कृतं दृश्यते। मूलतः समीक्षकाः भोजराजस्य काव्यशास्त्रविषये जीवनवृत्तानुसन्धानविषये च केन्द्रिता विद्यन्ते। कतिपयैः समीक्षकैरस्य चम्पूरामायणकाव्यस्य विषये समग्रं समीक्षणं विहितमस्ति परं काव्यस्यास्य बालकाण्डमधिकृत्य सौन्दर्यपक्षस्याध्ययनं न केनापि समीक्षकेन समीक्षितम्। अतो लेखोऽयं नवीनानुसन्धानकार्ये समर्थोऽस्तीति प्रतीयते।

**सौन्दर्यशास्त्रीयः सिद्धान्तः**

काव्ये आनन्दप्रदायकं तत्त्वमेव सौन्दर्यम्। तत्त्वमिदं सहृदयानां हृदयमाकर्षयति। अस्याभावे काव्येऽस लङ्कारत्वं रसत्वं ध्वनित्वं वा नैव संलक्ष्यते। कतिपयैः समालोचकैः काव्यशास्त्रमेव सौन्दर्यशास्त्रनाम्ना प्रतिष्ठापितम्। दण्डि-वामनाभिनवगुप्त-भोज-अप्पयदीक्षितादिभि आचार्यैः काव्ये सौन्दर्यस्यानिवार्यता प्रतिपादिता। दण्डिना सौन्दर्याधायकं तत्त्वमिदमलङ्कारत्वेन स्वीकृतम्, तेनोक्तञ्च -

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते। (काव्यादर्शः, २/१)

वामनेनालङ्कारस्य द्वितीयं नाम एव सौन्दर्यं प्रतिपादितम् -

सौन्दर्यमलङ्कारः। (काव्यालङ्कारसूत्रवृत्तिः, १/१/२)

काव्ये चारुत्वस्यातिशयप्रदर्शनमेव सौन्दर्यम्। यद्यलङ्काराः काव्ये सौन्दर्यवर्धका न भवन्ति चेत् तदा ते भूषणाः न, अपि तु दूषणा एव। वामनपूर्ववर्तिनो भामहोद्भटादयो गुणालङ्कारयोरभेदमङ्गीकुर्वन्ति, परं वामनः काव्यशोभायाः कर्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः (वामनः, ई. १९१०, पृ.१) इति स्वसिद्धान्तं प्रकटयति। असौ सौन्दर्यमलङ्कार इत्यलङ्कारलक्षणं प्रतिपाद्य दोषहानाद् गुणालङ्कारादाना-च्चालङ्कारः सम्भवतीति कथयति। ध्वन्यालोककार आनन्दवर्धनः काव्यस्य प्रधानभूते रसे तदङ्गभूतयोः शब्दार्थयोरङ्गरूपेणाऽऽश्रिता अलङ्काराः कटकादिवद् भवन्तीति प्रतिपादयति (आनन्दवर्धनः, पृ.३४१)। असौ काव्ये रसादीनां व्यञ्जकत्वेनालङ्काराणां संयोजनं कर्तव्यमित्यलङ्कारप्रयोगस्थितिं प्रकटयति। काव्येऽलङ्कारा अङ्गित्वेन न प्रयोक्तव्या अपि तु रसस्याङ्गरूपेणैव निवेशनीया इत्यसौ प्रतिपादयति। मम्मटप्रतिपादितस्यालङ्कारस्य लक्षणानुसारेणाङ्गिनं रसमनुप्रासोपमादयोऽलङ्काराः शब्दार्थमाध्यस मेनोपकुर्वन्ति, परं सर्वदैव न कदाचिदेव (मम्मटः, पृ.३८५)। आचार्यो जयदेवस्तु अनुष्णस्य अग्नेरिव शब्दार्थालङ्काररहितस्य काव्यस्याप्यसम्भवतां स्वीकरोति (जयदेवः, ई.१९९९, पृ.१०)। अलङ्कारसम्प्रदायप्रवर्तकस्य भामहस्यालङ्कारविषयकं मतमाधारीकृत्य दण्ड्युद्भट-रुद्रट-जयदेवसदृशा आचार्या काव्येऽलङ्कारतत्त्वमेव प्राधान्येन स्वीकुर्वन्ति। भामहानुसारमलङ्काररहितं काव्यमाभूषणरहिता वनिता इव न शोभते। अनेन रसस्य प्राधान्यमस्वीकृत्य रसो रसवदलङ्कारेऽन्तर्भावितः। भामह-दण्डि-रुद्रट-जयदे-वप्रभृतय आचार्या अलङ्कारमेव साहित्यस्यात्मस्वरूपं मन्यन्ते, अपरेऽलङ्कारमहत्त्वाभिज्ञा ध्वनिवादिनो मम्मटजगन्नाथादयोऽपि स्वस्वग्रन्थेषु अलङ्कारान् विस्तरेण व्याकुर्वन्ति। तत्राभिनवगुप्तेन वाच्यार्थस्या-पेक्षायां व्यङ्ग्यार्थे सौन्दर्यं दृश्यत इति प्रस्तुतम् - गुणालङ्कारौचित्यसुन्दरशब्दार्थशरीरस्य ध्वन्यात्मनि आत्मनि काव्यरूपताव्यवहारः (ध्वन्यालोकः, लोचनटीका, पृ.१७)। भोजराजेनापि काव्ये सौन्दर्यस्यानिवार्यता प्रकटिता। असौ कथयति - ‘धूमोऽयमग्नेः’ इत्यत्र काव्यत्वं न, कस्याप्यलङ्कारस्योदाहरणमपि न, यतोऽत्र सौन्दर्यं न। सौन्दर्यशास्त्रं न केवलं काव्यशास्त्र एव, अपितु ललितकलान्तर्गतासु नृत्यगीतवाद्यचिं-त्रमूर्तिकलासु च विस्तारितं संलक्ष्यते।

**विषयविश्लेषणम्**

कविभोजराजेन विरचिते चम्पूरामायणकाव्ये पौरस्त्यकाव्यशास्त्रिभिः प्रतिपादितानां विविधानां का-व्यसौन्दर्याणां प्राचुर्यं संलक्ष्यते। मूलतोऽत्रालङ्कार-रस-ध्वनि-गुण-वृत्तैर्निर्मितस्य सौन्दर्यस्य समीक्षणं विधीयते।

## चम्पूकाव्यस्य परिचयो वैशिष्ट्यञ्च

गद्यपद्यमिश्रितं काव्यमेव चम्पूकाव्यम्। विविधैः प्राचीनै आचार्यैश्चम्पूकाव्यस्य विषये परिभाषा प्रदत्ता संलक्ष्यते, यथा-

प्रथमं कविर्दण्डिना चम्पूकाव्यस्य लक्षणं प्रस्तुतं यत् -

मिश्राणि नाटकादीनि तेषामन्यत्रविस्तरः।

गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते ॥ (काव्यादर्शः, १/३१)

तथैव हेमचन्द्रेण चम्पूकाव्ये मिश्रशैल्यातिरिक्तमङ्कानामुच्छ्वासानाञ्च परिकल्पना विहिता। अस्य चम्पूकाव्यलक्षणं यथा -

गद्यपद्यमयी साङ्का सोच्छ्वासचम्पूः। (काव्यानुशासनम्, ८/९)

एवञ्च विश्वनाथेन गद्यपद्यमयी रचना एव चम्पूरिति लक्षणं प्रस्तुतम्, यथा-

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते। (साहित्यदर्पणः, ६/३३६)

तथैव केनाप्यज्ञातेनाचार्येण चम्पूकाव्ये उक्ति-प्रत्युक्ति-विष्कम्भशून्यता भवतीति प्रतिपादितम्, यथा -

गद्यपद्यमयं साङ्का सोच्छ्वासा कविगुम्फिता।

उक्तिप्रत्युक्तिविष्कम्भशून्या चम्पूरुदाहृता ॥ (अज्ञात)

मूलरूपेण चम्पूकाव्यस्य वैशिष्ट्यानि बिन्दुरूपेणाधो निर्दिश्यन्ते -

१. गद्यपद्यमयम्
२. अङ्कयुतम्
३. उच्छ्वासेषु विभक्तम्
४. अष्टाधिकपरिच्छेदयुतम्
५. मूलस्रोतः पुराणम्
६. वस्तुवर्णनस्याधिक्यम्
७. मुख्यपात्रस्य चरित्रचित्रणे केन्द्रितम्
८. शृङ्गार-वीर-शान्तानामेकस्याङ्गीरसत्वम्
९. गद्यांशस्य समासबाहुल्यम्
१०. वार्णिक-मात्रिकछन्दसोः प्रयोगः
११. खलनिन्दा-सज्जनानां स्तुतिः
१२. नायकत्वेन देवता-गन्धर्व-मानव-पशुपक्षिणाञ्च प्रयोगः

संस्कृतकाव्यपरम्परायां चम्पूकाव्यस्य महती भूमिका वर्तते। विविधेषु काव्यभेदेषु चम्पूकाव्यस्य स्थान-मधो निर्दिष्टायां वृक्षरेखतालिकां प्रदर्श्यते -



**चम्पूरामायणस्य बालकाण्डस्य कथासारः**

कविना भोजराजेन विरचितं चम्पूरामायणं वाल्मीकिरामायणस्य कथामवलम्ब्य प्रणीतं काव्यमस्ति। चम्पूरामायणस्य बालकाण्डे ब्रह्मणा रामायणाख्यं ग्रन्थं रचयितुमादिष्टो वाल्मीकि रामायणं विरचय्य तस्य प्रचारार्थं कुशलवसमक्षं प्राप्नोतीति प्राक्कथा प्रस्तुता विद्यते। अनन्तरमत्र रामजन्मत आरभ्य सीतया सह विवाहानन्तरम् अयोध्याप्रत्यावर्तनपर्यन्ता कथा संयोजिता विद्यते।

राजा दशरथोऽनपत्यतया चिन्तितो वर्तते। स गुरोराज्ञया पुत्रलाभार्थं यज्ञं करोति। तदा एव रावणेन पीडाग्रस्ता देवा विष्णुं स्तुवन्ति। विष्णुश्च झटिति एव नवीनमवतारं गृहीत्वा भवतां समस्यां निवारयामि इति वचनं प्रददाति। तदनुरूपं राजा दशरथो यज्ञस्य प्रसादस्वरूपान् रामभरतलक्ष्मणशत्रुघ्नान् चत्वारः पुत्रान् प्राप्नोति। स तान् पुत्रान् शिक्षणार्थं गुरुकुले सम्प्रेषयति। प्रारम्भिकीं शिक्षां प्राप्य ते गृहं प्रति गच्छन्ति। कतिचित् कालानन्तरं विश्वामित्रः समागत्य ऋषीणां यज्ञबाधां परिहर्तुं दशरथेन सह रामं नेतुं याचते। वात्सल्यपीडितो राजा दुःखेन रामलक्ष्मणौ प्रेषयति। तत्र वने रामः ऋषीणां यज्ञान्तरायभूताया ताटकाया वधं विधाय विश्वामित्रादीनां मुनीनां हर्षं वर्धयति। तदनन्तरं विश्वामित्रो रामादीनां राजकुमाराणां विवाहयोग्यं वयो विचार्य तौ मिथिलां नयति। तत्र मिथिलागमनक्रमे मार्गे समागतानां प्राचीनमहत्त्वाधायकानां स्थानानाम्, गङ्गादीनां पवित्रनदीनाञ्च परिचयं प्रददाति। तत्रस्थानां प्राकृतिकसौन्दर्याणां वणर्नमस्य काव्यस्य वैशिष्ट्यं प्रतिपादयति। तदनन्तरम् अयोध्यां प्राप्य तत्र सीतास्वयंवरवणर्नम्, रामस्य शृङ्गारभावसौन्दर्यप्रकाशनञ्च मनोहारिभिः गद्यपद्यमयैर्वाक्यैः कृतं विद्यते। रामादीनां राजकुमाराणां विवाहानन्तरमयोध्यागमने नागरिका हर्षोल्लासपूर्वकं नववरवधूनां स्वागतञ्च कुर्वन्तीति बालकाण्डस्य कथावस्तु संलक्ष्यते।

चम्पूरामायणस्योपजीव्यं वाल्मीकिरामायणमेव संलक्ष्यते। संस्कृतसाहित्यस्य विद्वांसः काव्यरचनासन्दर्भे भूयसा पौराणिकाख्यानमुपजीव्यरूपेण स्वीकुर्वन्ति। तथैव रामायणं महाभारतञ्च कथावस्तुनः स्रोतोरूपेण स्वीकृत्य काव्यं रचयन्ति। एवञ्च भोजराजोऽपि वाल्मीकिप्रणीतस्य रामायणस्य कथामवलम्ब्य गद्यपद्यमयं चम्पूरामायणं निर्माति। वाल्मीकिरामायणे बालकाण्डादीनि षट्काण्डानि सन्ति। तथैवास्मिन् काव्येऽपि षट्काण्डानि विद्यन्ते। सर्गसङ्ख्या-कथावस्तु-भावसंयोजनादिदृष्ट्या वाल्मीकिरामायणमेवास्योपजीव्यमिति कविरेव प्रमाणयति। कविभोजः काव्यस्य प्रारम्भे रामायणस्यैव कथावस्तु पुनश्चम्पूशैल्या प्रणयने किं नावीन्यमायाति ? इत्याशङ्क्य भागीरथ्या गङ्गाया दृष्टान्तमुल्लिखति, यत्

वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशैस्तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुविभगीरथयत्नलब्धैः किं तर्पणं न विदधाति नरः पितृणाम् ॥

काव्येऽस्मिन् वाल्मीकिरामायणस्यादरभावप्रदर्शनाय कविः प्रायशः काण्डस्य प्रारम्भे समानशब्दग्रहणं करोति। अत्र काव्यप्रतिभाबलात् कविना काव्यसौन्दर्यं प्रकाशितमस्ति।

**चम्पूरामायणस्य वैशिष्ट्यम्**

कविभोजस्य चम्पूरामायणगतानि वैशिष्यानि सङ्क्षेपेणाधः प्रस्तूयन्ते -

- रामायणाधारितं चम्पूकाव्यम्

- बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दरकाण्डानि भोजप्रणीतानि
- षष्ठं युद्धकाण्डं लक्ष्मणभट्टसूरिविरचितम्
- मूलतो बालकाण्डं सुन्दरकाण्डञ्चातीव जनप्रियम्
- बालकाण्डे ११७ श्लोकाः, गद्यभागश्च।

➢ अनेन काव्यशास्त्रविषयकेषु ग्रन्थेषु काव्यस्वरूप-काव्यभेद-रसालङ्कार-नाटक-रीति-वृत्ति-शब्द-शक्ति-ध्वनिप्रभृतीनां विषयाणां विस्तारपूर्वकं वणर्नं कृतम्

➢ अस्यानुसारेण काव्यं त्रिविधम् - वक्रोक्तिः, रसोक्तिः, स्वभावोक्तिश्च। रसोक्तिस्तु महत्त्वपूर्णं काव्यम्

➢ रसविषये दार्शनिकं मनोवैज्ञानिकञ्च व्याख्यानं कृतम्

➢ शृङ्गाररसे एवानेन सर्वेषां रसाणामन्तर्भावनं कृतम्

➢ अनेनालङ्कारस्य त्रयो भेदाः प्रकाशिताः - शब्दालङ्काराः, अर्थालङ्काराः, उभयालङ्कारश्च।

अत्र चम्पूरामायणगतानामलङ्काररसगुणादीनां सौदर्यपक्षाणां समीक्षणं विधीयते -

**अलङ्कारसौन्दर्यम्**

चम्पूरामायणे विविधानां शब्दार्थालङ्काराणां प्रयोगबाहुल्यं संलक्ष्यते। काव्येऽलङ्कारसंयोजनेऽसौ कुशलो दृश्यते, यतोऽनेन काव्यशास्त्रीयाः ग्रन्था अपि विनिर्मिताः सन्ति। अत्रास्य काव्यस्य बालकाण्डे संलक्षितानां शब्दार्थालङ्काराणां विश्लेषणं विधीयते।

**अनुप्रासः**

स्वरवैसादृश्येऽपि व्यञ्जनवर्णानां साम्येऽनुप्रासः। अस्यापि द्वौ भेदौ दृश्येते। अनेकस्य व्यञ्जनस्य सकृत् सादृश्यं छेकानुप्रासः तथैवैकस्यानेकस्य वा व्यञ्जनस्य द्विर्बहुकृत्वो वा सादृश्यं वृत्त्यनुप्रासः। एवञ्च तालुरदादिक एकस्मिन् स्थाने उच्चार्यत्वाद् व्यञ्जनस्य यद् सादृश्यं तत्र श्रुत्यनुप्रासः। तथैव स्वरवर्णयुतस्य व्यञ्जनस्य पादान्तावृत्तियोजने अन्त्यानुप्रासः। एवञ्च शब्दार्थयोः पौनरुक्त्ये तात्पर्यमात्रतो भेदप्रदर्शने लाटानुप्रासः कथ्यते (विश्वनाथः, १०/३-७)। चम्पूरामायणस्य बालकाण्डे विविधानामनुप्रासानां चमत्कारो द्रष्टुं शक्यते। तत्र लाटानुप्रासस्यैकमुदाहरणं यथा-

एनां पुराणनगरीं नगरीतिसालां
सालाभिरामभुजनिर्जितयक्षराजः ।
हेलाभिभूतजगतां रजनीचराणां
राजा चिरादवति रावणनामधेयः ॥ (बाल.१९)

अत्र नगरी-नगरी, साला-साला इति पदयुग्मयो आवृत्तिर्दृश्यते, अनयोः पदयुग्मयोस्तात्पर्यमात्रभेदात् लाटानुप्रासः।

**श्लेषः**

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेषः। वणर्-प्रत्यय-लिङ्ग-प्रकृति-पद-विभक्ति-वचन-भाषाणां भेदाद्

श्लेषोऽष्टधा (विश्वनाथः, १०/२)। चम्पूरामायणस्य बालकाण्डे यथा -

आजानपावनक्षीरां वृषानन्दविधियनीम्।
श्रुतिप्रणयिनीं सोऽयमापगामाव गामिव।। (बाल.५४)

अत्र वृषानन्दविधायिनीमित्यत्र वृषो धर्मं सुखं च, तथैवाजानपावनक्षीरामित्यत्र क्षीरं जलं दुग्धं चेत्यर्थथ द्वयप्रतिपादनात् श्लेषालङ्कारः।

**उपमा**

भिन्नयोरपि उपमानोपमेययोः साधर्म्ये उपमालङ्कारो भवति। एषोपमा पूर्णालुप्ताभेदेन द्विविधा। यत्रोन पमानोपमेयसाधारणधर्मवाचकपदानामुपस्थितिर्दृश्यते तत्र पूर्णोपमा। यत्रैतेषु चतुर्षु तत्त्वेषु मध्ये एकस्य द्वयोर्वा लोपे लुप्तोपमा भवति (मम्मटः, १०/८७)। चम्पूरामायणस्य बालकाण्डे यथा -

जग्राह जनकात्सीतां तातादेशेन राघवः
आम्नायशासनेनार्चां यजमानादिवानलः ॥ (बाल.१०८)

अत्र यथा वेदवचसा वह्निर्यजमानविहितां होमादिक्रियां स्वीकरोति, तथैव दशरथाज्ञया रामः सम्प्रदातुर्जन नकात् सीतां स्वीचकार इति सकलानामपि साधारणधर्मादीनामुपादानाद् पूर्णोपमालङ्कारः।

**रूपकम्**

उपमानोपमेययोरभेदारोपे रूपकालङ्कारः (मम्मटः, १० /९३)। रूपकालङ्कारे उपमानोपमेययो- रतिट साम्याद् भेदप्रतीतिरपह्नुता भवति। यथा -

लक्ष्मीं तनोतु नितरामितरानपेक्ष-
मङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम्।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधारधुरन्धरं नः ॥ (बाल.१)

श्लोके वेदरूपवृक्षस्य शिखा वेदान्तास्तत्रत्यं प्रवालं गणेशचरणं चरितवेदान्तत्वेन कवि वेदान्तवेद्यमुक्तवानिति ज्ञायते। अत्र निगमाः = वेदा एव शाखिनः = वृक्षा इत्यत्र निगमानां वृक्षेष्वभेदारोक्ष पात् रूपकालङ्कारः।

**उत्प्रेक्षा**

प्रकृतस्यार्थस्य असम्भविनोपमानेन सह यत्सम्भावनं क्रियते सैवोत्प्रेक्षा (मम्मटः, १०/९२)। चम्पूरामा- यणस्य बालकाण्डे यथा -

वाणीविलासमपरत्र कृतोपलम्भ-
मम्भोजभूरसहमान इवाविरासीत्।
आभाति यत्कृतिरनेकविधप्रपञ्च-
व्याजेन्द्रजालविधिसाधकपिच्छिकेव ॥ (बाल.७)

अत्र ब्रह्मा परमकारुणिकतया महर्षेर्वाल्मीकेर्व्याधविद्धक्रौञ्चदर्शनजनितशोकापनोदार्थं नारदोक्तमेवार्थं

पुनरुपदेष्टुं च प्रादुरासीत्, तत्र स एवार्थोऽसहमानभावत्वेनोत्प्रेक्षितः। अत्र पूर्वार्धेऽसहमान इवेति हेतूत्प्रेक्षा। उत्तरार्धे चोपमा।

**अतिशयोक्तिः**

आरोपस्य निश्चयरूपत्वे सति अतिशयोक्त्यलङ्कारः। अस्यालङ्कारस्य भेदेऽभेदः, सम्बन्धेऽसम्बन्धः, तद्विपर्ययः, कार्यहेत्वोः पौर्वापर्यात्ययः इति भेदेन पञ्चधा। (विश्वनाथः, १०/४६)। चम्पूरामायणस्य बालकाण्डे यथा -

प्रह्लादस्य व्यसनममितं दैत्यवर्गस्य दम्भं
स्तम्भं वक्षःस्थलमपि रिपोर्यौगपद्येन भेत्तुम्।
बद्धश्रद्धं पुरुषवपुषा मिश्रिते विश्वदृष्टे
दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे ॥ (बाल.१५)

अत्र क्रमिकस्य स्तम्भादिविदारणस्य यौगपद्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः।

**दृष्टान्तः**

साधारणधर्मादीनां बिम्बप्रतिबिम्बभावेन प्रस्तुतिरेव दृष्टान्तालङ्कारः (काव्यप्रकाशः, १०/१०२)। चम्पूरामायणस्य बालकाण्डे यथा -

वाल्मीकिगीतरघुपुंगवकीर्तिलेशै-
स्तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति नरः पितृणाम् ॥ (बाल.४)

अत्र भगीरथेन महता यत्नेन भुवि समानीतया गङ्गया जनाः स्वपितृन् तर्पयन्ति तथैव वाल्मीकिना वर्णिताभिः रामकथाभिरहमपि बुधानां तृप्तिं करोमीति स्वस्य प्रयत्नस्य प्रतिबिम्बरूपेण भगीरथकथाप्रसङ्गवर्णनाद् दृष्टान्तालङ्कारः।

**तुल्ययोगिता**

प्रस्तुतानामप्रस्तुतानां वा पदार्थानामेकधर्माभिसम्बन्ध एव तुल्ययोगिता। (विश्वनाथः, १०/४७)। चम्पूरामायणस्य बालकाण्डे यथा -

तावुभौ भृगुवंशसम्भवौ चापदण्डजमदग्निसम्भवौ।
प्रह्वभावमवलम्ब्य केवलं राघवार्पितगुणौ बभूवतुः ॥ (बाल. ११३)

अत्र चापदण्डजमदग्निसम्भवयोः केवलप्रकृतयोः प्रकृतप्रह्वभावावलम्बनरूपैकक्रियाभिसम्बन्धात् तुल्ययोगितालङ्कारः।

**अर्थान्तरन्यासः**

यत्र साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण समर्थ्यते, विशेषो वा सामान्येन समर्थ्यते सोऽर्थान्तरन्यासालङ्कारः। (मम्मटः, १०/१०९)। चम्पूरामायणस्य बालकाण्डे यथा -

नूनं जनेन पुरुषे महति प्रयुक्तमागः परं तदनुरूपफलं प्रसूते।
कृत्वा रघूद्वहगतेः क्षणमन्तरायं यद्भार्गवः परगतेर्विहतिं प्रपेदे ॥ (बाल.११५)

अत्र जनो महापुरुषविषये यादृशमपराधं करोति, तदुचितं फलमवाप्नोतीति सामान्यकथनं श्लोकस्योत्तरार्धस्थितेन रामकार्ये विघ्नस्वरूपः परशुरामो रामेणैव विनष्ट इति विशेषकथनेन समर्थनादर्थान्तरन्यासालङ्कारः।

**विरोधाभासः**

वस्तुगत्या विरोधाभावेऽपि यत्र विरुद्धमिवाभिधानं स विरोधाभासः (अप्पयदीक्षितः, ७६)। चम्पूरामायणस्य बालकाण्डे यथा -

सङ्क्रान्तवर्णान्तरगाधिसूनोः सम्पर्कपुण्यादिव रामभद्रः।
क्षात्रक्रमात्पिप्पलदण्डयोग्यः पलाशदण्डादृतपाणिरासीत् ॥ (बाल.४९)

अत्र पिप्पलदण्डयोग्योऽपि पलाशदण्डादृतपाणिरिति सर्वतो विरोधस्य राक्षसशिक्षणपरतया परिहृतत्वाद्विरोधाभासालङ्कारः।

**एकावली**

यत्र पूर्वं पूर्वं वस्तु प्रति उत्तरोत्तरस्य वस्तुनो विशेषणरूपेण स्थापनमपोहनं वा तत्र एकावली। (काव्यप्रकाशः, १०/१३१)। चम्पूरामायणस्य बालकाण्डे यथा -

उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चेत्तस्य प्रमा च वचनैः कृतकेतरैश्चेत्।
तेषां प्रकाशनदशा च महीसुरैश्चेत्तानन्तरेण निपतेत् क्व नु मत्प्रणामः ॥ (बाल.२)

अत्र स्वर्गादिफलं धर्मकार्यात्, धर्मकार्यं वेदात्, वेदाः ब्राह्मणात् सार्थकाः भवन्तीति प्रस्तुतम्, अतोऽत्र पूर्वं पूर्वं प्रति क्रमेण विशेषणप्रयोगादेकावल्यलङ्कारः।

**तद्गुणः**

यत्र किमपि वस्तु स्वगुणमुत्सृज्यान्यस्य वस्तुनः समुज्ज्वलगुणयोगाद् तद्गुणतामेति, तत्र तद्गुणालङ्कारः (काव्यप्रकाशः, १०/१३७)

क्षीराम्भोधेर्जठरमभितो देहभासां प्ररोहैः
कालोन्मीलत्कुवलयदलद्वैतमापादयन्तम्।
आतन्वानं भुजगशयने कामपि क्षौमगौरे
निद्रामुद्रां निखिलजगतीरक्षणे जागरुकाम् ॥ (बाल.१४)

अत्र विष्णोर्देहप्रभायाः सम्पर्केण क्षीराम्भोधिमध्यभागस्य नैल्यवणर्नात् तद्गुणालङ्कारः।

**रससौन्दर्यम्**

रसः सत्त्वगुणस्याधिक्याद् विभावादिसमूहेनाखण्डः स्वतः प्रकाशमानः सुखमयः, ज्ञानरूपः, वेद्यान्तरपुदार्थसम्पर्कशून्यः, ब्रह्मसाक्षात्कारसदृशः अलौकिकचमत्कारप्राणस्वरूपो भवति। रसोऽयं सहृदयैरात्माकृतिंवदभिन्नत्वेनानुभूयते (विश्वनाथः, ३/२)। विभावानुभावव्यभिचारिभिर्भावैः परिपुष्टो रत्यादिस्थायिभाव एव रसतामेति। तत्र काव्यनाट्ययो रतयाद्युद्बोधका विभावाः। विभावस्यालम्बनोद्दीपनाख्यौ द्वौ भेदौ। एवञ्चोद्बुद्धं

रत्यादिकभावं बहिःप्रकाशकोऽनुभावः कथ्यते। एवमेव साम्मुख्येन रसप्रकाशनार्थं सञ्चरणशीला भावा व्यभिचारिणः। तथैव रसानुभवाङ्कुरमूलरूपो भावः स्थायी निगद्यते (विश्वनाथः, ३/१७४) मूलरूपेणाचार्यैः शृङ्गारहास्यकरुणरौद्रवीरभयानक- बीभत्साद्भुतशान्ताश्चेति नवप्रकारका रसा मन्यन्ते।

चम्पूरामायणस्याङ्गी रसः करुण एव। काव्येऽस्मिन् तदतिरिक्तानामन्येषामपि रसानां प्रयोगः संलक्ष्यते -

**करुणः**

इष्टनाशादनभीष्टविषयप्राप्तेश्च करुणरसो भवति (विश्वनाथः, ३/२२२)। चम्पूरामायणं वाल्मीकिरामायणस्य सार इति भोजराजेन स्वयमेव स्वीकृतम्, अतोऽस्य काव्यस्याङ्गीरसत्वेन करुण एव विराजते। कविना ग्रन्थस्यारम्भ एव वाल्मीकिना प्रस्तुतं करुणरसमयं पद्यं यथावत् प्रस्तुतम् -

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ (बाल.६)

आदिकाव्योद्गमस्य मूलकारणं शोक एव। आनन्दवर्धनाचार्येणापि रामायणस्याङ्गी रस करुण एव स्वीकृतम् -

'रामायणे हि करुणो रसः स्वयमादिकविना सूत्रितः 'शोकः श्लोकत्वमागतः' इत्येवंवादिना। निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयता।'

**वीरः**

शत्रुपक्षस्य पराक्रमौदार्यदानशीलतादिगुणान् दृष्ट्वा तत्प्रशंसनं श्रुत्वा च तस्य प्रतिकाराय स्वमनसि प्रादुर्भूतादुत्साहाद् वीररसस्यानुभूतिर्भवति। चम्पूरामायणस्य बालकाण्डे रामेण स्वकीयबाहुबलप्रदर्शनेन धनुषि गुणारोपणेऽस्योत्साहभावस्याधिक्यप्रकाशनात् पाठका वीररसमनुभवन्ति, यथा -

रामे बाहुबलं विवृण्वति धनुर्वंशे गुणारोपणं
मा भूत्केवलमात्मना तिलकिते वंशेऽपि वैकर्तने
आकृष्टं नितरां तदेव न परं सीतामनोऽपि द्रुतं
भङ्गस्तस्य न केवलं क्षितिभुजां दोःस्तम्भदम्भस्य च ॥ (बाल.१०३)

**शृङ्गारः**

शृङ्गार मदनप्राप्तिकारणभूतो विद्यते। चम्पूरामायणस्य बालकाण्डे रामादीनां विवाहानन्तरं तेषां वधूभिः सहायोध्यां प्रत्यागनसन्दर्भे शृङ्गाररस्य प्रयोगः संलक्ष्यते -

लज्जावशादविशदस्मरविक्रियाभिस्ताभिवर्धूभिरतिपेलवमाप्तसौख्यान्।
इक्ष्वाकुनाथतनयान् प्रथमो रसानां तारुण्ययोगचतुरश्चतुरः सिषेवे ॥ (बाल.११६)

एवमेवात्र काव्येऽङ्गिरसरूपेण करुण एव विराजते परमस्याङ्गरूपेण तु वीर-शृङ्गार-शान्तप्रभृतीनां रसानामुपस्थितिर्दृश्यते। अतो रसप्रयोगदृष्ट्या काव्यमिदं सफलं प्रतिभाति।

**गुणसौन्दर्यम्**

काव्यस्याङ्गिरूपेण विद्यमानस्य रसस्य धर्मा गुणाः, एते आत्मनः शौर्यादय इव। गुणा अव्यभिचारेण रसस्य पोषका विद्यन्ते, एवञ्चैते रसस्योत्कर्षकारका एवेति (मम्मटः, ८/६६)।

चम्पूरामायणकाव्ये माधुर्यौजप्रसादाख्यानां गुणानां मध्ये माधुर्यं प्रसादश्च निरतिशयं दीव्यति। काव्ये प्राधान्येन प्रसादगुणस्य प्रयोगो दृश्यते। कतिपयेषु पद्येषु विद्यमानमोजोऽपि सहृदयानाह्लादयति।

**माधुर्यम्**

शृङ्गारादिरसनिष्ठं द्रुतिकारणमेव माधुर्यम् (मम्मटः, ८/७१)। माधुर्यं सम्भोगशृङ्गारापेक्षया करुणे, तदपेक्षया विप्रलम्भे, तदपेक्षया शान्ते सातिशयं सहृदयैरनुभूयते। समासरहिता अल्पसमाससहिता वा मधुरा रचना माधुर्यगुणस्य व्यञ्जिका। यथा -

तां नदीं विवुधा लब्ध्वा नागलोकमनीनयत्।
तपस्यन्तीं गिरिगौरीं देवाय महते ददौ ॥ (बाल.५७)

अत्र समासरहितानां मधुराणां रचनानां प्रयोगाद् माधुर्यगुणः।

**ओजः**

चित्तस्य दीप्ततायाः कारणमेवौजः। वीरबीभत्सरौद्रेषु रसेषूत्तरोत्तरमोजस आधिक्यं भवति। रेफेण युक्तो टवर्गः, शकारषकारौ, दीर्घसमासः, विकटा रचना च ओजोगुणव्यञ्जिका (मम्मटः, ८/६९)। यथा -

रामाकर्षणभग्नकार्मुकभुवा ध्वानेन रोदोरुधा
दृप्तक्षत्रयशः सतच्छदकुले जीमूतनादायितम्।
वीरश्रीप्रथमप्रवेशसमये पुण्याहघोषायितं
सीतायाः किल मानसे परिणये माङ्गल्यतूर्यायितम् ॥ (बाल.१०४)

अत्र रेफयुतानां शब्दानां दीर्घसमासानां च प्रयोगदर्शनात् ओजोगुणः।

**प्रसादः**

यथाऽग्निः शुष्कमिन्धनं सहसैव व्याप्नोति यथा वा जलं स्वच्छं पटं झटित्येव व्याप्नोति तथैव यो गुणश्चित्तं सहसैव व्याप्नोति, स एव प्रसादः (मम्मटः, ८/७०)। प्रसादगुणः सर्वेषु शृङ्गारादिरसेषु सर्वासु पदसंघटनरूपासु रचनासु व्यङ्ग्यव्यञ्जकभावेन तिष्ठति। यथा -

योगेन लभ्यो यः पुंसां संसारापेतचेतसाम्।
नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात् ॥ (बाल.३५)

अत्रासमसस्तरचना श्रुतिमात्रतोऽर्थबोधसामर्थ्ययुता संघटना दृश्यते। अतोऽत्र प्रसादगुणः।

एभिर्माधुर्योजप्रसादाख्यगुणैश्चास्य काव्यस्य बालकाण्डगतं सौन्दर्यपक्षं समेधितमस्ति।

**छन्दसः सौन्दर्यम्**

छन्दो वृत्तशब्देनाप्यभिधीयते। छन्दसा श्रुतिमाधुर्यमुत्पद्यते। छन्दःप्रयोगेणैव काव्यपठने श्रवणे च जनरुचिर्जागर्ति। सन्दर्भानुकूलानां छन्दसां प्रयोगः काव्यशोभां वर्धयति।

अस्मिन् चम्पूरामायणकाव्यस्य बालकाण्डे वार्णिकच्छन्दसां प्रयोगो दृश्यते। अस्मिन् काव्ये शार्दूलविक्रीडितम्, उपजातिः, वसन्ततिलका, इन्द्रवज्रा, द्रुतविलम्बितम्, उपेन्द्रवज्रा, पृथ्वी, अनुष्टुभ्, मालिनी, रुचिरा, मन्दाक्रान्ता, रथोद्धता, स्रग्धराचेति त्रयोदशसङ्ख्यकानां प्रसिद्धानां छन्दसामुपयोगो विद्यते। अस्य काव्यस्योपजीव्यकाव्ये वाल्मीकिरामायणे प्रायशोऽनुष्टुप्छन्दसः प्रयोगो दृश्यते। अत्र कविनाप्यनुष्टुप्छन्दसोऽधिकः प्रयोगो विहितः। अस्य काव्यस्य बालकाण्डे प्रयुक्तानां छन्दसां विवरणमत्र तालिकायां प्रदर्श्यते -

| क्र.सं. | छन्दसां नाम | श्लोकाः | सङ्ख्या |
|---|---|---|---|
| १. | शार्दूलविक्रीडितम् | २९, ४१, ४८, १०३, १०४, १०६, | ६ |
| २. | उपजातिः | १०, ४९, ९०, ९७ | ४ |
| ३. | वसन्ततिलका | १-५, ७, १२, १६, १८-२१, २७, ३८, ३९, ५०, ५२, ९४, ११२, ११५, ११६, | २१ |
| ४. | इन्द्रवज्रा | ११, २८, ३४, ९६ | ४ |
| ५. | द्रुतविलम्बितम् | २४ | १ |
| ६. | उपेन्द्रवज्रा | २५ | १ |
| ७. | पृथ्वी | १०५ | १ |
| ८. | अनुष्टुभ् | ६, २२, ३०-३३, ३५-३७, ४०, ४२-४४, ५१, ५४-८९, ९१-९३, ९८, १०१, १०२, १०७, १०८, ११०, ११४, ११७ | ६१ |
| ९. | मालिनी | ८, १७, ४५, ४६, ४७, ५३, ९९, १०९, १११, | ९ |
| १०. | रुचिरा | ९ | १ |
| ११. | मन्दाक्रान्ता | १३, १४, १५, २३, १०० | ५ |
| १२. | रथोद्धता | २६, ११३, | २ |
| १३. | स्रग्धरा | ९५ | १ |
| | | श्लोकसङ्ख्या | ११७ |

अत्रैतेषां छन्दसामेकैकेनोदाहरणमाध्यमेन परिचयः प्रस्तूयते -

**शार्दूलविक्रीडितम्** - शार्दूलविक्रीडितच्छन्दसि क्रमशो मसजसततगणा भवन्ति। अन्त्ये एको गुरुवर्णश्चागच्छति। एकोनविंशत्यक्षरात्मकेऽस्मिन् वृत्ते द्वादशाक्षरे सप्तमाक्षरे च यतिर्भवति (भट्टकेदार, २०३७, पृ.१२८)। अस्यैकमुदाहरणम् -

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि।

निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणे-
राविर्भूतमभूतपूर्वमपरं यत्किञ्चिदेकं महः।। (बाल.२९)

**उपजातिः** - यत्रोपेन्द्रवज्रायाश्चरणमिन्द्रवज्रायाश्चरणेन योगं प्रयाति तत्रोपजातिवृत्तम् (शर्मा, ई.१९५८, पृ.४१)। यथा-

छन्दोमयीनां निलयस्य वाचामन्ते वसन्तौ मुनिपुङ्गवस्य।
एतौ कुमारौ रघुवीरवृत्तं यथाक्रमं गातुमुपाक्रमेताम्।।(बाल.११)

**वसन्ततिलका** - यत्र तगणभगणौ जगणद्वयं पुनर्द्वौ गुरुवर्णौ भवेतां तत्र वसन्ततिलकावृत्तम् (क्षेमेन्द्र, ई.१९६८, पृ.१०९)। यथा -

लक्ष्मीं तनोतु नितरामितरानपेक्षमङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम्।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं विघ्नाद्रिभेदशतधारधुरन्धरं नः ॥ (बाल.१)

**इन्द्रवज्रा** - इन्द्रवज्रावृत्ते द्वौ तगणौ, एको जगणः, द्वौ गुरुवर्णौ च भवन्ति (क्षेमेन्द्र, ई.१९६८, पृ.१०९)। यथा -

अस्ति प्रशस्ता जनलोचनानामानन्दसंदायिषु कोसलेषु।
आज्ञासमुत्सारितदानवानां राज्ञामयोध्येति पुरी रघूणाम्।।(बाल.११)

**द्रुतविलम्बितम्** - द्रुतविलम्बितवृत्तस्यैकपादे क्रमेण नगणभगणौ भगणरगणौ च भवतः (गङ्गादास, ई.१९७६, पृ.५६)। यथा -

अवभृथेऽवसिते सरयूतटादथ यथायथमुच्चलिते जने।
दशरथः परिपूर्णमनोरथः पुरमगात्पुरुहूतपुरोपमाम्।।(बाल.२४)

**उपेन्द्रवज्रा** - उपेन्द्रवज्रावृत्ते जतजगणाः, द्वौ गुरुवर्णौ च भवन्ति (भट्टकेदार, २०३७, पृ.८७)। यथा -
अपाटवात्केवलमङ्गकानां मनोज्ञकान्तेर्महिषीजनस्य।
शनैः शनैः प्रोज्झितभूषणानि चकाशिरे दौहृदलक्षणानि।।(बाल.२५)

**पृथ्वी** - पृथ्वीवृत्ते क्रमशः जसजसयगणाः, एको लघुवर्णः, एको गुरुवर्णश्च भवन्ति। अत्र क्रमेण अष्टसु नवसु च वर्णेषु यतिर्भवति (गङ्गादास, ई.१९७६, पृ.५३)। यथा -

रवः कठिनकर्षणत्रुटितचापजन्मा क्षणा-
द्दिशां द्विरदधिङ्कृतैः कृतहरित्पतिस्वागतः।
जगद्भ्रमणकौतुकोच्चलितरामकीर्त्यङ्गना-
प्रयाणपटहध्वनिं प्रथयति स्म तारध्वनिः।।(बाल.२५)

**अनुष्टुभ्** - अष्टाक्षरसमायुक्तस्यानुष्टुब्वृत्तस्य सर्वेषु चरणेषु पञ्चममक्षरं लघुः, षष्ठमक्षरं गुरुः, द्वितीये चतुर्थे च चरणे सप्तममक्षरं लघुः, प्रथमे तृतीये च चरणे सप्तममक्षरं गुरुर्भवति (शर्मा, ई.१९५८, पृ.३०)। यथा-

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।। (बाल.२५)

**मालिनी** - ननमयययगणसहिता मालिनी भवति। अत्राष्टाक्षरैः सप्तभिरक्षरैश्च यतिर्भवति (ढकालः, २०६७, पृ.३०१)। यथा -

अथ सरसिजयोनेराज्ञया रामवृत्तं करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या।
शुभमतनुत काव्यं स्वादु रामायणाख्यं मधुमयभणितीनां मार्गदर्शी महर्षिः।।(बाल.८)

**रुचिरा** - रुचिरावृत्ते जभसरगगणा भवन्ति। अत्र चतुर्भिर्नवभिश्चाक्षरैर्यतिर्जायते (भट्ट, ई.१९९९, पृ.७३)। यथा-

उपागतौ मिलितपरस्परोपमौ बहुश्रुतौ श्रुतिमधुरस्वरान्वितौ।
विचक्षणौ विविधनरेन्द्रलक्षणौ कुशीलवौ कुशलवनामधारिणौ।। (बाल.९)

**मन्दाक्रान्ता** - मन्दाक्रान्ताछन्दसि मभनततगगगणा भवन्ति। अत्र चतुर्भिः षड्भिः सप्तभिश्चाक्षरैः यतिर्भवति (ढकालः, २०६७, पृ.३०५)। यथा -

सन्तापघ्नं सकलजगतां शार्ङ्गचापाभिरामं
लक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायम्।
वैकुण्ठाख्यं मुनिजनमनश्चातकानां शरण्यं
कारुण्यापं त्रिदशपरिषत्कालमेघं ददर्श।। (बाल.१३)

**रथोद्धता** - रथोद्धताछन्दसि रनरलगगणा भवन्ति (ढकालः, २०६७, पृ.२११)। यथा -

मन्दमन्दमपयद्वलित्रया गाधताविषयनाभिगह्वरा।
कोसलेन्द्रदुहितुः शनैरभून्मध्ययष्टिरपि दृष्टिगोचरा।। (बाल.२६)

**स्रग्धरा** - स्रग्धरावृत्ते म-र-भ-न-य-य-यगणा भवन्ति। अत्र त्रिबारं सप्तभिरक्षरैश्च यतिर्जायते (ढकालः, २०६७, पृ.२११)। यथा -

तिष्ठन् क्षत्रार्हवृत्तौ मुनिरगमदसावाश्रमं ब्रह्मसूनो-
रातिथ्यं तत्र लब्ध्वा निरवधि सुरभेः प्राभवादित्यवेत्य।
सा तेन प्रार्थिताभूत्तदनु मुनिवरे नाभ्युपेते चकर्ष
क्रोशन्तीं तां तयैव प्रचुरबलजुषा कान्दिशीको बभूव।।(बाल.२६)

अत्र वर्ण्यविषयानुकूलानां छन्दसां समुचितः प्रयोगः संलक्ष्यते। रसानुकूलानां विषयानुकूलानाञ्च छन्दसां संयोजनेनापि चम्पूरामायणकाव्यस्य सौन्दर्यं समेधितमस्ति।

**निष्कर्षः**

संस्कृतचम्पूकाव्यपरम्परायां कवेर्भोजस्य चम्पूरामायणकाव्यस्य विशिष्टं स्थानमस्ति। संस्कृतसाहित्येऽस्य कवेर्विशिष्टा प्रतिभा विराजते। अत्र गद्यपद्यमय्यां शैल्यां कविना रामकथा प्रस्तुता। वाल्मीकिना संरचितमध्यात्मरामायणमेवास्योपजीव्यं काव्यम्। रामायणस्य प्रत्यक्षेण प्रभावेणैवानेन एतत्काव्यं संरचितम्। अत्र बाल-अयोध्या-आरण्य-किष्किन्धा-सुन्दर-युद्धकाण्डानि सन्ति। षट्काण्डेषु विरचितेऽस्मिन् काव्ये रामजन्मत आरभ्य सीतया सह विवाहानन्तरम् अयोध्याप्रत्यावर्तनपर्यन्ता कथा संयोजिता विद्यते। अत्रानुप्रासश्लेषो-

पमोत्प्रेक्षारूपक- विरोधाभासादीनां शब्दार्थालङ्काराणामौचित्यपूर्वकं प्रयोगो दृश्यते। अत्रालङ्कारप्रयोगे कविना प्रयत्नो न विहितः, अत्र येऽलङ्काराः प्रयुक्ताः सन्ति, तेऽयत्नेनैव परिगताः प्रतीयन्ते। काव्येऽस्मिन् रसभावगुणालङ्कारादीनां काव्यतत्त्वानां समुचितो विन्यासः प्राप्यते। शब्दार्थालङ्काराणां कुशलेन संयोजनेनास्य महाकाव्यं सहृदयहृदयाह्लादकं प्रतीयते। अत्र ललितानां पदानां मञ्जुलः सन्निवेशो वर्तते। काव्यमिदं श्रुतिमधुरमानन्दसन्दोहप्रदायकञ्चानुभूयते। अस्मिन् काव्ये भामह-रुद्रट-दण्डि-मम्मट-विश्वनाथादिभिः पौरस्त्यकाव्यशास्त्रिभिः प्रतिपादितानामलङ्कार-रस-ध्वनि-गुण-रीति-छन्दसां च सान्दर्भिकं संयोजनं संलक्ष्यते। अस्य चम्पूकाव्यस्य बालकाण्डस्य पद्येषु काव्यसौन्दर्यं प्रचुरतरं विलोक्यते। विषयवस्तूनां सन्दर्भानुसारेणात्रालङ्काररसगुणछन्दसां च प्रयोगो विहितः संलक्ष्यते। अत्र संयोजितानि काव्यतत्त्वानि काव्यस्य सौन्दर्यपक्षं भावपक्षं च परिपोषयितुं सार्थकाः संलक्ष्यन्ते।

**सन्दर्भग्रन्थसूचीः**

अप्पयदीक्षितः (ई.१९७६), *कुवलयानन्दः*, (व्या.भोलाशङ्करव्यासः), चौखम्बाविद्या भवन।

आनन्दवर्धन (ई.२००६), *ध्वन्यालोकः*, चौखम्बा संस्कृत सिरिज अफिस।

उपाध्याय, बलदेव (ई.१९९२), *संस्कृत साहित्य का इतिहास* (दशम सं.), शारदा निकेतन।

कृष्णकुमार (ई.१९९८), *अलङ्कार शास्त्र का इतिहास* (पं.सं.), साहित्यभण्डार।

क्षेमेन्द्रः (ई. १९६८ ), *सुवृत्ततिलकम्*, चौखम्बा संस्कृत सिरिज अफिस।

गङ्गादासः (ई.१९९७ ), *छन्दोमञ्जरी*, ष.सं., चौखम्बा संस्कृत सिरिज अफिस।

जयदेव (ई.१९९९), *चन्द्रालोकः*, चौखम्बा सुरभारती प्रकाशन।

ढकाल, वेणीमाधव (२०६७), *काव्यदीपिका*, (दो.सं.), विद्यार्थी पुस्तक भण्डार।

दण्डी (ई.१९९७), *काव्यादर्शः*, चौखम्बा विद्याभवन।

भट्ट, केदारः (२०३७), वृत्तरत्नाकरः, ष.सं., चौखम्बा संस्कृतसंस्थान।

भोजराजः (ई.१८२०), *चम्पूरामायणम्*, (टीका-रामचन्द्रबुधेन्द्र), काशीनाथ पाण्डुरङ्ग परव।

.......... (ई.२०१९), *चम्पूरामायणम्*, (टीका-रामचन्द्रमिश्र), चौखम्बाविद्याभवन।

...........(ई. १९३४), *सरस्वतीकण्ठाभरणम्*, (टीका-रामसिंह), पाण्डुरङ्ग जावजी।

मम्मटः (ई.१९९४), *काव्यप्रकाशः* (द्वि.सं.), (व्या. - वासुदेव शास्त्री अभ्यंकर), चौखम्बा विद्याभवन।

मिश्रः, रामचन्द्र (ई.२०१०), *संस्कृतसाहित्येतिहासः*, चौखम्बाविद्याभवन।

राजपुरोहित, भगवतीलाल (ई.१९९०), *राजा भोज का रचना विश्व*, पब्लिकेसन स्किम।

राजवंश सहाय ‘हीरा’ (ई.१९७०), *अलङ्कारानुशीलन*, चौखम्बा विद्याभवन।

.......... (ई.२००२), *संस्कृत साहित्य-कोश* (च.सं.), चौखम्बा विद्याभवन।

विश्वनाथः (ई.१९९५), *साहित्यदर्पणः* (पञ्चम सं.), कृष्णदास अकादमी।

शर्मा, वसन्त (ई. १९५८ ), *वृत्तमञ्जरी*, चौखम्बा विद्याभवन।

# वेङ्कटेशकृतन्यायसूत्रालोचनस्य पर्यालोचनम्

**लक्ष्मण आचार्यः**
उपप्राध्यापकः,
ने.सं.वि.वाल्मीकिविद्यापीठस्य
Email: laxmanac.42@gmail.com

**लेखसारः**

आलेखेऽस्मिन् श्रीमता वेङ्कटेशेन गौतममहर्षेः न्यायसूत्राणां याऽऽलोचना न्यायपरिशुद्धिनामके ग्रन्थे विहिताऽस्ति तस्या एवालोचनाया यथाशक्यमध्ययनमत्र मया विहितं वर्तते। यतो हि को नाम दर्शनजगति न्यायदर्शनस्य वैशिष्ट्यं नाभिजानाति ? अथापि किमर्थं न्यायसूत्राणामालोचना कर्तव्याऽभूत् वेङ्कटेसशाय ? इति या कुतूहलता मनसि जायते तस्या उपशमनार्थमत्र मया तस्य अध्ययनं कृत्वा वेङ्कटेशस्य गौतमसूत्राणामुपरि विहित आलोचनाप्रकारः, तस्योपयुक्तत्वानुपयुक्तत्वादि च सर्वं पर्यालोच्य अयमालेखः सज्जीकृतो वर्तते। वेङ्कटेशप्रदर्शितस्य तदीयपक्षस्य स्वीकार–अस्वीकाररीत्योश्च अध्ययनमत्र मया विहितं वर्तते। गुणात्मकशैल्यां सज्जीकृतेऽस्मिन् आलेखे च निगमनात्कविधेरुपयोगो विहितो वर्तते। सामग्रीसंकलनार्थं पुस्तकालयीयविधेरुपयोगेन साकं विषयस्य स्फुटतरप्रतिपत्तये विदुषां परामर्शस्य चोपयोगो विहितो वर्तते।

**शब्दकुञ्जिका**– आन्वीक्षिकी, प्रमाणशोधनम्, परिशोधनरीतिः, वेदोपाङ्गत्वम्, स्वीकारास्वीकारप्रदर्शनरीतिः।

**विषयप्रवेशः/पृष्ठभूमि**

महर्षिगौतमप्रणीतस्य न्यायशास्त्रस्य सर्वविद्योतमत्वं को न जानाति दर्शनजगति ? न्यायदर्शनस्य विशिष्टं स्थानं जानद्भिः पराशर–याज्ञवल्क्य–मनुप्रभृतिभिः महर्षिभिरत एवास्य दर्शनस्य विद्यास्थाननिरूपणावसरे पृथक् ग्रहणं कृतं वर्तते। श्रीमद्भागवते प्रह्लादचरित्रे, श्रीकृष्णस्य विद्याध्ययनकाले च वर्णितकथायामपि आन्वीक्षिक्यपरनामधेयस्यास्य दर्शनस्य सादरं नामग्रहणं कृतं प्राप्यते। एतावता किं ज्ञायते इति चेत् न केवलं बाह्यपदार्थानां विश्लेषणे न्यायशास्त्रं स्थिरं वर्तते अपितु न्यायशास्त्रस्यापि प्रयोजनं वदता महर्षिणा गौतमेन निःश्रेयसप्राप्तिरेव मुख्यप्रयोजनमिति प्रथमसूत्रतः कण्ठत एव संसूचनात्, सर्वविद्योत्तमस्य न्यायदर्शनस्याऽऽलोचनं किं वा महर्षिगौतमोपज्ञानां न्यायसूत्राणां खण्डनं न तावत् सहजम्, अथापि न्यायसूत्रानधिकृत्यैव वेङ्कटेशेन विदुषा न्यायपरिशुद्धिग्रन्थस्य न्यायसूत्राणामालोचनपरकतया निर्माणं कियद् न्याय्यमिति मनसि

जिज्ञासा जागर्ति एव। उक्तालोचनञ्च वस्तुतः किमुद्देश्यकमस्तीत्यपि अवश्यमेव ज्ञेयमिति कृत्वा वेङ्कटेशकृतस्य न्यायसूत्राणामालोचनस्य अध्ययमत्र मया कृतं वर्तते। जयन्तभट्ट–उद्योतकरप्रभृतयो विद्वांस इमं गौतमोपज्ञं न्यायदर्शनं बहु प्रशंसन्ति। न केवलमेते अपितु काणादादिदर्शनमिव न्यायदर्शनस्य खण्डनीयत्वं नास्तीति जानन् श्रीवेदव्यासोऽपि खण्डनीयत्वेन न्यायदर्शनं साक्षान्न निर्दिशति वेदान्तसूत्रे। इदं सर्वं दृष्ट्वा किं ज्ञायते इति चेत् न्यायदर्शनस्य स्थानं नूनं महनीयं वर्तते। इदं च तथ्यं स्वयं वेकटेशोऽपि प्रकटयति तत्र तत्र। अथापि तद्वारा कृतं न्यायसूत्राणामालोचनं किं निमित्तकमिति प्रश्नो जागर्ति पुनः।

इदानीन्तनानि गौतममहर्षिप्रणीतत्वेन ज्ञातानि सर्वाण्यपि न्यायसूत्राणि सर्वथा वैदिकमतानुकूलानि न सन्तीति वैदिकमतविरूद्धतया स्थितानां तेषां सूत्राणां संशोधनमुखेनैव मुमुक्षुभिः ग्रहीतुं शक्यानि भवन्तीति मन्वानेन वेङ्कटेशेन विरूद्धांशानामालोचना तत्र कृतास्तीति निश्चीयते। नो चेत् न्यायशास्त्रस्य वेदप्रामाण्यवादित्वकथनं एकदेशिसत्यता एव स्यात्। यतो हि तत्रत्याः बहवो विषया वैदिकमार्गानुकूला न सन्तीति साक्षात् सूत्रदर्शनेनैव ज्ञायते। वेदप्रामाण्यवादिना न्यायशास्त्रेण च वैदिकमार्गं विहाय न कस्मिन् अपि अंशे गन्तव्यमासीदिति श्रीवेङ्कटेशस्य आशयो ज्ञायते। न्यायसूत्राणि सर्वथा अनालोच्यानि भवन्तीति तु सर्वथा न वक्तुं शक्यमेव दर्शनजगति। अत एव न्यायभूषणकारप्रभृतिभिरपि पश्चकालिकैः कतिपयैराचार्यैः कतिपयस्थलेषु गौतममतस्य आलोचना विहिता दृश्यते। विशिष्टाद्वैतसम्प्रदायस्थैः कतिपयपूर्वाचार्यैरपि तत्तत्स्थलेषु न्यायदर्शनस्य खण्डनं विहितं वर्तते इति च स्वयमेव वेङ्कटेशो निर्दिशति न्यायपरिशुद्धौ। परन्तु भाष्यकार–उद्योतकरप्रभृतिभिः पश्चकालिकैः न्यायदर्शनसमुद्धारकैराचार्यैः बौद्धादिगोष्ठीतो न्यायदर्शनस्य संरक्षणेऽपि बहुषु विषयेषु यत्र तथाव्याख्याने अकृतेऽपि संभवति स्म तत्रापि प्रकृतन्यायदर्शनस्य स्वरूपमन्यथाकृतमिति अस्य आरोपो वर्तते। कतिपयस्थले सूत्राणां वेदानुकूलार्थनिर्वाहनबलादपि सूत्राणि व्याख्यातुं शक्यन्ते स्म। यत्र सर्वथा विरोधः प्रतीयते तत्रान्यार्थपरिकल्पनेनापि निर्वाहः सम्भवप्रायम्, परन्तु तत्रापि न्यायसूत्रव्योख्यातृभिः भाष्यकार–वार्तिकार–जयन्तभट्टप्रभृतिभिस्तथा न कृतमिति तु तथ्यम्। एवञ्च गौतमीयन्यायसूत्राणामत्र परिशोधनोद्देश्येन उक्तपरिशुद्धिग्रन्थस्य आगतत्वात् परिशुद्धिकारकृतालोचनप्रकारोऽत्र विशेषतो विचिन्त्यते अग्रे। न्यायदर्शनस्य बहुषु विषयेषु एकैकं विषयमधिकृत्य पूर्वाचार्यैरर्वाचीनैश्च विद्वद्भिः विषयस्य चिन्तनकरणेऽपि वेङ्कटेशकृतस्य न्यायसूत्रालोचनस्य पर्यालोचनं कैश्चिदपि न कृतमस्तीति मत्वा एतद्विषये केषांचिदपि पूर्वसम्पादितानां लेखानां शोधग्रन्थानां वा दृष्ट्यगोचरीभूतत्वेन नूनमयं विषयो मत्कृते नूतनो वर्तते इति विभावयामि। वस्तुतोऽयं विषयः शोधस्य विषयोऽस्ति। यतो वेङ्कटनाथेन परिशुद्धिग्रन्थे गौतमीयपदार्थानां शोधनमुखेन यद् आलोचनं किंवा तेषां शोधनीयत्वस्य अत्यावश्यकत्वं प्रदर्शितमस्ति तस्य समग्रतः पर्यालोचनमप्येकोऽनुसन्धानस्य विषयो भवितुमर्हतीति मत्वा अहमेव विषयेऽस्मिन् शोधकार्यं कर्वन्नस्मि। तदंगत्वेनैव अयमालेखो मया सज्जीकृतोऽस्त्यत्र। आलेखेऽस्मिन् मया सामान्यतः इदमित्थं स्यादिति प्राक्कल्पना सम्भाविता वर्तते। परिशुद्धिग्रन्थस्थविषयान् आदाय लेखाश्च प्राप्यन्ते। उक्तसमग्रग्रन्थमादाय एकः शोधप्रबन्धोऽपि मया प्राप्तो वर्तते परन्तु यो विषयः तत्र मया अनुसन्धानस्य विषयत्वेन गृहीतो वर्तते तस्मिन् विषये ते ते लेखाः केन्द्रिता न दृश्यन्ते, अतो नूनमयं विषयो मत्कृते अनुसन्धेयार्होऽक स्तीति तदंगत्वेनैव अयमालेखो वर्तत इति विनिवेद्यते।

**समस्या/शोधप्रश्नः**

न्यायपरिशुद्धिग्रन्थे गौतमीयसूत्राणां शोधनीयत्वसन्दर्भे एताः समस्या दृग्गोचरीभवन्ति–

क– गौतमीयसूत्राणामालोचनस्य बीजं किम् ?

ख– वेंकटेशद्वारा गौतमीयसूत्राणामालोचनकरणम् समुचितं न वा ?

एतत्प्रभृतयः समस्या अत्र स्वस्य आलेखस्य मुख्यप्रश्नत्वेन/समस्यात्वेन वर्तन्ते

**अध्ययनोद्देश्यम्**

न्यायपरिशुद्धिकारेण गौतमीयसूत्राणां कृतालोचनस्य परिशीलनेनाधोनिर्दिष्टानां समस्यानां समाधानकरणमेव आलेखस्यास्य प्रमुखमुद्देश्यमस्ति।

क– गौतमीयसूत्राणामालोचनस्य बीजान्वेषणम्।

ख– वेंकटेशकृतगौतमीयसूत्रालोचनस्य पर्यालोचनम्।

**शोधविधिः, क्षेत्रम्, सीमाङ्कनं च**

आलेखेऽस्मिन् आवश्यकसामग्रीणां सङ्कलनाय मुख्यत्वेन पुस्तकालयीयाऽध्ययनविधेरेवाऽवलम्बनं कृतमस्ति। उपर्युक्तविधिद्वारा संकलितसामग्रीणामध्ययनेन वस्तुनिष्ठं चिन्तनं सम्पाद्य तत आवश्यकतानुसारेणाऽधुनिक–वैज्ञानिकाऽगमनात्मक–निगमनात्मकविध्योरवलम्बनं कृत्वा अयमनुसन्धानात्मक आलेखः सम्पादितो विद्यते।

आलेखे च न्यायपरिशुद्धिकारप्रदर्शितयोः प्रमाणानां स्वीकार–अस्वीकारपक्षयोश्च विचार्यमाणत्वाद् दर्शनशास्त्रस्य क्षेत्रमर्यादां, प्रयोजनं चानतिक्रम्य प्रमाणसम्बद्धानां न्यायवेदान्तादिग्रन्थानामालेखानां चाध्ययनेन उक्तविषयस्य चिन्तनीयत्वात् तत्सम्बद्धा ग्रन्था आलेखाश्च मम अनुसन्धानात्मकालेखस्य क्षेत्रत्वेन सीमात्वेन च निर्धारिताः वर्तन्ते।

**अध्ययनस्यौचित्यम्**

कस्यापि विषस्य अध्ययनेन कतिपयविषयेषु नव–नव विषयाः सहजरूपेण समुपस्थिता भवन्ति। विशेषतोऽनुसन्धानकार्ये अनुसन्धीयत्वेनोपस्थापितस्य विषयस्य च नूनमेव कामपि समस्यामधिकृत्यैव विषयाणां प्रस्तोतव्यत्वेन तस्य समस्यासमाधानमूलकतयैव विस्तृतमध्ययनमग्रे वर्धते। प्रकृतेऽपि वेङ्कटेशस्य न्यायसूत्राणालोचनसन्दर्भे कतिपयाः प्रश्ना मनसि जाग्रति। प्रश्नस्य निराकरणं च तस्य विशेषाध्ययनेन भवति। तथा सत्येव याथार्थ्येन वस्तुतत्वस्य ज्ञानं भवितुमर्हति, येन चास्माकं प्रयोजनमपि पूरितं भवति। गौतमीयन्यायदर्शने च पदार्थानां चिन्तनं यद्यपि सूक्ष्मातिसूक्ष्मरूपेण सम्यक्तया विहितं वर्तते। तथाऽपि वेदोपांगभूतेन न्यायदर्शनेन सर्वथा तदनुकूत्वेन भाव्यमित्यादयो वेङ्कटनाथद्वारा उपस्थापिताः केचन पक्षा अत्र अवश्यं विचारणीयाः प्रतीयन्ते। अत आलेखेऽस्मिन् यथाशक्यमयं विषयः सम्यक्तया विचिन्त्यते इति। अनेन अध्ययनस्यास्य औचित्यमपि स्फुटमवगतं भवति ।

**सैद्धान्तिकपर्याधारः**

विषयोऽयं विशुद्धः शास्त्रीयो वर्तते अत एतद्विषयसम्बद्धानां ग्रन्थानां पत्रपत्रिकाणामेवात्राधारत्वेन वर्तमानत्वादेतद्विषयसम्बद्धा ग्रन्थाः पत्रपत्रिकाणि च लेखस्यास्य पर्यालोचने आधारभूतानि भवन्ति।

**वेङ्कटेशप्रदर्शितपदार्थशोधन–आलोचनयोः प्रकारः**

श्रीमता वेङ्कटेशेन न्यायपदार्थशोधनोद्देश्येन विरिचते न्यायपरिशुद्धिनाम्नि ग्रन्थे गौतमर्षिप्रणीतानि न्यायसूत्राणि त्रिषु विभज्य तत्र आवश्यकांशानां परिशोधनप्रकारः प्रदर्शितो विद्यते। वेदस्य शिरोभागभूतानामुपनिषदामर्थनिर्णयार्थं महर्षिवेदव्यासेन विरचितानां परमप्रामाण्यभूतानां ब्रह्मसूत्राणाम् अत्यन्तानुकूलानि यानि सूत्राणि सन्ति तानि च सर्वाण्यपि सूत्राणि विना परिवत्र्य स्वीकृतानि सन्ति चेत् येषां सूत्राणां किञ्चिन्मात्रं तात्पर्यपरिवर्तनेन पूर्णं वैदिकमतानुकूलत्वं सम्पादयितुं शक्यते तेषां सूत्राणामपि स्वरूपपरिवर्तनमकृत्वैव यथास्वरूपमभितमेव। परन्तु यानि सूत्राणि सर्वथा वैदिकमतविरूद्धानि सन्ति तेषां तेषां सूत्राणामवश्यशोधनीयत्वमिति मत्वा शोधनप्रकारप्रदर्शनेन साकं शोधितन्यायः कीदृशः ? इति प्रदर्शितो विद्यते। यथा– प्रमाणशब्दस्य भावे करणे च व्युत्पत्तिमाश्रित्य उभयविधव्युत्पत्यनुरोधेन प्रमाणशब्दस्य व्युत्पत्तिकरणेऽपि तेन वेदविरुद्धार्थाप्रतिपादनात् तत्र स्वस्यापि संमतिः प्रकटिता। लोकव्यवहारसिद्धः प्रमाणशब्दश्च यद्यपि प्रमितिपरः। इदं प्रमाणम्, इदं चाप्रमाणमिति ज्ञानस्य प्रामाण्यमादाय लोकव्यवहारात्। अतो वेङ्कटनाथो परिशुद्धेः प्रारम्भे प्रमाणाप्रमाणयोः व्यवस्थापनप्रदर्शनसन्दर्भे प्रमाणस्य प्रामाण्यपरीक्षणीयत्वसन्दर्भमादाय बहु विचारयति प्रमाणपदार्थम्। न्यायसूत्रकारेण पूर्वं प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इत्युक्त्वा प्रमाणपरकतया प्रमाणशब्दस्य प्रयोगः कृतश्चेत् ततः सद्यः प्रत्यक्षलक्षणे इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यम् अव्यभिचारीत्यादिना कीदृशस्य प्रत्यक्षस्य प्रामाण्यं भवतीति स्पष्टीकृतम्। तदर्थमेव चाव्यभिचारीति पदं तत्र। इन्द्रियार्थसन्निकर्षेण उत्पन्नं ज्ञानं तदेव प्रत्यक्षमुच्यते यदव्यभिचारि भवतीत्यर्थप्रकटनेन एवंविधस्य प्रत्यक्षस्यैव वस्तुतः प्रमात्वमिति फलितं भवति। एवं च एवंविधायाः प्रत्यक्षात्मकप्रमायाः करणत्वेन इन्द्रियाणि प्रत्यक्षप्रमाणानीत्युच्यन्ते। अनेन च करणभूतानामिन्द्रियाणामपि अर्थवत्वे प्रमाणभूतं ज्ञानमेव हेतुरिति वस्तुतः कारणीभूतस्य प्रमाणस्य प्रमाणत्वे परीक्षणीयेऽपि मुख्यपरीक्षणीयत्वं शोध्यत्वं वा प्रमितेरेव। अस्य कथनस्य तात्पर्यमिदमस्ति यत् न्यायपरिशुद्धिग्रन्थो न्यायदर्शनोक्तप्रमाणानां विशेषतः परिशोधनपरक इत्युक्ते अत्र प्रमाणपदेन न्यायदर्शने प्रसिद्धानां प्रत्यक्षानुमानोपमानशब्दभूतानां केवलं परिशोधनं न, अपितु प्रमाणस्य प्रमितिपरकत्वेन प्रमितेरपि शोध्यत्वमत्रेति सन्दर्शनाय स्वयमादौ ग्रन्थे प्रमाणाप्रमाणयोः व्यवस्थापनप्रदर्शनमुखेन ग्रन्थं विस्तारयति परिशुद्धिकारः। इदं सर्वं विचार्य एवायं गौतमीयसूत्राणां स्वीकार–अस्वीकाररीति–विरोधपरिहार–न्यायदर्शनाधिकारीत्यादीनां निरूपणानन्तरं सद्य एव प्रमाणप्रमाणयोः व्यवस्थापनं विधायान्ते **द्विधापि प्रमितिरेव शोध्ये**ति निष्कर्षयति (वेंकटेशः, ई.२००३ : पृ.१९)। तदनन्तरं प्रमितिमेव लक्षयन् वदति– वयं तु बूरमः– **यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमा** (ई.२००३ : पृ.१९) इति। गौतमदर्शने आत्मशरीरेन्द्रियार्थेत्यादिना प्रसिद्धानां द्वादशविधानां प्रमेयानां समानतन्त्रसिद्धे वैशेषिकदर्शने च द्रव्यगुणकर्मेत्यादिरूपेण प्रतिपादितानां प्रमेयानां शोधनस्य लघुरूपप्रकारः पंचमे अध्याये प्रदर्शितश्चेत् शोधितानां प्रमेयानां स्वरूपं च कीदृशं भवतीत्यस्य प्रदर्शनं विस्तरशो न्यायसिद्धांजनेऽपरे विपुले ग्रन्थे अनेनैव विहितम्।

एवं प्रमाणप्रमेयादिभिन्नत्वेन पठितानां संशयादीनां स्वरूपकथनेऽपि न तावान् लम्बायमानं "समानानेकधर्मोपपत्तेः विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षः संशयः''(न्या.सू.१.१.२३) इत्यादिक-

थनम् अपितु "अव्यवस्थितव्यवहारकारणं ज्ञानं संशयः। अयथाज्ञानकारणं ज्ञानं च विपर्ययः" (वेङ्कटेशः, ई.२००३ : पृ.४)। इत्येवंरीत्या सूत्रस्य अल्पाक्षरत्वनियमं संस्मृत्य क्वचित् सूत्रस्वरूपपरिवर्तनमपि कर्तुं शक्यम्, यत्र तु वेदानुकूलानि सूत्राणि न सन्ति तानि तु अवश्यमेव त्याज्यानि, अथवा संशोधनीयानि। इत्येवंरीत्या वेदाविरूद्धार्थतयैव प्रमाणादिपदार्थानां शोधनमावश्यकमिति तत्र तत्र प्रकटयति वेङ्कटेशः।

**वेङ्कटेशस्य न्यायसूत्राणामालोचने हेतुः**

श्रीमता वेंकटाचार्येण परिशुद्धेः प्रारम्भे एव मूलभूतन्यायदर्शनस्य स्वरूपं पूर्वं वस्तुतो विशुद्धवैदिकमताविरूद्धमासीदिति सूचितमस्ति। मूलभूतस्य न्यायदर्शनस्य वैदिकमताविरूद्धत्वादेव विद्यास्थानेषु अस्य सादरं नामग्रहणं, तदपि विस्तरपदयोजनेन साकम्। परन्तु तदानीन्तने काले जैनबौद्धादिदर्शनयोः प्रभावात् यदा महर्षिणा गौतमेन न्यायदर्शनस्य उद्धारः कृतः तदात एव तेषामेव प्रभाववशाद् स्यात् न्यायदर्शनस्य किंचित्स्वरूपपरिवर्तनं विधाय यथा वैदिकानां रक्षणं भवेत्, यथा चेदं दर्शनं वैदिकमतस्य अत्यन्तविरूद्धं न गच्छेत् तदनुरूपतया तदनुकूलानि सूत्राणि संरचय्य लुप्तप्रायस्य न्यायदर्शनस्य स्वरूपं महर्षिणा अनेन सर्वेषां पुरतः संस्थापितमिति संभावयति अयम्। न्यायपरम्परायामाबद्धविदुषां जैनबौद्धादिदर्शनाचार्यैः सह बहुकालपर्यन्तं जायमानेन संघर्षेणेदं तथ्यं स्फुटमपि भवति। दशमशताब्द्यां जातस्य न्यायाचार्योदयनस्य कालपर्यन्तमयं न्यायबौद्धदर्शनयोः संघर्षो दृग्गोचरीभवति। परन्तु विद्यास्थानीभूतस्य अस्य दर्शनस्य वास्तविकं स्वरूपं किंचिद् भिन्नमेव आसीदिति अयं न केवलं स्वीयमनसा एवमेव कल्पयति अपितु तत्पूर्वाचार्यैः नाथमुनि–यामुन–प्रभृतिभिः वैदिकन्यायदर्शनस्य स्वरूपप्रदर्शनपरकतया लिखितस्य न्यायतत्व–न्यायरक्षादिग्रन्थानामध्यनेनेदं तत्थ्यं स्फुटं भवतीति अयं मनुते। **भगवन्नाथमुनिभिर्न्यायतत्त्वसमाह्वया...न्यबन्धि न्यायपद्धतिः** (वेङ्कटेशः, ई.२००७ : पृ.१४) इत्यादिना ग्रन्थस्य प्रारम्भे एव इदं निर्दिशति। विशिष्टाद्वैतत परम्परायां बहवो विद्वांसो न्यायमधिकृत्य ग्रन्थान् निर्मितवन्त आसन् इति च विशिष्टाद्वैतपरम्परातो ज्ञायते। परन्तु ते सर्वे इदानीं लुप्ताः। श्रीवेंकटाचार्यस्य काले एव लुप्तप्रायानां तेषां ग्रन्थानामपि शास्त्राध्ययनपरम्परातो मात्रं कर्णगोचरीभूतानां कतिपयपङ्तीनामुल्लेखमयमपि करोति। तान्नुपजीव्यैव वस्तुतो वेंकटाचार्यो न्यायसूत्राणामालोचनं न्यायमतपरिशोधनप्रकारं वा प्रदर्शयति। अत्र स्वीयाः विशिष्टतर्कपूर्णाः युक्तयोऽपि द्रष्टुं शक्यन्ते। पश्चकालिकैराचार्यैः वात्स्यायन–उद्योतकर–प्रभृतिभिः जैनबौद्धादिदर्शनाचार्यैः सह कृतखण्डनमण्डनपरम्परातः तैरेव न्यायदर्शनमिदं वैदिकमतादत्यन्तं दूरमानीतमिति च विभावयत्यम्। अस्य चार्थस्य संकेतो ग्रन्थस्य प्रारम्भे एव कृतवान् अस्ति– **स च विल्पावितस्तैस्तैः ततोऽत्र परिशोद्ध्यते** (वेङ्कटेशः, ई.२००३ : पृ.१) इति।

वेङ्कटेशोऽयं न्यायपरिशुद्धिग्रन्थस्य आरम्भे एव अक्षपादगौतमर्षेः ऋषित्वेन तत्प्रणीतस्य शास्त्रस्य अतामसत्वेन च कथं तदीयसूत्राणां खण्डनीयत्वमिति शंकामुद्भाव्य अन्यकणादादि–ऋषीणामपेक्षया अस्मिन् श्रद्धातियशायित्वं प्रकटयति **यद्यपि कथञ्चिदाक्षपादं सत्पक्षे निक्षेप्तुं शक्यम्...** इत्यादिग्रन्थसन्दर्भेण (वेङ्कटेशः, ई.२००३ : पृ.२ ) तथापि आर्षत्वादेव तदीयसूत्राणि अखण्डनीयानि इत्यपि न वक्तुं शक्यते। आर्षत्वेऽपि तदीयं मतं वेदविरूद्धमिति वेदविरूद्धत्वहेतुना वेदैकपक्षपातिभिः तन्मतखण्डनेपि न दोष इति श्रीवेदव्यासेन ब्रह्मसूत्रे काणादकापिलादिमतानां कृतखण्डनदृष्टान्तेन स्वात्मानं रक्षयति। अनेन च

ऋषिप्रोक्तत्वमखण्डनीयत्वे हेतुर्न भवतीति आगतं भवति। **काणादशाक्यपाषण्डैः त्रयीधर्मो विलोपितः** ... इत्यादिमनुवाक्यसमुद्धरणेन च गौतमर्षेरपि तथासम्भाव्यतां दर्शयति। (तत्रैव)

**यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगदो जगाद।**

**कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया प्रबन्धः॥**(भारद्वाजः, ई.१९९७ : पृ.१)

**अथ जगदेव दुःखपंकनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय** (वाचस्पतिः, ई.१९९० : पृ.३), (गदाधरः, ई.१९९२ : पृ.७) इत्यादिभिः वचनैः गौतमर्षेः सर्वज्ञत्व–कारुणिकत्वादिधर्ममात्रं परिलक्ष्यन्ते, अथवा तत्पक्षपातित्वेन तदीयैर्जनैः मुनौ तस्मिन् श्रद्धातिशायित्वं प्रदर्श्यते इत्येव मन्तव्यम्, न तु तस्याखण्डनीयत्वं तेन वक्तुं शक्यते। यतः **काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितरि**त्यादिस्मृतिभिः, **बहवो पुरुषा राजन् सांख्ययोगविचारिणः ...समासेन तु तद्व्यासः पुरुषैकात्म्यमुक्तवान्**(महाभारतम्) **काणादमाक्षपादं वा कापिलं तन्त्रमेव वा। तन्त्राण्येतानि सर्वाणि न तन्त्राण्यात्मनिर्णये** इति पूर्वाचार्यैश्च तथाकथनात् मुन्युक्तवेदविरुद्धार्थो वैदिकानां कृते खण्डनीय एवेति वेङ्कटेशेन संस्थापितो न्यायपरिशुद्धौ (ई.२००३ : पृ.३)। एवंरीत्या वैशेषिकादिशास्त्राणामपेक्षया गौतमोपज्ञस्य न्यायशास्त्रस्य वैशिष्ट्यसत्वेऽपि वेदविरुद्धांशे तत् त्याज्यमेवेति स्थापितम्।

## ९. वेङ्कटेशकृतन्यायसूत्रालोचनस्य पर्यालोचनम्

गौमतमीये न्यायदर्शने शोधनीया अंशा बहवः सन्तीति वेंकटाचार्यो मनुते। केचन अंशाः तादृशा अपि सन्ति ये अनावश्यकाः अधिकाश्च। तस्य स्वरूपमुपर्येव प्रदर्शितमस्माभिः। शास्त्ररीत्या यदि वस्तूनां चिन्तनं कूर्मश्चेत् **मानाधीना मेयसिद्धि**रिति न्यायात् सर्वप्रथमं प्रमाणस्य स्वरूपमवश्यं वक्तव्यम्। व्यवहारसम्पादनार्थं च प्रमाणस्य व्यवस्थाऽर्थात् इदं प्रमाणं भवति, इदं चाऽप्रमाणमिति व्यवस्था अवश्यमेव सम्पादनीया भवति। नो चेत् प्रमेयाणां याथार्थ्येन व्यवस्थापनं न भवत्येवेदं तु सर्वविदितो विषयः। परन्तु प्रमाणानां व्यवस्थापनं तार्किकं यथा भवेत् तथा करणीयम्। तर्कोऽपि वेदानुकूलो भवेत् **वेदशास्त्राविरोधिना यस्तर्केणानुसन्धत्ते** (मनुः, १२/१०६) इत्यादिना मनुना स्मरणात्। यद्यपि तर्कस्यापि प्रमाणापेक्षितत्वेन तर्केण णापि प्रमाणमपेक्षते। प्रमाणमपि पुनः तर्कमपेक्षते इति अन्योन्याश्रयो भाति। तथापि **सिंहवनगुप्ति**न्यायेन परस्परमुभयोः उभयापेक्षत्वेन, तर्कस्य च प्रमाणानुग्राहकत्वसिद्धान्तितत्वात् परमप्रमाणभूतवेदानुग्राहकब त्वेऽपि तर्कस्य वेदाविरोधित्वेनैव भाव्यमिति आस्तिकस्य वेदप्रामाण्यवादिनो न्यायशास्त्रस्यापि वेदोपांगत्वेन शास्त्रस्यास्य स्वरूपं वैदिकपक्षविरूद्धतया न भवनीयमेव। वैदिकपक्षाविरूद्धत्वेनैव स्वरुपं पूर्वमस्य शास्त्रस्य वस्तुगत्या सत्वेन अत एव आत्मविद्याऽभिन्नत्वेन कथनमस्य श्रीमद्भागवतमनुस्मृत्यादिषु दृश्यते। **विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णवात्** (श्रीमद्भागवतम्, १०.२४.४) इत्यत्र आन्वीक्षिकीविद्यायाः भवार्णवसंतरणहेतुत्वेन प्रदर्शनात् तद्व्याख्याकारैः श्रीधराचार्यैः आन्वीक्षिकीविद्यायाः कृते आत्मविद्यात्वेन व्याख्यानेन इमामेवान्वीक्षिकीं विद्यामध्यात्मविद्यात्वेन दत्तात्रेयः अलर्काय प्रह्लादिभ्यश्च ऊचिवान्निति श्रीमद्भागवते महापुराणे प्रथमस्कन्धे तृतीये अध्याये एकादशे श्लोकेऽपि प्रतिपादितमस्तीत्यस्योल्लेखं च न्यायवार्तिकस्य भूमिकायां विन्द्धेश्वरीप्रसादद्विवेदीमहाभागोऽपि करोति (ई.१९१६, पृ.३१)।

तत्र प्रमाणत्वेन च श्रीमद्भागवतव्याख्यातѓणां नामानि क्रमशो गृह्णति सः। यथा– अत्र टीकाकारः श्रीधरस्वामी आन्वीक्षिकीम्–आत्मविद्याम्, वीरराघवोऽध्यात्मविद्याम्, विजयध्वजः–तत्त्वविद्याम्, बल्लभाचार्यो योगपुरस्सरमात्मविद्याम्, विश्वनाथचक्रवर्ती आत्मविद्याम्, शुकदेवः अध्यात्मविद्यामित्यर्थं कृतवन्त इति।(ब तत्रैव)

अनेन च न्यायशास्त्रस्य स्वरूपं वस्तुतः पूर्वं कीदृशमासीदिति सुतरामनुमातुं शक्यते। न्यायविद्यात आन्वीक्षिक्या भिन्नत्वमिति तु न शङ्क्यम्, सेयमान्वीक्षिकी प्रमाणदिभिः पदार्थैर्विभज्यमानेत्यादिना न्यायभाष्यकारेण वात्स्यायनेन तर्कविद्यायाः कृते आन्वीक्षिकीशब्दप्रयोगात्, आन्वीक्षिकी दण्डनीतिस्तय र्कविद्यार्थशास्त्रयोरिति अमरकोषवचनात्, आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती(कामन्दः,२/२) इति वचनात्, न्यायमञ्जर्यां जयन्तभट्टेन च इयमेव आन्वीक्षिकी चतसृणां विद्यानां मध्ये न्यायविद्या गण्यते (ई.१९८२ : पृ.९) इति चोदितत्वात्, सेयमान्वीक्षिकी न्यायतर्कादिशब्दैरपि व्यवह्रियते। तथा च **न्यायो मीमांसा धर्मशास्त्राणीति श्रुति**रित्यादिना न्यायसूत्रवृत्तौ विश्वनाथपञ्चाननेन कथनाच्च आन्वीक्षिकी न्यायविद्यातो भिन्नेति तु न शंकनीया। इयं च न्यायविद्या आन्वीक्षिक्यपरपर्याया बहुत्र अन्यत्र च आत्मविद्यात्वेन परिगृहीतेति कुत्रचित् तदभेदेन कुत्रचिच्च तद्भेदेन पठितापि सा नूनमपि वैदिकपक्षं विहाय अन्यत्र गन्तुं न शक्नुयादेवेति निश्चीयते। कुत्रचिदात्मविद्यात्वेन आन्वीक्षिकीविद्याया ग्रहणम् कुत्रचिच्च तद्भिन्नत्वेनापि ग्रहणमुभयथापि दृश्यते। यथा–

**त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च शाश्वतीम्।**
**आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः॥** (मनुः, ७/४३)

अत्र च आत्मविद्याभिन्नत्वेन आन्वीक्षिक्याः ग्रहणं मनुना कृतम्। परन्तु अत्रैव मुनस्मृतिस्थस्य आन्वीक्षिकीं चात्मविद्यामिति श्लोकस्य भाष्ये आन्वीक्षिकीविद्याया विशेषणत्वेन आत्मविद्येति पदान्तरप्रदानस्य सार्थक्यं प्रतिपादयता मेधातिथेः भाष्येन आन्वीक्षिविद्याया द्वेधा विभागं प्रदर्शितं भवति। उक्तश्लोकस्य तात्पर्यं व्याकुर्वन् स लिखति– चार्वाकबौद्धजैनप्रभृतीनां तर्कविद्या अस्मान् सर्वान् नास्तिकतां निर्माति। अत एव विशेषतो राज्ञैः तादृशी विद्या न ग्रहणीया। किन्तु आत्मविद्यारूपी आन्वीक्षिकी विद्या तु स्वीकर्तुं शक्येति। एवं तात्पर्येणैव मनुना तत्रान्वीक्षिकीपदस्य विशेषणतया आत्मविद्याया ग्रहणं कृतमस्तीति। इदं सर्वं परिजानन् फणिभूषणतर्कवागीशश्च स्वोपज्ञे न्यायपरिचयनामके ग्रन्थे आन्वीक्षिकीविद्याया प्रकारद्वयं वर्तते इति प्रदर्शयति। तत्र राजशेखरेण (ई.८८०–९२०) कृता काव्यमीमांसाया द्वितीयेऽध्याये आन्वीक्षिकीविद्यायाः विद्यमानप्रकारद्वयस्य चर्चाप्यनेन समुपस्थापिताऽस्ति । (तर्कवागीशः, ई.१९६८ : पृ.३७ )

अतः क्वचित् आन्वीक्षिकीपदस्य आत्मविद्यात्वेन ग्रहणं क्वचिच्च तद्भिन्नत्वेन ग्रहणदर्शनादेव केशवशरणार्यालोऽपि **न्यायसूत्र र वैशेषिक सूत्रको पर्यालोचन** नामके नेपालिभाषायां लिखिते पुस्तके इत्थं स्वीयनिष्कर्षं प्रकटीचकार– **सामान्यतः आन्वीक्षिकी भन्नाले आत्मविद्या नै हो तर न्यायशास्त्रका लागि प्रयुक्त आन्वीक्षिकी पारिभाषिक पद बनेको छ वा बनाइएको छ** (अर्यालः, २०७५ : पृ.३७)। इदं सर्वं वदन्नन्ते आन्वीक्षिकीनाम्ना इदानीं रूढिंगते न्यायशास्त्रे आत्मनः चिन्तनेन साकं प्रमाणसंशयादीनामपि विशेषतो विवेनचनं यतो विहितम्, तस्मात् विशुद्धात्मविद्यातोऽस्य पृथक्करणं पश्चादभूदिति पुनरेवं सम्भावक्

यति च। तत्पूर्वमपि अनेन वाल्मीकिरामायणस्थम्

**धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः। बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदन्ति ते** (वाल्मीकिः, अयो.१००/२९) इदं श्लोकमादाय, एवं महाभारतस्थमपरम्—

**भवेत् पण्डितमानी च ब्राह्मणो वेदनिन्दकः। आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम्** (अनु-शा.प. ३७/१२) श्लोकमादाय महोदयेन वेदशास्त्रविरुद्धकेवलतर्कमादाय प्रसृतानां तादृशानामत्र निन्दा विहीता वर्तते इति प्रदर्श्य वेदार्थविरोधित्वे आन्वीक्षिकीविद्याया निन्दनीयत्वमेव शास्त्रकारैरनुमतमिति नि-ष्कर्षो व्यधायि। अत एवोच्यते अनेनापि गौतमीयन्यायशास्त्रेण सर्वांशे वेदानुकूलत्वेनैव भाव्यम्। अयमेव वेंकटेशाचार्यस्यापि आशयो लक्ष्यते।

**आम्नायार्थाविरोधेन न्यायचिन्तां करोति यः। तेन निश्श्रेयसं प्राप्यं शार्गालीं योनिमन्यथा ॥ मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसामि**त्यादीनि न्यायमतस्य तत्सिद्धान्तस्य वा निन्दापरकानि वचनान्यपि चेदमेव तथ्यमाविष्कुर्वन्ति। अतो मुमुक्षुभिरिदानीन्तनीयानि गौतमसूत्राणि परिष्कृत्यैव स्वी-कर्तव्यानि भवन्ति। इदानीन्तनीयानि गौतमीयानि सर्वाण्यपि सूत्राणि वैदिकसिद्धान्तानुकूलानि न सन्तीति अतथाभूतानां सूत्राणां परिशोधनमावश्यकमेव प्रतिभाति।

वैदिकपक्षश्च– यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमाणम्। यदज्ञानात्संसारो यज्ज्ञानाच्च तन्निवृत्तिस्तत् प्रमेयम्, मुमुक्षुभिः प्रकर्षेण मेयत्वादिति। तद्विविधम्–द्रव्याद्रव्यभेदात्। आगन्तुकधर्माश्रयो द्रव्यम्। अतब्य थाभूतमद्रव्यम्। द्रव्यं पुनः द्वेधा विभक्तम्–जडाजडभेदेन। जडं द्वेधा–प्रकृतिः काल इति। अजडं चातथा... (वेंकटेशः, ई.२००३ : पृ.४)। वेंकटेशस्य प्रमाणप्रमेयादिपदार्थानां स्वरूपप्रदर्शनरीतिरेतादृशी।

तत्वमुक्ताकलापाख्ये ग्रन्थेऽपि— **द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्वमाहुः, द्रव्यं द्वेधा विभक्तं जडमजडमि**त्यादिना (वेंकटेशः, ई.१९३३ : श्लो.६) वैदिकपक्षस्य वास्तविकं स्वरूपं तत्र प्रकटीी कृतमस्त्यनेन।

गौतमीये न्याये पुनः प्रमीयतेऽनेनेति प्रमाणम्। अथवा प्रमायाः करणं प्रमाणम् (केशवमिश्रः, ई.२००३ : पृ.११) इति प्रमाणशब्दस्य व्युत्पत्तिः क्रियते। तात्पर्यटीकाकारोऽपि सम्यगनुभवसाधनं प्रमाणम् (वाचस्प-तिः, ई.१९९० : पृ.६) इति प्रमाणसामान्यस्य लक्षणं कृतवान्। यद्यपि प्रमाणशब्दस्य भावे करणे च व्युत्प-त्या ज्ञाने, तत्साधने चोभयत्राऽपि व्यवहारो भवति। अत्र न तावान् शब्दप्रयोगे विवादः। अत एव वेंकटेशोऽग्रे एवंरीत्या वदति– सम्यगनुभवः प्रमा, यथार्थज्ञानं वा प्रमेति (ई.२००३ : पृ.४३) तत्करणं च प्रमाणमिति। परन्तु प्रमाणानि च त्रीणि एव न तु चत्वारि। एतदेव वैदिकं मतमस्ति। उक्तं च मनुनापि

**प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यं धर्मसिद्धिमभीप्सता ॥** (ई.१९९२ : पृ.४०५)

गौतममहर्षिणा तु प्रत्यक्षानुमानोपमानशब्दभेदेन चत्वारि प्रमाणानि उक्तानि। परन्तु एतन्न वैदिकमत-स्य अनुकूलं विद्यते। मनुना च त्रयाणामेव प्रत्यक्षानुमानशब्दानां प्रमाणत्वस्वीकारात् त्रीणि एव प्रमाणानि वैदिकानि। अत एव न्यायैकदेशिको भासर्वज्ञः त्यक्तवान् पृथक् प्रमाणत्त्वमुपमानस्य।

गौतमीयन्यायस्य आनुपूर्वितया व्याख्याने अकृतेऽपि न्यायपदार्थविवरणसन्दर्भे गौतमीयन्यायं परिष्कृत्य वैदिकसिद्धान्तानुगुणं न्यायशास्त्रं पूर्वाचार्यैः नाथमुनिवरदविष्णुप्रभृतिभिराचार्यैः प्रकटीकृतमासीदिति श्रीवेंकटेशाचार्यो वदति स्वोपज्ञे न्यायपरिशुद्धौ। यथा वेदप्रामाण्यस्य परमात्मनोऽस्तित्त्वस्य चाभ्युपगमो न्यायशास्त्रेऽपि स्वीक्रियते, परन्तु वेदस्य प्रामाण्यं तस्यापौरुषेयत्वहेतुना तैर्न प्रतिपाद्यते। परमात्मनोऽनस्तित्वं प्रत्यपि ते वेदरुपशब्दप्रमाणापेक्षया अनुमानप्रमाणेऽधिकं विश्वासमावहन्ति। अत एव **प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका** इति वदन्तः स्वात्मानं धन्यं मन्यमानाः नैयायिकाः तर्कशास्त्रस्य हेतुविद्या–तर्कविद्याप्राधान्यत्वसन्दर्शनव्याजेन अनुमानप्रमाणे सर्वं भारं निक्षिप्य स्वात्मनि रमन्ते। प्रत्यक्षविषये त्वेते अनुमानप्रमाणमाश्रयन्ते चेत् किमाश्चर्यं शब्दप्रमाणविषये। परोक्षज्ञानसम्पादके शब्दप्रमाणे तु स्वाभाविकमेतत्। अत एव शब्दप्रमाण्यस्यानुमानोपोद्बलकत्वं तेऽभिप्रयन्ति ईश्वरसाधकानुमाने। क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वादित्याद्यनुमानादिद्वारा क्षित्यङ्कुरादीनां कर्तृजन्यसाधनमुखेन पारिशेष्यात् तत्कर्तृत्वेन जीवभिन्नं सर्वज्ञमीश्वरं ते साधयन्तः तत्र च **द्यावाभूमी जनयन् देव एकः** इत्यादिश्रुतीनामनुमानप्रमाणापोद्बलकत्वेन ते सन्दर्शयन्ति।

किं च ते पुनः जगत्कारणत्वविषयेऽपि परमात्मनो नैमित्तिककारणत्वे एव पर्यवसिताः। परमाणुवादस्य मुख्यत्वमङ्गीकृत्य परमाणूनामेवोपादानत्वं प्रतिपाद्य वेदसम्मतस्य अभिन्ननिमित्तोपादानत्वमीश्वरस्य तैर्निराक्रियते। एतदपि तर्कबलेनैव। किञ्च **ईश्वरः कारणम् पुरुषकर्माफल्यदर्शनात्** इत्यतः **तत्कारित्वादहेतुः** (न्या.सू.४.१.१९–२१) इत्यन्तेन च सूत्रेण जीवकर्मानुरूपं फलसम्पादकतया ईश्वरस्य संसाधनादनुमानमेव ईश्वरविषयेऽपि। ईश्वरस्य रागद्वेषादिराहित्यं नित्यज्ञानेच्छादिमत्वं च सर्वमपि अनुमानप्रमाणेनैव साध्यते एतैः। अस्मिन् प्रमाणे एव एतेषां परमनिर्भरत्वं जानीमो न तु वेदराशिरुपशब्दप्रमाणविषये। अत एव ईश्वरस्य जगन्निमित्तत्वमात्रं एतैः प्रसाध्यते, नोपादानत्वम्। एतदपि वैदिकमतविरूद्धमेव। एवमेव पार्थिवादिपरमाणु–आकाश–मनआदीनां च नित्यत्वमपि न वैदिकसिद्धान्तसम्मतः पक्षः।

पश्चकालिकैराचार्यैरुद्योतकरप्रभृतिभिरपि प्रत्यक्षानुमानादिप्रमाणविचारे यावान् आदरः प्रदर्शितो न तावान् आदरो वेदानुकूलतया प्रमाणप्रमेयादितत्वविचारे इति तु स्पष्टमेव दृश्यते। यद्यपि न्यायदर्शनस्याऽपि मुख्यं प्रयोजनं मोक्षप्राप्तिरेव, तत्प्राप्तौ च साक्षादङ्गत्वं प्रमेयानामेवाऽस्ति। तत्राऽप्यात्मनो याथार्थ्येन ज्ञानमपेक्षितं भवतीति न्यायनयेऽपि उच्यते। सत्यप्येवं तन्मात्रनिरूपणे इदमप्यात्मविद्यामात्रमेव स्यादतोऽन्येऽपि पदार्थाः संशयादयो विशेषेण निरुप्यन्तेऽत्रेति अस्य शास्त्रस्य सत्यपि मोक्षप्रयोजनवत्वे वेदप्रामाण्यवादित्वेऽपि च नाऽत्ममात्रस्य निरूपणं व्याख्यानं वा अत्र क्रियते (वात्स्यायनः, ई.१९९८ : पृ.५) इत्येवंरूपेण सूत्रकारस्य संरक्षणमस्मिन् प्रसंगे भाष्यकारेण कृतमस्ति अथापि पक्षस्य अस्य वैदिकसिद्धान्तविरुद्धतया न्यायसिद्धान्तस्य स्थापना वेदप्रामाण्यवादीनां मुमुक्षूणां कृते न सम्भवप्रायमेव।

किञ्च न्यायशास्त्रमपि वेदप्रामाण्यवादि एव। अत इदमपि शास्त्रं वैदिकपन्थानं कथं त्यक्तुं शक्नुयात् इति प्रश्नो जागर्त्येव। भाष्यकारस्य गौतमर्षिप्रणीतानां न्यायसूत्राणां सन्दर्भे न्यायशास्त्रस्य मुख्यप्रयोजनस्य समुद्घाटनमाध्यमेन महर्षिगौतमोपरि सम्भाविताक्षेपस्य उपस्थापनमपि इदं संकेतयति यत् – सूत्रकारः किंचिद् मार्गान्तरमेव गतवान् वर्तते इति। यद्यपि तस्य संरक्षणं भाष्यकारेण विहितं सा अन्या कथा।

गौतमीये न्याये च वेदविरुद्धतयैव कतिपयसिद्धान्ताः स्थापिताः सन्ति। यथा परमाणूनां जगत्कारणत्वम्, ईश्वरस्य जगन्निमित्तकारणत्वमात्रम्, मोक्षस्यात्यन्तिदुःखनिवृत्तिरूपतामात्रम्, आत्मनो न ज्ञानरूपता, ज्ञार नेन्द्रियाणां भौतिकत्तत्वम्, प्रमाणचतुष्टयस्वीकारः, अवयवातिरिक्तावयविस्वीकार इत्यादयः।

वैदिकसिद्धान्तेतराद्वैतादिसिद्धान्तेषु निष्ठा विद्यमानानां वाचस्पतिप्रभृतीनाम् अन्याचार्याणामप्यरुचिरत्र गौतमीयन्यायशास्त्रे स्यात्, तथापि वेदप्रामाण्यवादिनोऽपि ते अस्य न्यायशास्त्रस्य पृथक् विद्याप्रस्थानत्व त्वमिति मत्वा न्यायप्रतिपादितप्रमाणप्रमेयादीनादाय स्वतन्त्रतया वेदान्तदेशिकोक्तपरिशोधनप्रणालीप्रद- र्शनरीत्या नैव स्वलेखनीं चालितवन्तोऽपितु सूत्रानुसार्येव व्याख्यानं कुर्वन्तः तदेव मतं न्यायशास्त्रस्येति प्रदर्शितवन्तः। वेदप्रामाण्यवादिनोऽस्य न्यायशास्त्रस्य वेदविरुद्धांशप्रमाणप्रमेयादिप्रतिपादने सति कथं वैदिकमतं सर्वांशेन संरक्षितं स्यादित्यादिरीत्या नैव चिन्तितवन्तः पश्चभाविनो न्यायशास्त्रव्याख्यातारः। अत एव वात्स्यायन–उद्योतकरप्रभृतिभिराचार्यैः यथासूत्रमेव सूत्रभाष्यादिव्याख्यानं कृतमवलोक्यते। केवलं गौ- तमसूत्राणामुपरि बौद्धाचार्यैः कृतानामाक्षेपाणां परिहाराय तदीयामेव शैलीमनुसरन्तः स्वपक्षतो तेषां मतानां खण्डने, अपेक्षितपरिष्कारपक्षे च श्रमो न्यायदर्शनव्याख्यातृभिः विहितो वर्तते।

वेंकटेशात् पूर्वमपि विद्यमानैः विशिष्टाद्वैताचार्यैरेतावद्विपुलतया न्यायसिद्धान्तो नैव चिन्तितो यथाऽयं चिन्तयत्यत्र न्यायपरिशुद्धौ। पूर्वाचार्यैस्तु केवलं स्वसिद्धान्तानुकूलप्रमेयस्थापनबेलायां किं वा वैदिकप्रमे- यस्थापनाबेलायां ते ते विषयाः समुपस्थापिताः सन्ति। इदानीं यद्यपि मेघनादारिविरचितं नयद्युमणिं विहाय पूर्वाचार्यविरचितानां तेषां ग्रन्थानामुपलब्धिर्नास्ति, एतदप्यस्य वेंकटेशस्य निदर्शनेन तथाऽसन्निति ज्ञायते केवलम्। नाथमुनिप्रणीतस्य न्यायतत्वनामकाग्रन्थस्य त्वनुपलब्धिस्तदानीमेव जात आसीदिति ज्ञायते। स्वसम्प्रदायाचार्यस्य श्रीरामानुजमुनेः परमगुरोः श्रीयामुनाचार्यस्यात्मसिद्धिनामकग्रन्थस्योद्धरणं प्रदर्श्य नाथमुनिभिरपि न्यायतत्वं रचितवान् आसीदिति सुस्पष्टयत्ययमेव। यामुनाचार्याणां पङ्क्तिं चोल्लिखति– **आत्मप्रहाणानभ्युपगमादविहायैवात्मानमितस्ततश्चेतना इन्द्रियादिद्वारा निस्सरति। विच्छिन्नायास्त- स्याः संधानासम्भवः शास्त्र एवोक्त** (वेंकटेशः, ई.२००३ : पृ.५०) इति। शास्त्रे इत्यस्य व्याख्यानं च स्वयमेव श्रीमन्नाथमुनिभिरिति करोति। एवमेव वरदविष्णवाचार्यैः प्रणीतं मानयाथात्म्यनिर्णयः, पराशरभ- ट्टानां तत्वरत्नाकरः, श्रीविष्णुचित्तानां प्रमेयसंग्रह इत्यादयो वास्तविकन्यायतत्वप्रतिपादकाः ग्रन्था आसन्। एते सर्वे ग्रन्था अद्य नैवोपलभ्यन्ते। केवलं वेंकटेशाचार्यैरुद्धृतांशानां दर्शनेन एते ग्रन्थाः स्वसम्प्रदायिका आसन्निति ज्ञायते।

वेंकटेशस्तु तान् सर्वानादाय (कतिपयान्नुपलब्धान् कतिपयाककांश्च परम्पराप्राप्तान् ज्ञानान्) तेषामाशयं ज्ञात्वा वैदिकपथानुसारि न्यायं प्रदर्शितवान्निति। इदं च तथ्यं श्रीवेंकटेशविश्वविद्यालयस्थेन विदुषा वरदाचा- र्येण न्यायविशिष्टाद्वैतमतयोः प्रमाणविचारः इत्यस्मिन् स्वीयालेखेऽपि वेंकटेशप्रणीतो न्यायपरिशुद्धिनामको ग्रन्थो गौतमन्यायं परिष्कृत्य सिद्धान्तान् सर्वान् प्रतिपादयतीति। एतेषामाचार्याणां स्वीयतत्वमुक्ताकलाप- ग्रन्थस्य व्याख्यायां सर्वार्थसिद्धौ सन्दर्भविशेषेषु एते विषया सुविचारिताः सन्ति (सारस्वतीसुषमाः, २०२४ : अंकः ३–४, पृ ३०३–३१९) इत्यादिना च प्रकटीकृतं वर्तते।

**निष्कर्षः**

अस्मिन् आलेखे मया वेंकटेशस्य न्यायसूत्राणामुपरि कृताया आलोचनाया अथवा तद्वारा प्रदर्शिताया: पदार्थशोधनपद्धतेः स्वरूपविषये तत्पर्यालोचनेन दिग्दर्शनं कारितमस्ति। यद्यपि सर्वेषां दर्शनानां स्वीयं स्वीयं क्षेत्रं वर्तते। एकेन अन्यस्य अतिक्रमणं नोचितम्, न कर्तव्यञ्च, अथापि न्यायविस्तरपदवाच्येन विद्यास्थानो- पदमधिरूढेन वैदिकमतस्य सर्वतो नास्तिकजनेभ्यः संरक्षकत्वस्य दायित्वमधिवहता गौतमीयन्यायदर्शनेन वेदोपाङ्गरूपत्वादपि वैदिकमतभिन्नेन मार्गेण नैव गमनीयमिति कतिपयस्थलेषु अस्य वैदिकमार्गतो बहि- र्गमनमस्मै दर्शनाय न रोचते एव। बहिरगमनेनापि स्वस्योद्देश्यसम्पूर्तौ बाधकाभावात् या दृष्टिः तत्र विशिष्टा- द्वैतसम्बद्धैराचार्यैः तत्र तत्र स्थलेषु एवं वेंकटाचार्येण च विशेषतो न्यायपरिशुद्धौ प्रदर्शिता विद्यते तदपि एको नूतनो विषय एवेति वक्तुं शक्यते। यादृशीं दृष्टिमादाय प्रमाणानि चादाय अयं तथा वदति तत्र विरोधस्य असत्वेऽपि कतिपयस्थलेयषु यानि मतानि साक्षाद् वेदेन सह सम्बद्धानि न भवन्ति तादृशस्थलेष्वपि विशि- ष्टाद्वैतमतरीत्या न्यायमतस्य नयनं किंचिदधिकं वा वेंकटेशस्य ? इति कदाचित् मनसि भाति। इदं तु सत्यं तथ्यं यत् यादृशं स्वरूपमस्य न्यायदर्शनस्य पूर्वमासीत् तच्च कालक्रमेण किंचिद् किंचिद् परिवर्तितमस्ति। तच्च जैनबौद्धादिमतैः सह संघर्षस्य कारणेन वा भवतु अन्यया रीत्या वा भवतु । स्वरूपपरिवर्तनं तु अव- श्यमेव जातमस्ति। अत्र नास्ति विमतिः। अत एव श्रीकृष्णस्य विद्याग्रहणकाले श्रीमद्भागवते आन्वीक्षिकी- विद्याया स्वातन्त्र्येण उल्लेखः अस्या महत्वप्रदर्शनेन साकमेतत्पदव्याख्यातृश्रीधराचार्यप्रभृतिरात्मविद्यात्वेन अस्य पदस्य तथाव्याख्यानमिदं संकेतयतीति विभाव्यते। अतो न्यायपरिशुद्धिग्रन्थमादाय वेंकटेशकृतस्य न्यायसूत्राणामालोचनप्रकारस्य नूतनरीत्या अध्ययनमपि दर्शनशास्त्राध्येतṛणां कृते अनुसन्धानस्य विषयो भवितुं शक्नोति।

**कृतज्ञताज्ञापनम् –**

वेंकटेशकृतन्यायसूत्रालोचनस्य पर्यालोचनमिति शीर्षके सज्जीकृतोऽयमालेख इदानीं विश्वविद्यालय अनुदान आयोग भक्तपुर सानोठिमीतः पी.एच.डी.विद्वद्वृत्यन्तर्गततया सम्प्राप्तविद्वद्वृत्तौ नेपालसंस्कृतवि- श्वविद्यालयानुसन्धानकेन्द्रतः क्रियमाणस्य न्यायपरिशुद्धिदृष्ट्या न्यायदर्शनाभिमतप्रमाणपरिशोधनम् इति शीर्षकस्यैवांगतया वर्तत इति विज्ञापयन् आलेखस्यास्य सज्जीकरणे विशिष्टपरामर्शप्रदानेन मामुपकृतव- द्भ्य एवं शोधकार्यार्थं विद्वद्वृत्तिप्रदानेन मामुपकृतवते विश्वविद्यालयानुदानायोगाय च विशेषतः कार्तज्ञभावं व्यनज्मि।

**सन्दर्भग्रन्थसूचीः**

अर्याल, केशव. (२०७५). *न्यायसूत्र र वैशेषिक सूत्रको पर्यालोचन.* काठमाण्डौ : नेपाल प्रज्ञा प्रतिष्ठान।

कणादः.(सन्.२००५).*वैशेषिकदर्शनम्* (रसायनव्याख्या). चेन्नै : उत्तमूरुश्रीवीरराघवाचार्य सेनेटेरी ट्रस्टर।

भट्टः,जयन्तः. (सन्.१९८२). *न्यायमञ्जरी.* (ग्रन्थिभंगव्याख्या) वाराणसी : सं. सं. वि. वि.।

भारद्वाजः. (सन्.१९९७). *न्यायभाष्यवर्तिकम्.* दिल्ली : भारतीयदार्शनिकानुसन्धानपरिषद्।

भारद्वाजः.(सन्.१९१६).*न्यायवार्तिकम्.* (विन्ध्येश्वरी प्र.द्विवेदिनो विस्तृतभूमिकायुता) वाराणसी : विद्याविलासयन्त्रम्।

भट्टः,गदाधरः. (ई.१९९२).*प्रामाण्यवादः* (कृष्णाख्यसंस्कृतव्याख्या) वाराणसी : चैखम्बासुरभारतीप्रकाशनम्।

मनुः. *मनुस्मृतिः.* वाराणसी : चौखम्बा संस्कृत सीरिज।

याज्ञवल्क्यः. (सन्.२०१५). *याज्ञवल्क्यस्मृतिः.*(हिन्दीभाषाटीका). लखनउ।

पराशर. (सन्.२०५९). *विष्णुपुराण.* (हिन्दी अनुवाद) गोरखपुर : गीताप्रेस।

मिश्रः, वाचस्पतिः. (सन्.१९९०). *तात्पर्यटीका.* वाराणसी : चैखम्बासंस्कृतसंस्थानम्।

वात्स्यायनः. (सन्.१९९८). *न्यायभाष्यम्.* (प्रसन्नपदाव्याख्या). वाराणसी : बौद्धभारती।

वेंकटेशः. (सन्.१९१३). *न्यायपरिशुद्धिः.* (मूलमात्रम्) चेन्नै : श्रीविशिष्टाद्वैतप्रवचनसभा।

वेंकटेश. (सन्.२००३). *न्यायपरिशुद्धि.* (हिन्दीव्याख्या). वाराणसी : चैखम्बाविद्याभवनम्।

वेंकटेशः. (सन्.२००७). *न्यायपरिशुद्धिः* १–२. (न्यायसारव्याख्यायुता). मद्रास : राष्ट्रियसंस्कृतविद्यापीठम्।

वेंकटेशः. (सन्.१९३३). *तत्वमुक्ताकलापः.* (सर्वार्थसिद्धिव्याख्या). मैसूर : ओरियण्टल लाईब्रेरी।

वेदव्यासः. ——— *श्रीमद्भागवतम्.* (श्रीधरीटीका). वाराणसी : मोतिलाल बनारसीदास।

# पाणिनीयव्याकरणप्रयुक्तघिनदीसंज्ञाविषयकविमर्शः

**हरिलालपौडेलः**
उपप्राध्यापकः व्याकरणविभागस्य
नेपालसंस्कृतविश्वविद्यालयान्तर्गत–विश्वविद्यालयविद्यापीठस्य
बेलझुण्डीदाङनेपालस्थस्य
Email: hlpsharma2035@gmail.com

**लेखसारः**

अनुसन्धानात्मकलेखोऽयं पाणिनीयव्याकरणशास्त्रप्रयुक्तघिनदीसंज्ञाविषयकविमर्शे केन्द्रितोऽस्ति। पाणिनीयव्याकरणे शब्दसाधुत्वप्रक्रियासाधनप्रसङ्गे प्रयुक्तासु विविधसंज्ञासु घिनदीसंज्ञेऽप्यन्यतमे स्तः। नदीसंज्ञाविधायकसूत्रे घिसंज्ञाविधायकसूत्रार्थस्य, घिसंज्ञाविधायके च नदीसंज्ञाविधायकसूत्रार्थस्यापेक्षणा द्वे संज्ञे सापेक्षे स्तः। घिनदीसंज्ञाविषयकसन्देहनिवारणपूर्वकसारल्यानयनोद्देश्येन कृतेऽनुसन्धानेऽस्मिन् पूर्वाचार्यकृतव्याख्यानान्याधारी-कृत्य घिनदीसंज्ञाविषयकसैद्धान्तिकीमवधारणां प्रस्तोतुं प्रयत्नो व्यधायि। तदर्थञ्च गुणात्मकस्वरूपेऽस्मिन्ननुसन्धाने पाणिनीयव्याकरणस्याजन्तपुंलिङ्गस्त्रीलिङ्गप्रकरणयोर्घि नदीसंज्ञोपप्रकरणं केन्द्रबिन्दुं कृत्वा प्रकरणसम्बद्धेभ्यो विविधग्रन्थेभ्यः तथ्यरूपाः सामग्रीः सङ्कलय्य तासां वर्णनं, व्याख्यानं विश्लेषणञ्च कृत्वा निष्कर्षः स्थापितोऽस्ति। अतोऽस्मिन् मूलतो वर्णनात्मको, व्याख्यानात्मको विश्लेषणात्मकश्चाध्ययनविधिरवलम्बितोऽस्ति। अत्र च मूलतः पाणिनीयपव्याकरणस्य प्रक्रियाग्रन्थस्थघिनदीसंज्ञासम्बद्धाः सिद्धान्ताः सैद्धान्तिकपर्याधारत्वेन गृहीताः सन्ति। प्राप्ततथ्यानां विश्लेषणेन चात्र– नित्यस्त्रीलिङ्गानामीकारोकारान्तानां नदीजनन्यादिशब्दानां, बहुश्रेयसीशब्दस्य, प्रथमवयोवाचककुमारीशब्दस्य च नदीसंज्ञा, अतिस्त्रीश्रीभ्रुवादिशब्दानामामि ङिद्विभक्तिषु च विकल्पेन सा, भूसुध्यादीनां न नदीत्वम्, कान्ति-मति-धेनु-रज्ज्वादीनां ह्रस्वेकारोकारान्तानां ङित्सु विकल्पेन नदीसंज्ञा, सखिशब्दं वर्जयित्वाऽन्येषां ह्रस्वेकारोकारान्तानां नदीसंज्ञावर्जितानां मुन्यहि-कवि-भान्विन्दु-साध्वादिशब्दानां घिसंज्ञा, केवलसखिशब्दस्य घिसंज्ञानिषेधेऽपि सुसख्यादीनां सख्यन्तशब्दानां दीक्षितमते घिसंज्ञा, नागेशमते तु नेति विकल्पस्तत्र, पतिशब्दस्य समास एव घिसंज्ञा, भूपतिपशुपत्यादीनां पत्यन्तसमस्तशब्दानाम्, अतिथिमहाकव्यादीनां पतिभिन्नह्रस्वेकारान्तसमस्तशब्दानाञ्च घिसंज्ञा, स्मृतिपुराणादिप्रयुक्तानां 'पतये'

'सखिना' इत्यादिप्रयोगाणां नागेशमतेऽसाधुत्वम्, शरणदेवमते तु तेषां साधुत्वम्, 'सीतायाः पतये' इत्यादौ षष्ठीयुक्तपतिशब्दस्य घित्वजन्यप्रयोगाणां साधुत्वं, षष्ठ्यन्यविभक्तियोगे तु लौकिकप्रयोगे केवलसखिपतिशब्दयोर्न घिसंज्ञेति सखिना पतिनेत्यादिप्रयोगोऽस्मदादिभिर्न कर्तव्य इति निष्कर्षः स्थापितः।

**शब्दकुञ्जी**– संज्ञा, नदी, घि, नित्यस्त्रीलिङ्गः, ङिद्विभक्तिः।

**विषयपरिचयः**

पाणिनिना शब्दसाधुत्वाय संज्ञा-परिभाषा-विधि-नियमातिदेशाधिकारभेदेन षड्विधानि सूत्राणि प्रणीतानि। सार्थकशब्दानां प्रातिपदिकसंज्ञां कृत्वा विविधस्वरूपाणां प्रातिपदिकानां विविधरूपसाधुत्वाय विविधाः संज्ञाः कृताः, तत्राजन्तशब्दरूपानुशासनक्रमे प्रयुक्तासु संज्ञासु मध्ये सर्वनामसंज्ञा, नदीसंज्ञा, घिसंज्ञा च विशेषतोऽधिकक्षेत्रं व्याप्नुवन्ति। तत्रापीकारोकारान्तानां शब्दानां रूपसिद्ध्यनुशासनाय घिनदीसंज्ञे विशेषतो महत्त्वपूर्णे स्तः।

पाणिनीयव्याकरणे **शेषो घ्यसखि** (पा सू १।४।७) इत्यादिसूत्रैर्घिसंज्ञा विधीयते, **यू स्त्र्याख्यौ नदी** (पा सू १/४/३) ) इत्यादिसूत्रैश्च नदीसंज्ञा विधीयते। घिसंज्ञाप्रकरणे शेषपदार्थो ज्ञातव्यः, नदीसंज्ञाप्रकरणे च यूपदेन ह्रस्वेकारोकारौ गृह्येते दीर्घौ वेति ज्ञातव्यम्। पूर्वप्रकरणज्ञानाधीनं शेषपदार्थज्ञानम्, शेषपदार्थज्ञानाधीनं पूर्वप्रकरणस्थयूपदार्थज्ञानमिति घिनदीसंज्ञे परस्परं सम्बद्धे सापेक्षे च स्तः। तत्र नदीसंज्ञाप्रकरणे च **नेयङुवङ्स्थानवस्त्री** इत्यनेन च इयङुवङ्स्थानयोर्य्वोर्नदीसंज्ञा निषिध्यते। अतो नदीसंज्ञाक्षेत्रज्ञानाय इयङुवङ्प्रसक्तिरपि ज्ञातव्येति प्रकरणमिदं संश्लिष्टमत एव क्लिष्टमप्यस्ति, किन्त्वेतद्विषये केनाप्यनुसन्धानात्मकलेखो लिखितो न दृष्ट इति तत्प्रकरणगतक्लिष्टतान्यूनीकरणायानु सन्धानमिदं प्रारब्धम्।

घिनदीसंज्ञे कुत्र कुत्र भवतः कुत्र कुत्र नेति मूलभूतां समस्यामादायैवानुसन्धानमिदं प्रवर्तते। तत्र विशेषतः नदीसंज्ञा-घिसंज्ञयोः परस्परं कः सम्बन्धः ? नदीसंज्ञा कीदृशानां शब्दानां नित्येन, कीदृशानाञ्च शब्दानां विकल्पेन भवति ? कीदृशानां शब्दानां नदीसंज्ञा निषिध्यते ? कीदृशानां शब्दानां घिसंज्ञा भवति, कीदृशानाञ्च न ? इत्येतादृशीनां शोधसमस्यानां समाधाने केन्द्रितोऽयं लेखः। तत्र च- नदीसंज्ञा-घिसंज्ञयोः परस्परं सम्बन्धप्रदर्शनम्, नित्यनदीसंज्ञायोग्यानां, वैकल्पिकनदीसंज्ञायोग्यानाञ्च शब्दानां निर्धारणम्, नदीसंज्ञानिषेधयोग्यानां शब्दानां निर्धारणम्, घिसंज्ञायोग्यानां तदयोग्यानाञ्च शब्दानां निर्धारणञ्चेत्यादीनि शोधकार्यस्यास्य प्रमुखोद्देश्यानि।

उपरितनसमस्यानां समाधानाय न केनाप्यनुसन्धानं विहितम्। पाणिनीयव्याकरणपरम्परायां पूर्वाचार्यैः कृतानि यानि पूर्वकार्याणि प्राप्यन्ते, तान्यत्र संक्षेपेण चर्च्यन्ते :

पतञ्जलिना महाभाष्ये नदीसंज्ञाविधायकेषु चतुर्षु सूत्रेषु मध्ये **यू स्त्र्याख्यौ नदी** (पा सू १/४/३) इत्यस्यैव, घिसंज्ञाविधायकेषु त्रिषु सूत्रेषु च **षष्ठीयुक्तश्छन्दसि वा** (पा सू १/४/३) इत्येकस्यैव भाष्यं कृतम्, यत्र प्रश्नोत्तरविधिना विविधाः शङ्काः समुपस्थाप्य तासां समाधानानि दत्तानि। संज्ञाद्वयसम्बद्धानामन्येषां पञ्चानां सूत्राणान्तु भाष्यं न प्राप्यते (पतञ्जलिः ; २०२० : ३४०-३५०)। तत्रैव भाष्ये **यू स्त्र्याख्यौ**

**नदी** इत्यस्य पूरकरूपेण 'प्रथमलिङ्गग्रहणं च' इति कात्यायनकृतं वार्तिकं समाविष्टम् (पतञ्जलिः ; २०२० : ३४०-३५०), यच्च बहुश्रेयसीत्यादौ सूत्रेणाऽप्राप्तस्थलेऽपि नदीसंज्ञां विदधाति ।

वामन-जयादित्याभ्यां स्वविरचितायामष्टाध्यायीसूत्रक्रमानुसारिव्याख्यायां काशिकायां सर्वप्रथमं घिनदीसंज्ञासम्बद्धानां सम्पूर्णसूत्राणां सोदाहरणव्याख्या कृता दृश्यते। ताभ्यां हि तत्र **'यू स्त्र्याख्यावि'**त्यत्र ई च ऊ च = यू, अविभक्तिको निर्देशः इत्युक्त्वा यूशब्देन दीर्घयोरेव ग्रहणमिति प्रतिपादितम्। **शेषो घ्यसखि** इत्यत्र च शेषोऽत्र घिसंज्ञो भवतीत्युक्त्वा कश्च शेषः? इति प्रश्नस्योत्तररूपेण- ह्रस्वमिवर्णोवर्णान्तं यन्न स्त्र्याख्यं, स्त्र्याख्यञ्च यन्न नदीसंज्ञकं, स शेष इति शेषपदार्थ उक्तः (वामन-जयादित्यौ ;१९६५ :५०२-५०९)।

भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां घिनदीसंज्ञयोर्विषये सोदाहरणं व्याख्यातम्। कौमुदी हि पाणिनीयाष्टाध्याय्याःप्रक्रियानुसारिव्याख्याग्रन्थोऽस्ति।अतस्तत्रप्रथमंह्रस्वेकारान्तहरिशब्दरूपावलिसाधन-क्रमे **शेषो घ्यसखी**ति सूत्रोल्लेखपुरःसरं घिसंज्ञाव्यवस्थापनं कृतम् । सुसखिशब्दस्य तु समुदायस्य सखिरूपत्वाभावात् असखीति निषेधाप्रवृत्तेर्घिसंज्ञा इत्युक्त्वा सुसखिना सुसखये इति साधितम् । पतिशब्दरूपावलिसाधनक्रमे **पतिः समास एवेति** सूत्रस्योपस्थापनं कृत्वा समास एव पतिशब्दो घिसंज्ञो भवति, नान्यत्रेति व्यवस्थाप्य **शेषो घ्यसखीति** सूत्रेण प्राप्ता पतिशब्दस्य घिसंज्ञा वारिता (दीक्षितः;२००८:२२-२३)। दीर्घेकारान्तबहुश्रेयसीशब्दरूपावलिसाधनकमे **यू स्त्र्याख्यौ नदी**ति सूत्रं वृत्तिसहितमुपस्थापितम्। नित्यस्त्रीलिङगस्यैव तेन सूत्रेण नदीसंज्ञाविधानात् बहुश्रेयसीशब्दस्य च बहुब्रीहिसमासनिष्पन्नत्वेन पुंलिङ्गतया नदीत्वं न प्राप्नोत्याशङ्क्य **प्रथमलिङ्गग्रहणञ्च** इति वार्तिकमुपस्थाप्य तेनैव नदीसंज्ञा व्यवस्थापिता। (दीक्षितः;२००८:२४)। अजन्तस्त्रीलिङ्गप्रकरणे मतिशब्दरूपावलिसाधनप्रसङ्गे च **ङिति ह्रस्वश्च** इति सूत्रमुपस्थाप्यार्थाप्य च तेन इयङुवङ्स्थानानां स्त्रीशब्दभिन्नानां नित्यस्त्रीलिङ्गानाम् ईदूदन्तानां ह्रस्वेकारोकारान्तानां च स्त्रीलिङ्गशब्दानां ङिति परे विकल्पेन नदीसंज्ञा भवतीति व्याख्यातम्, मतिशब्दस्य नदीत्वविकल्पजन्यवैकल्पिकप्रयोगाश्च प्रदर्शिताः ( दीक्षितः ;२००८:२९ )। श्रीशब्दरूपसाधनप्रसङ्गे च **नेयङुवङ्स्थानावस्त्री** इति सूत्रमुपस्थाप्यार्थाप्य च श्रीशब्दे नदीसंज्ञा निषिद्धा, किन्तु तेन तत्र श्रीशब्दस्य ङिद्विभक्तिषु **ङिति ह्रस्वश्च** इतिसूत्रप्रवृत्तिमप्रदर्श्यैव, श्रियै/श्रिये इत्यादि नदीत्वविकल्पजन्यवैकल्पिकप्रयोगा प्रदर्शिताः। आमि तु **वामि** इति सूत्रमुपस्थाप्य नदीत्वविकल्प उपस्थापितः ( दीक्षितः ;२००८:३० )।

दीक्षितेन प्रौढमनोरमायां **शेषो घ्यसखी**ति सूत्रं व्याख्यातं न दृश्यते। **पतिः समास एवे**त्यत्र एवकारपाठ इष्टतोऽवधारणार्थ इत्युक्त्वा "अन्यथा हि समासे पतिरेवेति" (दीक्षितः ;१९९७:३९८) इत्युक्तम्। एवकारानुक्तौ समासे पतिरेव घिसंज्ञ इत्यर्थस्य सम्भावनायां पतिभिन्नान्तह्रस्वेकारोकारान्तानां महाकविमुरार्यादिसमस्तशब्दानां घिसंज्ञा न सिध्येदिति तद्भावः। तत्र च तेन **'सीतायाः पतये नमः' 'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ'** इत्यादौ प्रयुक्तानां **'पतये', 'पतौ'** इत्यादिप्रयोगाणां साधुत्वप्रतिपादनाय तत्रत्यपतिशब्दस्याख्यातत्वमुक्तम्। तेन हि "पतिः णौ टिलोपे 'अचः इः' इत्यौणादिक इः। अयं पतिशब्दः **पतिः समास एव** इत्यत्र न गृह्यते, लाक्षणिकत्वात् । एतेन **कृष्णस्य सखिरर्जुनः**

इति भारतं **सखिना वानरेन्द्रेण** इति रामायणं च व्याख्यातम्” (दीक्षितः ;१९९७:३९८ ) इत्युक्तम्। दीक्षितमतमिदं चिन्त्यम् ; पत् धातोः पतिशब्दनिर्माणस्याप्रामाणिकत्वात्, तथानिर्मितस्य पतिशब्दस्य भर्त्रर्थकत्वाभावाच्च। **सीतायाः पतये** इत्यादौ च भर्त्रर्थकस्यैव पतिशब्दस्य ग्रहणात्, **पतिः समास एवे**त्यत्रापि भर्त्रर्थकस्यैव पतिशब्दस्य घित्वनिषेधात् ।

नागेशेन लघुशब्देन्दुशेखरे घिनदीसंज्ञाविषये विस्तृतविश्लेषणं विहितम्। तत्र च तेन दीक्षितोक्तं सुसखिना सुसखये इत्यादि हरदत्तानुरोधेनेत्युक्त्वा तत्र घिसंज्ञा न भवतीत्युक्त्वा **पतिः समास एवे**ति सूत्रे “स्मृतिपुराणेषु पतये सखिना इत्यादि व्याकरणानिष्पन्नत्वेनासाध्वेव” ( नागेशः ;२०५३:२४२-२४३) इत्युक्तम्।

जनार्दनहेगडे इत्यनेन शुद्धिकौमुदी लिखिता, यत्र तेन पतये पतौ इत्यदीनामशुद्धत्वमेव प्रतिपादितम्, मनोरमाकारेण यथाकथञ्चित् पतये इत्यादि प्रयोगाणां समर्थनं कृतं, तत्तु अगतिकगतिरेवेति तेनोक्तम् ( हेगडे ; २००८:२४५-२४६ )।

पूवचर्चितैराचार्यैः स्वस्वग्रन्थेषु घिनदीसंज्ञाविषये शास्त्रीयचर्चा विहिता, किन्तु कुत्रचित्तेषां मतभेदोऽस्ति चेत् कुत्रचित् केषाञ्चिन्मतेष्वस्पष्टता शास्त्रीयदृष्ट्याऽसङ्गतता च दृश्यत इति तत्कृतचर्चाणां संयुक्ताध्ययनं कृत्वा समन्वितनिष्कर्षस्थापनस्यावश्यकता दृश्यते। इमामेवावश्यकतां परिपूरयितुं लेखोऽयं निर्मितः।

**अनुसन्धानविधिः**

*अनुसन्धानमिदं मूलतो वर्णनात्मकं, व्याख्यानात्मकं विश्लेषणात्मकञ्च विधिमाधृत्य कृतम्।* अस्मिन्ननुसन्धानेऽवलम्बितोऽध्ययनविधिर्यथा–

**अनुसन्धानस्वरूपम्**

अत्रानुसन्धाने हि पाणिनीयव्याकरणस्य शब्दसाधुत्वप्रक्रियासाधनप्रसङ्गे प्रयुक्तासु विविधसंज्ञास्वन्यतमयोर्घिनदीसंज्ञयोर्विषये प्रकरणसम्बद्धेभ्यो विविधग्रन्थेभ्यः तथ्यरूपाः सामग्रीः सङ्कलय्य तासां वर्णनं, व्याख्यानं विश्लेषणञ्च कृत्वा शब्दात्मको निष्कर्षः स्थापितोऽस्ति। अत एवेदं गुणात्मकमनुसन्धानमस्ति।

**अनुसन्धानस्य क्षेत्रं परिसीमा च**

अस्यानुसन्धानस्य क्षेत्रं शब्दसाधुत्वसाधकं पाणिनीयव्याकरणशास्त्रम्। अनुसन्धानञ्चेदं पाणिनीयव्याकरणशास्त्रस्य प्रक्रियाग्रन्थान्तर्गतप्रयुक्तासु विविधसंज्ञासु मध्ये घिनदीसंज्ञयोर्विमर्शे केन्द्रितमस्तीति पाणिनीयव्याकरणस्याजन्तपुंलिङ्गस्त्रीलिङ्गप्रकरणयोर्घिनदीसंज्ञोपप्रकरणं, तत्रापि संज्ञाद्वयसम्बद्धानि सूत्राणि तद्व्याख्याग्रन्थाश्चास्यानुसन्धानस्य परिसीमानः ।

**तथ्याङ्कसङ्कलनं तत्साधनानि च**

अत्र पाणिनीयव्याकरणान्तर्गतेभ्यः पाणिनीयाष्टाध्यायी-व्याकरणमहाभाष्य-काशिका-वैयाकरणसिद्धान्त-कौमुद्यादिमूलग्रन्थेभ्यस्तद्व्याख्यारूपेभ्यः प्रौढमनोरमा-बालमनोरमा-लघुशब्देन्दुशेखरादिग्रन्थेभ्यश्च घिनदीसंज्ञा-सम्बद्धतथ्यानां सङ्कलनं कृतमिति प्रायः प्राथमिकस्रोतसः कुत्रचिद्द्वितीयकस्रोतसश्च तथ्याङ्कसङ्कलनसाधनानि सन्ति।

## तथ्याङ्कविश्लेषणप्रक्रिया

अत्र विविधस्रोतोभ्यः सङ्कलितानां घिनदीसंज्ञासम्बद्धतथ्याङ्कानां मूलतो वर्णनात्मकं व्याख्यानात्मकञ्च विधिमाधृत्य विश्लेषणं कृतमस्ति। कुत्रचित्तोलनविधिरपि प्रयुक्तः। तथ्यविश्लेषणक्रमे सिद्धान्तस्य पुष्टये यथोचितोदाहरणान्यपि दत्तानि। तत्क्रमे च सर्वप्रथमं सैद्धान्तिकाधारत्वेन घिनदीसंज्ञासम्बद्धां पाणिनीयव्याकरणस्थां व्यवस्थां पुरतः संस्थाप्य, घिनदीसंज्ञयोः पारस्परिकं सम्बन्धञ्च प्रदर्श्य, प्रथमं नदीसंज्ञाविषयकविमर्शं कृत्वा ततो घिसंज्ञाविषयकविमर्शः कृतः। नदीसंज्ञाविषयकविमर्शक्रमे च नदीसंज्ञाविधायकानां **यू स्त्र्याख्यौ नदी** (पा.सू.१/४/३) इत्यादीनां चतुर्णां सूत्राणां, **शेषो घ्यसखि** (पा. सू. १।४।७), इत्यादीनां त्रयाणां सूत्राणां, **तद्**वृत्तिव्याख्यानामुदाहरणानाञ्च विश्लेषणं कृत्वा निष्कर्षो निष्कासितो विद्यते। अतोऽत्र तथ्याङ्कविश्लेषणाय मुख्यतया सोदाहरणवर्णनव्याख्यानात्मकविधिरवलम्बितः।

## अनुसन्धानस्य सैद्धान्तिकपर्याधारः

पाणिनीयव्याकरणशास्त्रेऽष्टाध्याय्याः प्रथमाध्यायस्य चतुर्थपादे नदीसंज्ञायाः घिसंज्ञायाश्च व्यवस्था कृतास्ति । पाणिनिना **यू स्त्र्याख्यौ नदी** (पा.सू.१/४/३), **नेयङुवङ्स्थानावस्त्री** (पा.सू.१/४/४), **वामि** (पा.सू.१।४।५), **ङिति ह्रस्वश्च** (पा.सू.१।४।६) इति सूत्रचतुष्टयेन नदीसंज्ञायाः, **शेषो घ्यसखि** (पा. सू. १।४।७), **पतिः समास एव** (पा.सू.१/४/८), **षष्ठीयुक्तश्छन्दसि वा** (पा.सू.१।४।९) इति सूत्रत्रयेण च घिसंज्ञायाः सुव्यवस्था कृता दृश्यते। तत्र **यू स्त्र्याख्यौ नदी** इति सूत्रेण नित्यस्त्रीलिङ्गानामीकारान्तानां नदीजननीगौरीपृथ्व्यादिशब्दानाम्, ऊकारान्तानां वधूचमूवीरप्रस्वादिशब्दानाञ्च नदीसंज्ञा भवति। बहुश्रेयसीशब्दस्य तु पुंस्त्वेऽपि **प्रथमलिङ्गग्रहणञ्च** (दीक्षितः; २००८:२४) इति वार्तिकेन नदीत्वम्। **नेयङुवङ्स्थानौ०** इति सूत्रेण बाधकाऽबाधितेयङुवङ्स्थितिवतां दीर्घेकारोकारान्तानां शब्दानां नदीसंज्ञा निषिध्यते। इयङुवङौ च **अचि श्नुधातुभ्रुवाम्०** (पा.सू.६।४।७७), **स्त्रियाः** (पा.सू.६।४।७९), इति सूत्राभ्यां विधीयेते। **एरनेकाचो संयोगपूर्वस्य** (पा.सू.७।४।८२) इत्यनेन चानेकाचोऽङ्गस्यान्ते इवर्णान्तोऽसंयोगपूर्वो धातुरस्ति चेत्तस्य धातोरिवर्णस्याजादिप्रत्यये परे इयङुवङोः निषेधं कृत्वा यण् क्रियते। **वाऽऽमि** इति सूत्रेण 'स्त्री'शब्दभिन्नानामियङुवङ्स्थानिनामीकारोकारान्तानां नित्यस्त्रीलिङ्गानां श्री, भ्रू एत्येतादृशानां शब्दानामाम्प्रत्यये परे विकल्पेन नदीसंज्ञा भवति। **ङिति ह्रस्वश्चे**ति सूत्रेण इयङुवङ्स्थानयोः स्त्रीशब्दभिन्नयोर्नित्यस्त्रीलिङ्गयोरीदूतोर्ह्रस्वयोश्चेवर्णोवर्णयोः स्त्रियां वर्तमानयोर्विकल्पेन नदीसंज्ञा क्रियते। **शेषो घ्यसखी**ति सूत्रेण सखिशब्दं वर्जयित्वाऽन्येषां ह्रस्वेकारोकारान्तानां नदीसंज्ञावर्जितानां कवि-भान्वादिशब्दानां घिसंज्ञा क्रियते। **पतिः समास एवे**ति सूत्रेण पतिशब्दस्य समास एव घिसंज्ञा क्रियते। **षष्ठीयुक्तश्छन्दसि वा** इति सूत्रेण **च** षष्ठीयुक्तपतिशब्दस्य वेदानां विषये विकल्पेन घिसंज्ञा क्रियते। इमामेव व्यवस्थां सैद्धान्तिकपर्याधारत्वेनोपयुज्य विविधव्याख्यानां पर्यालोचनां कृत्वा पर्याप्तान्युदाहरणानि सङ्कलय्य च लेखोऽयं निर्मितः।

## घिनदीसंज्ञयोः सम्बन्धः

पाणिनिना घिसंज्ञाप्रकरणादौ **शेषो घ्यसखि** (पा.सू.१।४।७) इति सूत्रं पठितम्। तत्र घिसंज्ञा कुत्र

भवतीति ज्ञातुं शेषपदार्थः असखिपदार्थश्च ज्ञातव्यौ भवतः। तत्र शेषपदार्थं ज्ञातुञ्च घिसंज्ञाविधायकप्रथमसूत्रात्पूर्वतनं नदीसंज्ञाप्रकरणं ज्ञातव्यं भवति। येषां नदीसंज्ञा न भवति, तेषां सखिभिन्नतत्सदृशानां घिसंज्ञेति सूत्रार्थः। एतावता नदीसंज्ञायोग्यातिरिक्तशब्दानामेव घिसंज्ञा भवतीति घिसंज्ञाप्रकरणेन नदीसंज्ञाप्रकरणमपेक्ष्यते। नदीसंज्ञाविधायके **यू स्त्र्याख्यौ नदी**(पा.सू.१/४/३) इत्यादिसूत्रैश्च यू नदीसंज्ञकं भवति, न भवतीति य्वोर्नदीसंज्ञा क्रियते, निषिध्यते च। तत्र इश्च उश्च यू इति, ईश्च ऊश्च यू इति वा ? अथवा द्वयमपि ? **शेषो घ्यसखी**ति सूत्रे शेषपदेन किं गृह्यत इति ज्ञाते सत्येव तदतिरिक्तयोरेवात्र यूशब्देन ग्रहणमिति निर्णेतुं शक्यते। तत्र चासखीति पर्युदासेन सखिभिन्नतत्सदृशानां ह्रस्वेकारवतां, तत्साहचर्याद् ह्रस्वोकारवताञ्च शेषपदेन ग्रहणम्, तत्सामर्थ्याच्च पूर्वप्रकरणे यूशब्देन दीर्घयोरेव ग्रहणमिति समाधीयते। इत्थञ्च घिनदीसंज्ञे परस्परं सम्बद्धे सापेक्षे च स्तः। अत एव नदीसंज्ञा-घिसंज्ञयोः परस्परं सम्बन्धो दृश्यते।

**घिनदीसंज्ञाविषयकविमर्शः**

घिनदीसंज्ञाविषयकविमर्शाय पाणिनिकृतानि तत्तत्संज्ञाविधायकसूत्राणि, तत्तत्सूत्रोपरि विविधैराचार्यैर्विहिताः व्याख्याः, तदनुसारीन्युदाहरणानि चोपस्थाप्य विश्लेषणं क्रियतेऽत्र। पाणिनीयाष्टाध्याय्याञ्च प्रथमं नदीसंज्ञा, ततो घिसंज्ञास्तीत्यत्रापि तत्क्रमेणैव विमृश्यते।

**नदीसंज्ञाविषयकविमर्शः**

पाणिनिना **यू स्त्र्याख्यौ नदी** (पा.सू.१/४/३), **नेयङुवङ्स्थानावस्त्री** (पा.सू.१/४/४), **वामि** (पा.सू.१।४।५), **ङिति ह्रस्वश्च** (पा.सू.१।४।६) इति सूत्रचतुष्टयेन नदीसंज्ञायाः व्यवस्था कृतेति तान्येवात्र वर्णनव्याख्याविश्लेषणविषयीक्रियन्ते–

**यू स्त्र्याख्यौ नदी (पा.सू.१/४/३)**

अत्र 'यू' इत्यस्यार्थः क इति जिज्ञासा। द्विधाऽस्य विग्रहः सम्भवति – इश्च उश्च = यु, तस्मादौविभक्तौ 'यू' इति, अथवा– ईश्च ऊश्च यू। तस्मादौ विभक्तौ 'वा छन्दसि' इति पूर्वसवर्णदीर्घे 'यू' इति। 'दीर्घाज्जसि च' इति निषेधाभावश्छान्दसः। कतमोऽर्थोऽत्र पाणिनिसम्मत इति ज्ञातुञ्चोत्तरसूत्रे **शेषो घ्यसखि** (पा.सू.१।४।७) इत्यत्र शेषपदेन किं गृह्यते ? तदतिरिक्तयोरेवात्र यूशब्देन ग्रहणमिति। **शेषो घ्यसखी**त्यत्र च सखिशब्दवर्जं 'यू' इत्यतः शेषस्य घिसंज्ञाविधानात्, 'असखि' इत्यत्र पर्युदासस्य सत्त्वात् सखिशब्दभिन्नाः सखिशब्दसदृशाः घिसंज्ञकाः स्युरिति सूत्राक्षरार्थः। सादृश्यञ्च तत्र ह्रस्वत्वेनैव, सखिशब्दस्य तथात्वात्। अत एव सखिशब्दभिन्ना ह्रस्वेकारोकारान्ताः घिसंज्ञकाः स्युरिति सूत्रार्थः। इत्थञ्च 'शेष' शब्दस्यार्थस्तत्र हस्वेकारोकारान्ताः इति जातः। अतस्तत्पूर्ववर्तिन्यस्मिन् सूत्रे 'यू' इत्यनेन दीर्घेकारोकारावेव गृहीताविति व्याख्यायते। इत्थञ्च संज्ञासूत्रमिदम् ईकारान्तानूकारान्ताँश्च शब्दानुद्दिश्य नदीसंज्ञां विधत्त इति व्याख्यानबलाज्ज्ञायते। व्याख्यानात्सन्देहनिवृत्तिः सम्भवतीत्यत्र च **व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्** (नागेशः;१९९०:३) इति परिभाषा प्रमाणम्।

अत्र दीर्घेकारोकारयोरेव नदीसंज्ञा भवतीत्यर्थकस्य यू इत्यस्य ग्रहणात् ऋकारान्तान्मातृशब्दाच्चतुर्

थ्येकवचनादौ मात्रे इत्यादि रूपम्। नदीसंज्ञाऽभावात् **आण्नद्याः** (पा.सू.७/३/११२) इत्याडागमो न। स्त्रीलिङ्गौ इत्युक्तत्वाच्च वातप्रमीशब्दस्य न नदीसंज्ञा। अत एव चतुर्थ्यादौ वातप्रम्ये इत्यादि। वातप्रमी मृगविशेषः, पुंलिङ्गः। स्त्रियमाचक्षाते स्त्र्याख्यौ। 'स्त्र्याख्यौ' इति विशेष्यः, 'यू' इति विशेषणम्, अत एव **येन विधिस्तदन्तस्य** (पा.सू.१/१/७२) इति तदन्तविधौ 'यू' इत्यस्य 'ईदूदन्तौ' इत्यर्थः। अत्र च स्त्रीशब्देनैव निर्वाहे सत्यपि आख्याग्रहणान्नित्यत्वलाभः। एतावता सूत्रार्थश्चेत्थम्- **ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्त** इति। आख्याग्रहणलभ्यस्य नित्यत्वलाभस्य फलन्तु ग्रामण्यादेर्व्यावृत्तिः (नागेशः;२०५३:२५४)। ग्रामण्ये इत्यत्र नदीसंज्ञाव्यावृत्तेराडागमो न। ग्रामणीशब्दो हि न नित्यस्त्रीलिङ्गः, अपितु पुंसि, स्त्रियां, नपुंसके च। तत्र नित्यस्त्रीत्वञ्च प्रवृत्तिनिमित्तैक्ये सति लिङ्गान्तरविशिष्टार्थानभिधायकत्वम् (नागेशः;२०५३:२५४–२५५)। यथा ग्रामणी इत्यत्र ग्रामनयनकर्तृत्वरूपस्य प्रवृत्तिनिमित्तस्यैक्ये सत्यपि तस्य त्रिलिङ्गस्थत्वात् लिङ्गान्तरविशिष्टार्थाभिधायकत्वं तत्रास्तीति न तस्य नित्यस्त्रीलिङ्गत्वम्। ङ्यन्तकुमार्यादीनां क्यचि निर्वृत्तेन त्रिलिङ्गेन कुमारीशब्देन समानाकारतया नित्यस्त्रीत्वाभाववारणाय प्रवृत्तिनिमित्तैक्ये इति (नागेशः ;२०५३ :२५५)।

अयम्भावः– तत्र सत्यन्तविशेषणदलाभावे 'कुमारी'शब्देऽव्याप्तिः स्यात्। कुमारी शब्दो हि द्विविधः– प्रथमवयोवाचककुमारशब्दान्ङीषि निष्पन्नः स्त्रीलिङ्गः कुमारीशब्द एकः, 'आत्मनः कुमारीमिच्छति' इत्यर्थे क्यजन्तात्कर्त्तरि क्विपि निष्पन्नस्त्रिलिङ्गः कुमारीशब्दश्चान्यः। उभयोः समानाकारकत्वम्। द्वयोः प्रवृत्तिनिमित्तैक्याभावात् प्रथमकुमारीशब्दे नित्यस्त्रीत्वस्याव्याप्तिर्न।

नदीसंज्ञाफलञ्च **अम्बार्थनद्योर्ह्रस्वः** (पा.सू. ७।३।१०७) **आण्नद्याः** (पा.सू. ७।३।११२) इत्यादिभिः सूत्रैः सम्बोधने ह्रस्वत्वम्, नद्याः परेषां ङितामाट्, **ङेराम्नद्याम्नीभ्यः** (पा. सू. ७।३।११६) इति ङेः स्थाने आमादेशश्च। **आच्छीनद्योर्नुम्** (पा.सू. ७।१।८०) इत्यादौ तु नदीशब्दस्य तदवयवे लक्षणा बोद्धव्या। तेन 'नदीसंज्ञकशब्दावयवे ईकारे परतः सति पूर्वस्य नुमागमः' इत्यर्थकरणेन द्विष्यन्ती दीव्यन्ती इत्यादि सिद्ध्यति।

ननु नित्यस्त्रीत्वस्य यल्लक्षणं कृतम्, तत्स्वीकारे तु बहवः श्रेयस्यो यस्य सः बहुश्रेयसी इत्यत्र बहुश्रेयसीशब्दस्य नदीत्वन्न स्यादित्याशङ्कायां दीक्षितेन 'प्रथमलिङ्गग्रहणञ्चे'ति वार्तिकमुपस्थाप्य व्याख्यातम् (दीक्षितः ;२००८:२४)। प्रथमस्य= समासादिवृत्तिप्रवृत्तेः पूर्वं प्रवृत्तस्य स्त्रीलिङ्गस्य **'यू स्त्र्याख्यौ नदी'**त्यत्र ग्रहणं कर्तव्यमित्यर्थः।

नन्वेवं सति समासादिवृत्त्यभावे गौर्यादिशब्दानां नदीत्वं न स्यादित्याशङ्क्य, अपिशब्दमध्याहृत्य व्याचष्टे दीक्षितः- "पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि इदानीं नदीत्वं वक्तव्यमित्यर्थः" (दीक्षितः ; २००८ : २४) इति। नागेशश्च वार्तिकार्थमाह– "अर्थान्तरसंक्रमात्पूर्व विद्यमानं नित्यस्त्रीत्वमादाय तस्याऽर्थान्तरसंक्रमेऽपि नदीत्वं वक्तव्यमित्यर्थः" ( नागेशः ; २०५३ :२५५) इति।

इत्थञ्च **यू स्त्र्याख्यौ नदी** (पा.सू. १/४/३) इति सूत्रेण नित्यस्त्रीलिङ्गानामीकारान्तानां नदी-अटवी-कुमारी-गृहिणी-जननी-जगती-तन्त्री-धात्री-नगरी-नारी-पत्नी-गौरी-पृथ्व्यादिशब्दानामूकारान्तानां वधू-कर्कन्धू-चमू-श्वश्रू-अतिचमू-वीरप्रस्वादिशब्दानाञ्च नदीसंज्ञा भवति। नित्यस्त्रीलिङ्गस्यैव नदीसंज्ञाविधानात्

ग्रामण्यादिशब्दानां नदीत्वं न। वातप्रमीशब्दस्य तु पुंलिङ्गत्वान्न नदीसंज्ञा। बहुश्रेयसीशब्दस्य तु पुंस्त्वेऽपि प्रथमलिङ्ग-ग्रहणान्नदीत्वम्। प्रथमवयोवाचकस्य कुमारीशब्दस्य नदीसंज्ञा भवति, किन्तु कुमारीमात्मन इच्छतीत्यर्थे क्यजन्तात् कर्तरि क्विपि निष्पन्नस्य त्रिलिङ्गस्य कुमारीशब्दस्य तु नदीसंज्ञा न भवति।

**नेयङुवङ्स्थानावस्त्री (पा. सू. १/४/४)**

इयङ् च उवङ् च इयङुवङौ। तयो: स्थानं = स्थितिर्ययोस्तौ इति बहुव्रीहिसमासः। तच्च अनुवृत्तस्य 'यू' इत्यस्य विशेषणम्। न स्त्री = अस्त्री। स्त्रीशब्दं विहायेत्यर्थः। 'यू' 'नदी' इत्यनुवर्तेते। तथा च सूत्रार्थः– इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तः, न तु स्त्री (दीक्षितः ;२००८ :३०) इति। स्त्रीशब्दादजादिविभक्तौ परतः सत्यामियङ् भवति, अत एवेयङ्स्थानः स शब्दः। अस्त्री इत्यनुक्ते च सति तस्यापि नदीसंज्ञानिषेध आपद्येतेति तत्पदं प्रयुक्तम्। सूत्रोदाहरणत्वेन दीक्षितेनोपन्यस्तम्- हे श्रीः। श्रियम्। श्रियौ। श्रियः। श्रियै / श्रिये। श्रियाः। श्रियः ( दीक्षितः ; २००८ : ३०) इति। अजादौ श्रियौ, श्रियः, श्रियम् इत्यादौ इयङ्योग्यत्वात् अनेन नदीत्वनिषेधः, अत एव च हे श्रीः इत्यत्र **अम्बार्थनद्योर्ह्रस्वः** (पा.सू.७।३।१०७) इति ह्रस्वो नेति भावः। ङिद्विभक्तौ तु अनेन निषेधेऽपि **ङिति ह्रस्वश्चे**ति विकल्पेन नदीसंज्ञायां आटागमे 'श्रियै' इत्यादि। नदीत्वाभावे च 'श्रिये' इत्यादि। अत्र नागेश आह– सा = इयङुवङोः स्थितिश्च, बाधकाऽविषय एव। इयङुवङोर्यत्र बाधकं नास्ति तत्रैवेत्यर्थः। **एरनेकाचोऽसंयोगपूर्वसस्य** (पा. सू.६।४।८२) **ओः सुपि** (पा.सू.६।४।८३) इत्यादिना प्रद्ध्यै खलप्वौ इत्यादौ इयङं उवङं च प्रबाध्य यण् क्रियते। अतस्तत्र इयङुवङोः स्थितिर्नास्ति, अत एव चेयङुवङ्स्थानत्वाभात् प्रधी खलपू इत्येतत्सदृशानां नानेन नदीसंज्ञानिषेधः। निषेधाभावाच्च **यू स्त्र्याख्यौ नदी** (पा.सू.१/४/३) इत्यनेन तयोर्नदीत्वं सिद्ध्यति। 'श्रियौ', 'श्रियः' इत्यादौ तु बाधकाविषयत्वात् इयङः स्थितिरस्ति। 'भ्रुवौ', 'भ्रुवः' इत्यादौ च उवङः स्थितिरस्ति। अतोऽत्रानेन नदीसंज्ञानिषेधः। श्रयति/श्रयते सेवते विष्णुमिति श्रीः। **श्रिञ् सेवायाम्** (धा. ८९७) इत्यस्माद्धातोः **क्विप्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणञ्च** (दीक्षितः ; २००८ : ३२७) इत्युणादिसूत्रेण क्विपि दीर्घे च श्रीशब्दो निष्पद्यते। धातुनिष्पन्नोऽयं शब्दः। अत्र च धात्वयवसंयोगपूर्व ईकारः, एकाच्त्वात्संयोगपूर्वकत्वाच्चात्र **एरनेकाचोऽसंयोगपूर्वसस्य** (पा.सू.६।४।८२) इति इयङपवादरूपो यण् न प्राप्नोति, अनेकाचोऽसंयोगपूर्वसस्येति व्यावृत्तेः। बाधकाविषयत्वाच्चात्रेयङः स्थितिरस्ति। भ्राम्यति नेत्रोपरीति भ्रूः। भ्रम् धातोः **भ्रमेश्च डूः** (दीक्षितः ; २००८ : ३२७) इत्युणादिसूत्रेण डूप्रत्यये भ्रूशब्दो निष्पद्यते। भ्रूशब्दादचि परे च **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (पा.सू. ६।४।७७) इत्युवङ् भवति। अत्र सूत्र एव भ्रूशब्दग्रहणात् तत्रेयङ् केनापि न बाध्यत इति उवङः स्थितिर्निर्बाधा। अत एव 'श्री' 'भ्रू' इत्यादयः शब्दा इयङुवङ्स्थानाः। इयङुवङ्स्थानौ च ईदूदन्तौ नदीसंज्ञौ न भवतः।

अत्र सूत्रे इयङुवङ्स्थित्यधिकरणत्वमुपलक्षणम्, न तु विशेषणम्, व्याख्यानात्। उपलक्ष्यते स्वं स्वेतरच्चानेनेति उपलक्षणम्। काकवन्तो देवदत्तस्य गृहाः, काकेभ्यो दधि रक्ष्यतामित्यादिवत्। अत एव यस्मिन् शब्देऽजादौ प्रत्यये परतः सति इयङुवङोः स्थितिर्दृश्यते, तस्य शब्दस्य इयङुवङ्स्थित्यभाववत्सु हलादिविभक्तिष्वपि नदीसंज्ञा निषिद्ध्यते। विशिष्यतेऽनेनेति विशेष्यधर्म्मो विशेषणम्। इदं हि विशेष्यमन्यस्माद् भेदयति, स्वविशेष्यातिरिक्तञ्च व्यावर्तयति। यथा– अतो दीर्घो यञि (पा.सू.७।३।१०१)

इत्यत्र यञि इति सार्वधातुकस्य विशेषणम्। अत एव भवामि, पचावः, गच्छाम इत्यादौ यञादौ सार्वधातुके परे सत्येव अतोऽङ्गस्य दीर्घो भवति, नान्यत्र– पठति, भवत इत्यादौ। अयमेवोपलक्षणविशेषणयोर्भेदः। इयङुवङ्स्थित्यधिकरणत्वस्योप- लक्षणत्वादेव 'हे श्रीः' इत्यादौ नदीत्वनिषेधसिद्धिः, श्रियौ इत्याद्यजादौ इयङः स्थितिसत्त्वात्। तस्य विशेषणत्वे तु इयङुवङ्स्थित्यधिकरणेऽजादावेव नदीत्वनिषेधसिद्धिः स्यात्, 'हे श्रीः', 'हे लक्ष्मीः' इत्यादौ तु तदभावे नदीत्वमापद्येत। तथा च तत्र **अम्बार्थनद्योर्ह्रस्वः**(पा.सू.७।३।१०७) इति ह्रस्वत्वं, **एङ्ह्रस्वात्सम्बुद्धेः**(पा.सू. ६।१।७९) इति सम्बुद्धिलोपश्चापद्येताम्। एतत्सर्वं विचार्यैवास्य सूत्रस्य फलितार्थमाह नागेशः- "यत्र नदीकार्याश्रयेऽङ्गे बाधकाऽबाधितेयङादिस्थितिः क्वचित् दृष्टा, तस्य तदवयवस्य च नदीत्वनिषेधः। उक्तफलितार्थसत्त्वादेव 'भ्रूः' 'भूः' इत्यादौ नदीत्वनिषेधः सिद्धः। प्रकृष्टा धीर्यस्याः, यस्य वा प्रधीः' इत्यत्र अवयवधीशब्दस्य तु नदीत्वं भवत्येव" (नागेशः ; २०५३: २८०–८१) इति। यद्यपि धियौ, धियः, धियम् इत्यादौ धीशब्दरूपेऽङ्गे इयङ्स्थितिर्दृश्यते, तथापि धी इति नदीसं ज्ञाप्रयुक्तकार्याश्रयमङ्गं नास्ति, प्रधीशब्द एव तादृशमङ्गम्। तत्र च **एरनेकाचोऽसंयोगपूर्वस्य** (पा. सू.६।४।८२ ) इत्यनेन इयङो बाधात् बाधकाबाधितेयङादिस्थितिर्नास्ति। अत एव तत्र नेयङुवङ्स्थानौ इति न नदीसंज्ञानिषेधः। अत एवास्य नदीसंज्ञासिद्धिरिति नागेशाशयः।

बाधकाऽबाधितेयङादिस्थितिः कुत्रकुत्रास्तीति ज्ञातुमियङुवङ्बाधकप्रकरणं ज्ञातव्यं भवति। तत्र **अचि श्नुधातुभ्रुवाम् य्वोरियङुवङौ** (पा.सू.६।४।७७) इत्यनेन अजादिप्रत्यये परे इवर्णान्तस्य उवर्णान्तस्य च धातोरिकारोकारयोरियङुवङौ क्रियेते, 'श्नु' इत्यस्य, 'भ्रू' इत्यस्य चोकारस्योवङ् क्रियते। **स्त्रियाः** (पा. सू.६।४।७९ ) इत्यनेन 'स्त्रीशब्दस्याजादिप्रत्यये परे इयङादेशो भवति। स्त्री+औ=स्त्रियावित्यादि। षष्ठीबहुवचने तु आमो नुडागमे नामो हलादित्वादेतत्सूत्रस्याप्रवृत्तौ स्त्रीणाम् इति। इत्थञ्च स्त्रीशब्देकारस्येयङ् भवतीति शब्दोऽयमियङ्स्थानः। अत एव **नेयङुवङ्** (पा सू १/४/४) इत्यनेन नदी संज्ञानिषेधाभावायास्त्रीत्युक्त्वा नदीत्वनिषेधस्य व्यावर्तनं कृतम्। अत इयङ्स्थानस्यापि शब्दस्यास्य नदीसंज्ञा निर्बाधा। **एरनेकाचोऽसंयोगपूर्वस्य** (पा.सू.७।४।८२) इत्यनेन च यद्यङ्गमनेकाच्, तस्यान्ते यदि इवर्णान्तोऽसंयोगपूर्वो धातुर्विद्यते, तर्हि तस्य धातोरिवर्णस्याजादिप्रत्यये परे यणादेशो भवति। सेनां नयतीति सेनानीः, ग्रामं नयतीति ग्रामणीः। तत्र 'सेना' 'ग्राम' इत्युपपदपूर्वकात् नयार्थकात् 'नी'धातोः क्विप्प्रत्यये सेनानीः ग्रामणीरिति। अनयोश्च शब्दयोः प्रथमाद्विवचने 'सेनानी/ग्रामणी+औ' इत्यत्र **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (पा.सू.६।४।७७ ) इत्यनेन इयङादेशे प्राप्ते तम्प्रबाध्यैतत्सूत्रेण यणि कृते ग्रामण्यौ सेनान्यौ इति। इत्थञ्च सेनानी-ग्रामणीत्यादीनाम् असंयोगपूर्वधात्वन्तानामिवर्णान्तानामङ्गा नामियङ्स्थानत्वं नास्ति, यणा इयङ्बाधात्। अतस्तत्र **नेयङुवङ्०** इति नदीत्वनिषेधो न, तथापि तेषां त्रिलिङ्गत्वेन स्त्र्याख्यत्वाभावात् नदीत्वपाप्तिरेव न।

खलं पुनातीति खलपूः। तस्मादजादिविभक्तौ खलप्वौ, खलप्वः, खलप्वे इत्यादौ **ओः सुपि** (पा. सू. ६।४।८३) इति उवङ्बाधको यणादेशो भवतीत्यत्र बाधकाबाधितोवङ्स्थित्यभावेऽपि त्रिलङ्गत्वेन नित्यस्त्रीत्वाभावान्न नदीसंज्ञा। कटं श्मशानं प्रवते = गच्छतीति कटप्रूः = महादेवः, राक्षसः, प्रेतादयश्च । अत्र तु स्त्रीत्वस्यैवाभावान्नदीत्वशंकापि न। वर्षाभूशब्दश्च मण्डूकार्थे पुल्लिङ्गः, पुनर्नवार्थे स्त्रीलिङ्गः। यद्यपि

वर्षाभूशब्दे **वर्षाभ्वश्चेति** उवङ्‌बाधकयणादेशो भवतीति उवङ्‌स्थितिर्नास्ति, तथापि नित्यस्त्रीत्वाभावादत्रापि न नदीत्वम्। **न भूसुधियोः** (पा.सू.६।४।८५) इत्यनेन भूसुधीशब्दयोरजादिसुप्रत्यये परे यणादेशो निषिध्यते। बाधका-बाधितेयङादिस्थितिसत्त्वाच्च भूसुधीप्रतिभूपरमसुधीत्यादीनां न नदीत्वम्।

प्रधी-सुधी-ग्रामणी-खलपूशब्दानां रूपावलीविषये दीक्षितेन पूर्वाचार्याणां मतानि स्वमतञ्च कौमुद्यां प्रस्तुतम्। तदनुसारेण च- 'पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्व'मिति स्वीकारात् प्रधीशब्दस्य वृत्तिकारादीनां मते लक्ष्मीवद्रूपम्। 'लिङ्गान्तरानभिधायकत्वं त'दिति कैयटमते तु पुंवद्रूपम् (दीक्षितः ; २००८ : ३०) आधीप्रधीशब्दौ क्रियाशब्दत्वेन त्रिलिङ्गत्वात् स्त्रीविषयौ न भवतः, यथैव ग्रामणी-सेनानीशब्दाविति तयोर्नदीसंज्ञया न भाव्यम् (कैयटः; २०२० :३४७ । अत एव तयोः पुंवद्रूपाणि। यदि प्रकृष्टा धीः प्रधीरिति, तर्हि तु  नित्यस्त्रीत्वं सम्भवम्, तदा च तस्य लक्ष्मीवद्रूपाणीति स्वीकर्तुं शक्यते। तत्रापि– अमि शसि च-प्रध्यं प्रध्य इति विशेषः (दीक्षितः ;२००८:३०)। सुष्ठु धीर्यस्याः, सुष्ठु ध्यायति वेति विग्रहे वृत्तिकारमते सुधीशब्दः श्रीशब्दवन्नित्यस्त्रीलिङ्गः, किन्तु तत्र नदीसंज्ञा न, इयङ्‌स्थितिसत्त्वात्। सुष्ठु धीः सुधीरिति विग्रहे तु श्रीवदेव, मतद्वयेऽपि नित्यस्त्रीलिङ्गत्वात् (दीक्षितः ; १९९६ : ३६३)।

इत्थञ्च सुधीशब्दः द्विप्रकारकः– सुष्ठु धीर्यस्याः, सुष्ठु ध्यायति वेति विग्रहवान् नदीसंज्ञारहित एकः, सुष्ठु धीरिति विग्रहवान् नदीसंज्ञायुक्तोऽन्यः। ग्रामणी-कटप्रू-खलप्वादिशब्दानां स्त्रीलिङ्गत्वेऽपि पुंवद्रूपाणि, ग्रामनयनकटप्रवणखलपवनादिक्रियाणां लोके सामान्यतः पुरुषकर्तव्यतया ब्राह्मण्यादिपदान्तरसमभिव्याहारं विना स्त्रीलिङ्गाप्रतीतेः वृत्तिकारादिमतेऽपि नित्यस्त्रीलिङ्गत्वाऽभावादिति कौमुदीकारः (दीक्षितः ;२००८:३०) बालमनोरमाकारश्च  (दीक्षितः ; १९९६ : ३६४)।

**वामि (पा. सू. १।४।५)**

अत्र सूत्रे वा आमीति च्छेदः, अमि नदीकार्याऽभावात्। पदमञ्जरीकारेण हरदत्तमिश्रेण (मिश्रः ; १९६५ : ५०७ ) न्यासकारेण जिनेन्द्रबुद्धिपादेन (बुद्धिपादः ; १९६५ : ५०७ ), शेखरकारेण (नागेशः ;२०५३:२८१) बालमनोरमाकारेण (दीक्षितः ; १९९६ : ३६१)  च विषयोऽयमुत्थाप्य समाहितः। एतावताऽत्र वा आमि / वाऽऽमि इति सूत्रस्वरूपमिति तु सिद्धमेव, तेन सहैव पुरा खण्डाकारप्रयोगो व्यवहारे नासीदित्यपि सूचितम्।

स्त्रीशब्दं वर्जयित्वा इयङुवङ्‌स्थानिन ईकारान्ताः ऊकारान्ताश्च नित्यस्त्रीलिङ्गाः शब्दाः आम्प्रत्यये परे विकल्पेन नदीसंज्ञकाः भवन्तीति सूत्रार्थः। दीक्षितेनापि कौमुद्यां तथैवोक्तम् (दीक्षितः ;२००८:३०) । काशिकाकारादिभिस्त्वस्य निषेधविकल्पत्वमुक्तम् (वामन-जयादित्यौ;१९६५:५०७)। निषेधविकल्पे विधिविकल्प एव फलतीति कृत्वा च कौमुद्यां लाघवात् स एव सूत्रार्थः कृतः (दीक्षितः ;१९९७ : ४३९)। श्री, भ्रू एत्येतादृशानां शब्दानामाम्प्रत्यये परे विकल्पेन नदीसंज्ञा भवति। अत एतेषामाम्प्रत्यये परे रूपद्वयं भवितुमर्हति- नदीसंज्ञायां नुटागमे श्रीणामित्यादि, नदीसंज्ञाऽभावे इयङादेशे श्रियामित्यादि। एवमेव भ्रूशब्दस्यापि 'भ्रूणाम्/भ्रुवाम्' इत्येते द्वे रूपे सिद्ध्यतः। इत्थञ्च श्रीशब्दस्य भ्रूशब्दस्य च आमि परे द्वे द्वे रूपे भवतः।

वाऽऽमीतिसूत्रे 'स्त्र्याख्यौ' 'अस्त्री' इत्यनुवृत्तेः सत्त्वात् स्त्रीशब्दभिन्ननित्यस्त्रीलिङ्गवाचिशब्दविषय एवैतत्सूत्रप्रवृत्तिः । अतः सुश्रीशब्दादामि 'सुश्रियामि'त्येव, स्त्रीशब्दादामि **स्त्रीणामि**त्येव रूपम्।

विभक्ति-सम्बन्धेनेयं नदीसंज्ञा विधीयत इति विभक्तिसम्बन्धिन शब्दरूपस्यैव स्त्र्याख्यस्य नदीसंज्ञा युक्ता, तेन यत्रावयवस्त्र्याख्यस्तत्र नदीसंज्ञा न भवति। यथा- अतिश्रियां ब्राह्मणानाम्, अतिभ्रुवां ब्राह्मणानामिति (बुद्धिपादः ; १९६५ : ५०७ ) ।

**ङिति ह्रस्वश्च (पा.सू. १।४।६)**

अत्र **यू स्त्र्याख्यौ नदी** इति सम्पूर्णसूत्रमनुवर्तते, **नेयङुवङ्स्थानावस्त्री** इति नकारवर्जमनुवर्तते, **वाऽऽमि** इत्यतो वा इति चानुवर्तते। तथा च– इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे इति सूत्रार्थः (दीक्षितः ; २००८ : २९) ।

नागेशस्तु सूत्रमिदं द्विधा विभज्य द्विधार्थं कृतवान्। यथा– अत्र वाक्यद्वयम् ; ङिति इत्येकम्, ह्रस्वश्च इत्येकम्। आद्ये यू इति, स्त्र्याख्यौ इति, अस्त्री इति, इयङुवङ्स्थानौ इति, वा इति चानुवर्तन्ते। अन्त्ये यू इति, वा इति, स्त्रीवाचकौ इत्येतन्मात्रार्थकं स्त्र्याख्यौ इति च (नागेशः ; २०५३:२७४)। तथा च- 'इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ नदीसंज्ञौ वा स्तो ङिति परे' इति प्रथमवाक्यार्थः। द्वितीयवाक्ये इश्च उश्च यू। ह्रस्व इति प्रत्येकमन्वेति। स्त्र्याख्यौ इति पदेन 'स्त्रीलिङ्गौ' इत्येतावदेव विवक्षितम्, न तु 'नित्यस्त्रीलिङ्गौ' इति, व्याख्यानात्। तथा च- स्त्रीलिङ्गौ हस्वौ चेवर्णोवर्णौ नदीसंज्ञौ वा स्तो ङिति परे इति द्वितीयवाक्यार्थः । दीक्षितेन तु वाक्यद्वयमपि संश्लिष्य सूत्रार्थः कृतः।

तत्र नदीसंज्ञाप्रकरणे ह्रस्वयोरप्राप्ते, दीर्घयोस्तु **यू स्त्र्याख्यौ नदी** (पा.सू.१।४।३) इति प्राप्तेऽपि **नेयङुवङ्स्थानावस्त्री** (पा.सू.१।४।३) इति निषेधे प्राप्ते आरब्धत्वात् अप्राप्तविभाषासूत्रमिदम् (दीक्षितः ; १९९७ : ४३१)। सूत्रोदाहरणानि च यथा –

ईकारान्ताः - श्रियै / श्रिये, श्रियाः/श्रियः, अतिस्त्रियै/ अतिस्त्रिये।

ऊकारान्ताः – भ्रुवै / भ्रुवे, भ्रुवाः / भ्रुवः, भ्रुवाम् / भ्रुषु

इकारान्ताः - मत्यै/ मतये, मत्याः / मतेः

उकारान्ताः– धेन्वै / धेनवे, धेन्वाः/धेनोः

अवनति-इष्टि-उन्नति-उत्पत्ति-ऊर्मि-ऋद्धि-कान्ति-कृति-गति-गुप्ति-नीति-प्रकृति-युवत्यादीनां ह्रस्वेकारान्तानां, चञ्चु-तनु-रज्जु-रेणु-लघु-स्नायु-हन्वादीनां ह्रस्वोकारान्तानां शब्दानाञ्चैवमेव रूपाणि।

नदीत्वे **आण्नद्याः**(पा.सू. ७।३।११२) इत्यादि, **आटश्च** (पा.सू. ६।१।९०) इति वृद्धौ दीर्घयोः श्री / भ्रू + ऐ इत्यत्र इयङुवङादेशयोः श्रियै भ्रुवै इति, ह्रस्वयोश्च मति / धेनु + ऐ (आ +ए ) इत्यत्र यणि मत्यै, धेन्वै इत्यादि। नदीत्वाभावे दीर्घयोः श्री / भ्रू + ए इत्यत्र इयङुवङादेशयोः श्रिये भ्रुवे इति, ह्रस्वयोस्तु **शेषो घ्यसखि** (पा.सू. १।४।७) इति घिसंज्ञायां **घेर्ङिति** (पा.सू. ७।३।१११) इति गुणे मते / धेनो + ए इत्यत्र अयवादेशयोः मतये, धेनवे इत्यादि।

स्त्रीशब्दस्य **यू स्त्र्याख्यौ नदी** (पा.सू. १।४।३) इत्यनेन नदीसंज्ञा भवति। तत्र **नेयङुवङ्स्थानावस्त्री** (पा. सू.१।४।४) इत्यनेन तस्य निषेधोऽपि न भवति, अस्त्री इत्युक्तत्वात्। अस्मिन्सूत्रेऽपि 'अस्त्री'त्यनुवृत्तिसत्त्वादनेनापि ङित्प्रत्यये परे स्त्रीशब्दस्य नदीसंज्ञा न विकल्प्यते। अतो ङित्प्रत्यये परेऽपि स्त्रीशब्दस्य

नदीसंज्ञा नित्यैव भवतीति ज्ञातव्यम्। अतः स्त्रीशब्दादेकवचने 'स्त्रियै' इत्येव रूपं सिद्ध्यति। स्त्र्याख्यौ इत्यनुवृत्तिसत्त्वाच्च अग्निभान्वादिषु पुंलिङ्गशब्देषु नास्य प्रवृत्तिः।

ननु इषु, अशनि इत्यादावपि नदीत्वविकल्प इष्टः, नित्यस्त्रीलिङ्गौ इत्युक्ते च न प्राप्नोतीत्याशङ्क्य कैयटेन **ङिति ह्रस्वश्चे**त्यत्र नित्यस्त्रीलिङ्गौ इत्येवंविधो नियमो नाश्रीयते इत्युक्तम्, तत्कथमत्र दीक्षितेन 'नित्यस्त्रीलिङ्गौ' इत्युक्तम् ? इत्याशङ्कायामाह नागेशः– "इष्वादिष्वप्राप्तिमाशङ्क्य ङिति ह्रस्वश्चेत्यत्र नित्यस्त्रीलिङ्गावित्येवंविधो नियमो नाश्रीयत इति कैयटस्तु ह्रस्वांशमात्रविषयः" (नागेशः ; २०५३ : २७४) इति। दीक्षितेनापि प्रौढमनोरमायां "ह्रस्वयोस्तु स्त्रियामित्येव, न तु नित्यस्त्रीत्वपर्यन्तम्, अन्यथा इष्वशनिप्रभृतीनामुभयलिङ्गानां सर्वलिङ्गानां च स्त्रीत्वेऽपि नदीत्वं न स्यात्, कैयटरीत्या नित्यस्त्रीत्वाभावात्... अत एव आख्याग्रहणमपहाय स्त्रीशब्दमात्रं निष्कृष्य सम्बद्ध्यते" (दीक्षितः ; १९९७ : ४३१–४३२) इत्युक्तम्।

इत्थञ्च नदीसंज्ञाविषयकेनानेन विमर्शेन- नित्यस्त्रीलिङ्गानाम् अटवी-नदी-बहुश्रेयसी-कुमारीत्येतादृशानामीकारान्तानां, वधूचमूश्वश्र्वादीनामूकारान्तानाञ्च शब्दानां नित्यनदीसंज्ञा, अतिस्त्री-श्री-भ्रू इत्येतादृशानाम् इयङुवङ्स्थितिवतां नित्यस्त्रीलिङ्गानां दीर्घेकारोकारान्तानां शब्दानाम्, उन्नति-मति-धेनु-कान्ति-कृति-चञ्चु-तनु-रज्जु-प्रभृतीनां ह्रस्वेकारोकारान्तानां शब्दानाञ्च ङिद्विभक्तिषु विकल्पेन नदीसंज्ञा, श्री-भ्रू इत्येतादृशानां संयुक्तवर्णवद्धातुनिष्पन्नानां स्त्रीशब्दातिरिक्तशब्दानाम् आमि परतः विकल्पनेन नदीसंज्ञा, ग्रामणीत्यादीनां त्रिलिङ्गानां, पुंलिङ्गानां, तमात्मन इच्छतीत्यर्थे क्यजन्तात् कर्तरि क्विपि निष्पन्नानां कुमारी सुखी सुती इत्येतादृशानां शब्दानां, भू-सुधीत्यादीनां बाधकाबाधितेयङादिस्थितिवताञ्च नदीसंज्ञा न, कटप्रू-वातप्रमीत्यादीनां स्त्रीत्वाभावात्, वर्षाभू इत्यादीनाञ्च नित्यस्त्रीत्वाभावात् नदीत्वं न। क्रियार्थकयोराधीप्रधी-शब्दयोस्त्रिलिङ्गत्वान्न नदीत्वम्, प्रकृष्टा धीः प्रधीरित्यर्थे तु नित्यस्त्रीत्वात् नदीत्वं सम्भवम्। सुधीशब्दस्य च सुष्ठु धीर्यस्याः, सुष्ठु ध्यायतीति वेत्यर्थे न नदीसंज्ञा, सुष्ठु धीरिति विग्रहे तु नदीत्वमिति निष्कृष्यते।

**घिसंज्ञाविषयकविमर्शः**

पाणिनिना **शेषो घ्यसखि** (पा. सू. १।४।७), **पतिः समास एव** (पा. सू. १/४/८), **षष्ठीयुक्तश्छन्दसि वा** (पा. सू.१.४.९ ) इति सूत्रत्रयेण च घिसंज्ञायाः सुव्यवस्था कृतेति तान्येवात्र विश्लेषणविषयीक्रियन्ते–

**शेषो घ्यसखि (पा. सू. १।४।७)**

शेषः, घि, असखि इति पदत्रयमपि प्रथमैकवचनान्तम्। घि इति संज्ञानुकरणम्, असखि इति च शब्दस्वरूपानुकरणम्। अत उभयमपि नपुंसकलिङ्गम्। अत्र 'यू स्त्र्याख्यौ' इत्यतो 'यू' इत्यनुवर्तते। अत्रानुवृत्तेन यू इत्यनेन च किं बोध्यते ? ह्रस्वेकारोकारौ दीर्घौ वेति विचारणीयः। सखिशब्दवर्जं 'यू' इत्यतः शेषस्य घिसंज्ञेति सरलार्थः। 'असखि' इत्यत्र पर्युदासस्य सत्त्वात् सखिशब्दभिन्नाः सखिशब्दसदृशाःग्राह्याः। सादृश्यञ्च तत्र ह्रस्वत्वेनैव, सखिशब्दस्य तथात्वात्। अत एवात्र यू इत्यनेन ह्रस्वेकारोकारौ बोध्येत इति सिद्ध्यति। इश्च उश्च यू। इवर्णश्च उवर्णश्चेति भावः। 'ङिति ह्रस्वश्चे'त्यतो 'ह्रस्व'इत्यनुवर्तते। तच्च यूभ्यां

प्रत्येकमन्वेति। उक्तान्नदीसंज्ञकादन्यः शेषः। 'शब्दस्वरूप'मित्यध्याहार्यं यूभ्यां विशेष्यते। अतस्तदन्तविधिः। तथा च सूत्रार्थः– 'सखिशब्दं वर्जयित्वा अन्ये ह्रस्वेकारोकारान्ताः नदीसंज्ञावर्जिताः शब्दाः घिसंज्ञकाः भवन्ति' इति। अस्मिन् सूत्रे 'शेष' इत्यनेन शब्देन तेषाम् ह्रस्वेकारोकारान्तानां शब्दानां ग्रहणं भवति, ये नदीसंज्ञकाः न सन्ति। तेषां सर्वेषामनेन सूत्रेण घिसंज्ञा भवति। ते च मुन्यग्न्यतिथ्यरिव्याध्यहि-कवि-कपि-कृमि-गिरि-धूर्जटि-मणि-वनस्पति-हरिहेमाद्रि-भान्वंश्वण्विन्दु-चित्रभानु-तरु-पशु-प्रभु-मनु-मृत्यु-विभु-शत्रु-शम्भु-साध्वादयः।

घिसंज्ञायाः प्रयोजनञ्च– **आङो नाऽस्त्रियाम्** (पा.सू.७।३।१११) इति घेः परस्याङो नाविधानम्, **घेर्ङिति** (पा.सू.७।३।१११) इति ङिति परे घिसंज्ञकस्याङ्गस्य गुणविधानम्, **अच्च घेः**(पा.सू.७।३।११९) इति ङिप्रत्यये परे घिसंज्ञकस्याङ्गस्यान्त्यस्यात्त्वविधानम् ङेरौत्त्वविधानञ्च, **द्वन्द्वे घिः** (पा.सू.२।२।३२) इति द्वन्द्वसमासे घिसंज्ञकस्य पूर्वप्रयोगश्च। अत्र सूत्रे केचन ज्ञातव्याः पक्षाः सन्ति। ह्रस्वेकारोकारान्ताः पुंलिङ्गाः नपुंसकलिङ्गाश्च शब्दाः घिसंज्ञकाः भवन्ति। यथा - मुनि, साधु, वारि, मधु इत्यादयः। ह्रस्वेकारोकारान्ताः स्त्रीलिङ्गाः शब्दाः समासस्थले घिसंज्ञकाः दृश्यन्ते। तत्फलञ्च बुद्धिबलयोरित्यादौ बुद्धिशब्दस्य **द्वन्द्वे घिः** (पा.सू.२।२।३२) इति पूर्वप्रयोगः। ह्रस्वेकारोकारान्ताः स्त्रीलिङ्गाः शब्दाः ङित्प्रत्यये परे तदा एव घिसंज्ञकाः भवन्ति, यदा तेषां नदीसंज्ञा न भवति। यथा– श्रुतिमतिबुद्धिगतिधेनुचञ्चुरज्जुरेण्वादिशब्दे भ्यश्चतुर्थीपञ्चमीषष्ठीसप्तम्येक-वचनेषु ङेङसादिषु **'ङिति ह्रस्वश्च** (पा.सू.१।४।६) इत्यनेन विकल्पेन नदीसंज्ञाविधानात्तदभावपक्षेऽनेन घिसंज्ञा क्रियते। घित्वे च **घेर्ङिति** (पा.सू.७।३।१११) इत्यनेन अङ्गस्य गुणे श्रुतये, श्रुतेः, धेनवे, धेनोरित्यादीन्यपि रूपाणि। सूत्रेऽस्मिन्नेकोऽपवादोऽप्युक्तोऽस्ति- 'सखि'शब्दः। सखिशब्दोऽयं यद्यपि इकारान्तपुंलिङ्गस्तथाप्यस्य घिसंज्ञा न भवति। अत एव सखिशब्दस्य कानिचन रूपाणि मुनिशब्दात् भिद्यन्ते। यथा 'सखि + ङे' इत्यादौ घिसंज्ञायाः अभावात् **घेर्ङिति** (पा.सू.७।३।१११) इत्यनेन अङ्गस्य गुणो न भवति, अतः 'सख्ये', 'सख्युरित्यादिरूपाणि सिद्ध्यन्ति।

नन्वत्र सूत्रेऽसखीति पर्युदासः कृतः, 'सखिशब्दं वर्जयित्वा अन्ये ह्रस्वेकारोकारान्ताः नदीसंज्ञावर्जिताः शब्दाः घिसंज्ञकाः भवन्ति' इति सूत्रार्थे सु = शोभनः सखा सुसखेति सुसखिशब्देऽपि सखिशब्दत्वात् घित्वाऽभावे नात्वादि न प्राप्नोति किम् ? इति जिज्ञासायां जागृतायां दीक्षित आह – "समुदायस्य सखिरूपत्वाभावादसखीति निषेधाऽप्रवृत्तेर्घिसंज्ञा। सुसखिना। सुसखये। ङसिङसोर्गुणे कृते कृतयणादेशत्वाऽभावात् ख्यत्या'दित्युत्त्वं न। सुसखेः" (दीक्षितः ; २००८ : २३) इति । 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इत्यनया परिभाषया अत्र तदन्तविधिर्नास्ति, अतोऽनेन सूत्रेण केवलसखिशब्दस्यैव घिसंज्ञा निषिध्यते ; सुसखि, राजसखि, प्रियसखि इत्येतेषाम् शब्दानाम् घिसंज्ञा भवत्येवेति दीक्षितमतम्।

नागेशस्त्वत्र दीक्षितोक्तं सर्वं हरदत्तानुसारेणेत्युक्त्वा वर्णसंज्ञापक्षे तदन्तसंज्ञापक्षे च सुसखिशब्दस्य घिसंज्ञा न भवतीति प्रतिपादितवान्। एवञ्च सुसखिशब्दस्य घिसंज्ञा नेति नागेशमतं लभ्यते (नागेशः ; २०५३: २४२)। तन्मते च सुसख्या सुसख्ये इत्यादीन्येव रूपाणि। लक्ष्मीटीकाकारेण सभापतिशर्मोपाध्यायेन नागेशमतमनूद्य प्रस्तूयान्तेऽत्र प्राचीनमतमेव ज्याय इति गुरवः (शर्मोपाध्यायः ; १९६६: ३६९) इत्युक्त्वा दीक्षितमतमेव समर्थितम्।

इत्थञ्च मुनिसाधुवार्यादिशब्दानां सर्वत्र घिसंज्ञा, श्रुत्यादिशब्दानां ङित्सु घिसंज्ञा, ह्रस्वेकारोकारान्तस्त्रीलिङ्गशब्दानां ङित्प्रत्यये परे नदीसंज्ञाऽभावपक्षे घिसंज्ञेति ज्ञातव्यम्। सुसखि–अतिसखि–प्रियसखीत्यादिशब्दानां घिसंज्ञाविषय आचार्याणां मतभेदो दृश्यते। अतोऽस्मिन् विषये वैकल्पिकः प्रयोगः कर्तुं शक्य इति मे प्रस्तावः। विद्वांसोऽत्र यथोचितं विभावयन्तु।

**पतिः समास एव (पा. सू. १/४/८)**

त्रिपदमिदेऽस्मिन्सूत्रे पूर्वसूत्रात् **शेषो घ्यसखि** (पा.सू.१।४।७) इत्यस्मात् 'घि' इत्यनुवर्तते। पूर्वसूत्रेणेकारान्तत्वेन पतिशब्दस्य घिसंज्ञायाम् प्राप्तायां सूत्रेणानेन सा नियम्यते। पतिरिति चात्र स्वं रूपमिति परिभाषासूत्रबलात् शब्दस्वरूपार्थकं पदम्। पतिशब्दस्य समासे एव घिसंज्ञा भवति (दीक्षितः;२००८:२३) इति सूत्रार्थः। केवलपतिशब्दस्य तु सा संज्ञा न भवतीत्येतत्सूत्रतात्पर्यम्। अत एव पतिशब्दस्य घिसंज्ञाऽभावात् पत्या, पत्ये इत्यादीनि रूपाणि।

ननु एवकारोऽत्र व्यर्थः, 'भूपतये' इत्यादौ समासस्थले 'शेषो घ्यसखि' इत्येव सिद्धेऽपि प्रकृतसूत्रारम्भसामर्थ्यात् समास एव पतिशब्दो घिसञ्ज्ञ इत्यर्थस्य ज्ञापनादिति चेन्न, इष्टस्यावधारणाय एवकारग्रहणस्यावश्यकत्वात्। अन्यथा 'समासे यदि घिसञ्ज्ञा, तर्हि पतिशब्दस्यैवे'ति विपरीतनियमस्यापि सम्भवात्, अतिथिमहाद्रिमुरारिमहर्षिमहाकपिमहाकविनरहरिवेदध्वनिजलबिन्दुमहामणिदृढमुष्टिशिक्षणविध्यादि-शब्दानां घिसंज्ञाऽनापत्तेः, 'अतिसखेरि'ति भाष्योदाहरणस्याऽसङ्गतेश्च। भाष्ये हि **ख्यत्यात्परस्य** (पा.सू. ६।१।११२) इति सूत्रे (पतञ्जलिः ; १९९९ : ६५५–६५६), **यस्येति च** (पा. सू. ६।४।१४८) इति सूत्रे च 'अतिसखेः' (पतञ्जलिः ; १९९९ : ९५५) इति प्रयोगः कृतः। अत एव सूत्रे एवकार इष्टतोऽवधारणार्थः (नागेशः ; २०५३ : २४३)। अत एव केवलपतिशब्दस्य घिसंज्ञा न भवतीत्येतत्सूत्रतात्पर्यम्। सूत्रञ्चेदं पतिशब्दस्य समासे एव घिसंज्ञा भवति, नान्यथेति नियमयति। यथा– 'पति+ङे' इत्यत्र घिसंज्ञायाः अभावात् **घेर्ङिति** (पा. सू. ७।३।१११) इत्यनेन अङ्गस्य गुणो न भवति, अत **इको यणचि** (पा. सू. ६।१।७७) इति यणादेशे 'पत्ये' इति सिद्ध्यति। 'सेनापति' इत्यस्य तु घिसंज्ञायां मुनिकपिहर्यादिशब्दवत् **घेर्ङिति** (पा.सू.७।३।१११) इति अङ्गस्य गुणे सेनापतये इति। एवं भूपति-प्रजापति-राष्ट्रपति-गणपति-निधिपति-नृपत्ति-अधिपति-नरपति-पशुपत्यादयः।

सूत्रेऽस्मिन् 'समासे' इत्युक्तत्वात् 'बहुपत्या' इत्यादौ बहुच्प्रत्ययपूर्वक'बहुपति'शब्दस्य न घिसञ्ज्ञा। ईषदूनः पतिः बहुपतिः। **विभाषा सुपो बहुच् पुरस्तात्तु** इति बहुच्प्रत्ययः, स च पुरस्तात्। पतिकल्प इत्यर्थः। वस्तुतो न विवाहितः पतिः, किन्तु पतिवद्व्यवहारवान्। अथवा पतिः स्वामी। पतिरिव यः पालयति, किन्तु न पतिः, स बहुपतिः। ननु समासे एव पतिर्घिसंज्ञः' इत्यभिप्रेतनियमपक्षेऽपि सीतायाः पतये नमः (रामरक्षास्तोत्रम् ; श्लो २७), नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ' (पाराशरस्मृतिः ;४:३० ) इत्याद्यार्षप्रयोगविरोधोऽस्त्येव, तत्कथं नियमसमन्वयः ? इति शंकां मनसि निधायोक्तं नागेशेन –

"स्मृतिपुराणेषु 'पतये' 'सखिना' इत्यादि व्याकरणानिष्पन्नत्वेनासाध्वेवे"ति। **सखिना वानरेन्द्रेण** इति रामायणम्, **कृष्णस्य सखिरर्जुन** इति भारतम्। ननु स्मृतिपुराणादिषु यद्यसाधुपाठस्तर्हि तेषां दोषभागित्वं

स्याद्, अस्माकमपि पारायणादौ प्रत्यवायः स्यादित्याशंकायामाह नागेशः- "त्रिशङ्क्वाद्ययाज्ययाजनादाविव तपोमाहात्म्येन असाधुप्रयोगेऽपि ऋषीणां दोषाऽभावात्, याज्ञे कर्मण्येवाऽसाधुप्रयोगे दोषाच्च। अस्माकमपि स्मृतिपुराणाऽध्ययनबलात् तेषां तपोबलाच्च यज्ञमध्येऽपि तदन्तर्गततत्पाठे दोषाभावः। स्वातन्त्र्येणेदृशं प्रयुञ्जाना अस्मदादय : प्रत्यवयन्त्येव। अत एव नदीसंज्ञासूत्रे भाष्ये – छन्दोवत्कवयः कुर्वन्ति' इत्युक्त्वा न ह्येषेष्टिरस्ति' इत्युक्तम्" (नागेशः;२०५३:२४३)। तपोमाहात्म्येन असाधुप्रयोगेऽपि ऋषीणां दोषाऽभावादिति नागेशेन यत्समाधानमुक्तं, तद् अभ्युपेत्यवादेन (परकीयवचनानुरोधेन)। वस्तुतस्तु याज्ञे कर्म्मणि एव असाधुप्रयोगे दोषात् तत्र तेषां दोषाऽभावो बोध्यः।

दुर्घटवृत्तिकारेण तु शेषो घ्यसखीति सूत्रे भिन्नेनैवोपायेनैतत्समस्यासमाधानप्रयत्नो व्यधायि। तदनुसारेण च– असखीत्यत्र अलवणा यवागूरितिवदल्पार्थे नञो विधानात् क्वचित् सखिशब्दस्यापि घिसंज्ञासिद्धिरिति सखिना इत्यादेः साधुत्वम् (शरणदेवः ; १९८५:३८)। 'पतिना नीयमानायाः पुरः शुक्रो न दुष्यति' (बृहद्दैवज्ञरञ्जनम् ;७३ : ३२), 'गते (नष्टे) मृते प्रव्रजिते क्लीबे च पतिते पतौ' (पाराशरस्मृतिः ; ४ : ३० ) इत्यादि तु **पतिः समास एव** (पा. सू.१/४/८) इत्यस्यानित्यत्वात् सिद्ध्यति। तन्मते हि 'शेषो घ्यसखिपती' इति वक्तव्ये पृथक्करणं ह्यनित्यत्वज्ञापनार्थम्। दुहितुः पतौ इत्यत्र च समासे कृते 'विभाषा स्वसृपत्योः' (पा.सू. ६।३।२४) इत्यलुग्विधानाद् विभक्तौ दृष्टायामपि समासत्वादेव पतिशब्दस्य घिसंज्ञा (शरणदेवः ; १९८५: ३९)।

इत्थञ्च पतिः समास एव (पा.सू.१/४/८) इति सूत्रेण सेनापति-भूपति-पशुपत्यादिशब्दानां घिसंज्ञा भवति। स्मृतिपुराणादिप्रयुक्ताः 'पतये' 'सखिना' इत्यादिप्रयोगाः व्याकरणानिष्पन्नत्वेनासाध्वेवे'ति नागेशमत्। शरणदेवमते तु 'पतिना' इत्यादि च **पतिः समास एव** (पा.सू.१/४/८) इत्यस्यानित्यत्वात् सिद्ध्यति। असखीत्यत्र अल्पार्थे नञो विधानात् नगण्यमात्रायामेव (अतिन्यूनस्थलेष्वेव) सखिशब्दस्य घिसंज्ञेति क्वचित् सखिशब्दस्यापि घिसंज्ञासिद्धिरिति सखिना इत्यादेः साधुत्वम् ।

'सीतायाः पतये नमः' 'पतिना नीयमानायाः' इत्यादौ षष्ठीयुक्तस्य पतिशब्दस्य यत्र घित्वजन्यप्रयोगो दृश्यते, तत्र तथाप्रयोगाणां छन्दोवत्कवयः कुर्वन्तीति स्वीकृत्य **'षष्ठीयुक्तश्छन्दसि वा'** इत्यनेन वैकल्पिकघित्वमिति तेषां साधुत्वं साधयितुं शक्यते, किन्तु 'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ' इत्यादौ पतिशब्दस्य घित्वजन्यप्रयोगाणान्त्वसाधुत्वमेवेति नागेशमतं दृश्यते।

### षष्ठीयुक्तश्छन्दसि वा (पा. सू.१।४।९ )

अत्र 'घि', 'पतिः' इत्यनुवृत्तिः। तथा च– षष्ठीयुक्तः पतिः छन्दसि घि वा इत्यन्वयः। संज्ञासूत्रमिदम्। षष्ठीयुक्तः पतिशब्दः वेदानां विषये विकल्पेन घिसंज्ञकः भवतीति सूत्रार्थः। केवलपतिशब्दस्य **पतिः समास एव** (पा.सू.१।४।८ ) इत्यनेन घिसंज्ञानिषेधे प्राप्ते वैदिकप्रयोगे यद्ययं शब्दः षष्ठ्यन्तशब्दस्यान्वय आगच्छति, तर्ह्यस्य विकल्पेन घिसंज्ञायां मुनिशब्दवद्रूपाणि दृश्यन्ते। यथा– रामरक्षास्तोत्रे **'सीतायाः पतये नमः'** (रामरक्षास्तोत्रम् ; २७) इति प्रयोगः प्राप्यते। अत्र पतिशब्दस्य **सीताया** इत्यनेन षष्ठ्यन्तेन शब्देनान्वयोऽस्ति। रुद्राष्टाध्याय्यामनेकत्र पतये इति प्रयोगः कृतः प्राप्यते। यथा– **दि॒शां च॒ पत॑ये॒, पशू॒नां**

**पतंये, वनांनां पतंये, कुलुञ्चानां पतंये** (रुद्राष्टाध्यायी ;५:१६-२२) इत्यादि। अत्रापि पतिशब्दस्य 'दिशाम्' 'पशूनामि'त्यादिषष्ठ्यन्तैश्शब्दैरन्वयोऽस्ति। रामायणस्य सुन्दरकाण्डे **'पर्वतः सरितां पतौ'** (श्रीमद्वाल्मीकीयरामायणम् ;५:५३:३५) इति प्रयोगः प्राप्यते । अत्र पतिशब्दस्य 'सरिताम्' इत्यनेन षष्ठ्यन्तेन शब्देनान्वयोऽस्ति। ऋग्वेदे **क्षेत्रस्य पनिना** वयम् (ऋग्वेदः ; ४:५७: १) इति प्रयोगः प्राप्यते । अत्र पतिशब्दस्य 'क्षेत्रस्य' इत्यनेन षष्ठ्यन्तेन शब्देनान्वयोऽस्ति। इत्थञ्चोक्तेषु स्थलेषु सर्वत्र षष्ठ्यन्तशब्देनान्वयसत्त्वात्पतिशब्दस्य घिसंज्ञा भवति। घिसंज्ञायाञ्च पतिना पतये इत्यादिरूपसिद्धिः।

अनेन सूत्रेण पतिशब्दस्य घिसंज्ञा तदैव क्रियते, यदा तस्यान्वयः षष्ठीवाचकेन शब्देन सहास्ति। अन्या विभक्तिरस्ति चेद् वेदेष्वपि घिसंज्ञा न भवति। यथा विवाहसूक्ते – **एना पत्या तन्वं संसृजस्व...** ( ऋग्वेदः;१०: ८५:२७) **मया पत्या जरदष्टिर्यथासः** (ऋग्वेदः;१०:८५:३६) इति। अत्र पतिशब्दस्य षष्ठीवाचकेन शब्देन सहान्वयो नास्ति, अतोऽत्र पतिशब्दस्य घिसंज्ञाऽभावात्तृतीयैकवचने 'पत्या' इति भवति।

इत्थञ्च घिसंज्ञाविषयकेनानेन विमर्शेन- नदीसंज्ञायोग्यातिरिक्तानां सखिभिन्नतत्सदृशानां ह्रस्वेकारोकारान्तानां मुन्यग्नि-कवि-कपि-वनस्पति-हरि-भान्वंशु-तरु-पशु-मृत्यु-विभु-साध्वादीनां पुंलिङ्गशब्दानां सर्वत्र घिसंज्ञा, ह्रस्वेकारोकारान्तस्त्रीलिङ्गानां श्रुतिमतिधेनुचञ्चुरज्ज्वादिशब्दानां ङित्प्रत्यये परे नदीसंज्ञाऽभावपक्षे घिसंज्ञा, सुसखि-अतिसखि-प्रियसखीत्यादिशब्दानां घिसंज्ञाविषये मतभेददर्शनाद्विकल्पेन घिसंज्ञा कर्तुं शक्या, सेनापति-भूपत्यादीनां पत्यन्तसमस्तशब्दानां घिसंज्ञा, केवलपतिशब्दस्य तु न, 'सीतायाः पतये' इत्यादीनामार्षप्रयोगाणान्तु छन्दोवत्कवयः कुर्वन्तीति स्वीकृत्य 'पष्ठीयुक्तश्छन्दसि वा' इत्यनेन वैकल्पिकघित्वेन साधुत्वमिति निष्कृष्यते ।

**निष्कर्षः**

पाणिनीयव्याकरणे शब्दसाधुत्वप्रक्रियासाधनप्रसङ्गे विविधसंज्ञानां प्रयोगो भवति, यासु घिनदीसंज्ञेऽप्यन्यतमे स्तः। तत्र **शेषो घ्यसखि** (पा सू १। ४। ७) इति घिसंज्ञाविधायके सूत्रे शेषपदार्थं ज्ञातुं पूर्वतनं नदीसंज्ञाप्रकरणं ज्ञातव्यम्, यतो हि नदीसंज्ञायोग्यातिरिक्तशब्दानामेव घिसंज्ञा भवतीति घिसंज्ञाप्रकरणेन नदीसंज्ञाप्रकरणमपेक्ष्यते। नदीसंज्ञाविधायके **यू स्त्र्याख्यौ नदी**(पा.सू.१/४/३) इत्यादिसूत्रैश्च यू नदीसंज्ञकं भवति, न भवतीति य्वोर्नदीसंज्ञाविधानात् तत्र यूशब्देन ह्रस्वयोरिकारोकारयो दीर्घयोर्वा ग्रहणमिति सन्देहो जायते। **शेषो घ्यसखी**ति सूत्रे असखीति पर्युदासेन सखिभिन्नतत्सदृशानां ह्रस्वेकारवतां, तत्साहचर्याद् ह्रस्वोकारवताञ्च शेषपदेन ग्रहणम्, तत्सामर्थ्याच्च पूर्वप्रकरणे यूशब्देन दीर्घयोरेव ग्रहणमिति समाधीयते। इत्थञ्च घिनदीसंज्ञे परस्परं सम्बद्धे सापेक्षे च दृश्येते। तत्र नदीसंज्ञाप्रकरणे च इयङुवङोः प्रसक्तिरपि ज्ञातव्येति प्रकरणमिदं संश्लिष्टमत एव क्लिष्टमप्यस्ति। अत एव द्वयोरपि संज्ञयोर्विषये व्याख्या-विश्लेषणात्मकविधिना संयुक्तविशिष्टाध्ययनं कृतम्। अनेनाध्ययनेन प्राप्तो निष्कर्षश्चात्र प्रस्तूयते–

नित्यस्त्रीलिङ्गानामीकारोकारान्तानां नदीजननीवधूचम्वादिशब्दानां **यू स्त्र्याख्यौ नदी (**पा सू **१/४/३)** इति नदीसंज्ञा भवति। नित्यस्त्रीलिङ्गस्यैव नदीसंज्ञाविधानात् ग्रामण्यादिशब्दानां नदीत्वं

न। बहुश्रेयसीशब्दस्य तु पुंस्त्वेऽपि प्रथमलिङ्गग्रहणान्नदीत्वम्। प्रथमवयोवाचकस्य कुमारीशब्दस्य नदीसंज्ञा भवति, किन्तु कुमारीमात्मन इच्छतीत्यर्थे क्यजन्तात् कर्तरि क्विपि निष्पन्नस्य त्रिलिङ्गस्य कुमारीशब्दस्य तु नदीसंज्ञा न भवति। बाधकाऽबाधितेयङुवङ्स्थितिवतां दीर्घेकारोकारान्तानां भूसुधीप्रतिभूपरमसुधीशब्दानां सर्वत्र, श्रीशब्दस्य च प्रथमैकवचने सम्बोधनैकवचने च **नेयङुवङ्स्थानावस्त्री**ति नदीसंज्ञा निषिध्यते। स्त्रीशब्दभिन्नानामियङुवङ्स्थानिनामीकारोकारान्तानां नित्यस्त्रीलिङ्गानां श्री, भ्रू इत्येतादृशानां शब्दानामाम्प्रत्यये परे **वाऽऽमी**ति विकल्पेन नदीसंज्ञा भवति। अतिस्त्रीश्रीभ्रुवादिदीर्घेकारोकारान्तानां, कान्ति-कृति-गति- मति-धेनु-रज्जु-रेणु-लघ्वादीनां ह्रस्वेकारोकारान्तानां शब्दानां **ङिति ह्रस्वश्च** (पा.सू.१।४।६) इति विकल्पेन नदीसंज्ञा भवति। सखिशब्दं वर्जयित्वाऽन्येषां ह्रस्वेकारोकारान्तानां नदीसंज्ञावर्जितानां मुन्यहि-कवि-कपि-हेमाद्रि-भान्विन्दु-चित्रभानु-तरु-विभु-शत्रु-शम्भु-साध्वादिशब्दानां **शेषो घ्यसखि** (पा.सू.१।४।७) इति घिसंज्ञा भवति। असखीत्युक्तत्वात् सखिशब्दस्य घिसंज्ञा न भवति। केवलसखिशब्दस्य घिसंज्ञानिषेधेऽपि सुसखि-राजसखि-प्रियसखीत्येतेषां घिसंज्ञा भवत्येवेति दीक्षितमतम्, न भवतीति नागेशमतं लभ्यते । आचार्याणां मतभेदकारणाद् वैकल्पिकः प्रयोगः कर्तुं शक्यः। पतिशब्दस्य तु **पतिः समास एव** (पा. सू. १/४/८) इत्यनुशासनात्समास एव घिसंज्ञा भवति, केवलपतिशब्दस्य तु न। सूत्रेऽस्मिन्निष्टस्यावधारणायैवकारग्रहणाद् भूपतिपशुपत्यादीनां पत्यन्तसमस्तशब्दानाम्, अतिथिमहाकव्यादीनां पतिभिन्नह्रस्वेकारान्तसमस्तशब्दानाञ्च घिसंज्ञा सिद्धा। स्मृतिपुराणादिप्रयुक्ताः **पतये सखिना** इत्यादिप्रयोगाणां नागेशमतेऽसाधुत्वमेव, शरणदेवमते तु तेषां साधुत्वम् । 'सीतायाः पतये' इत्यादौ षष्ठीयुक्तस्य पतिशब्दस्य घित्वजन्यप्रयोगस्तु छन्दोवत्त्वेन **'षष्ठीयुक्तश्छन्दसि वा'** इत्यनेन वैकल्पिकघित्वात् साधुरेव । **पशूनां पतंये, क्षेत्रस्य पतिना** इत्यादिप्रयोगाः प्राप्यन्त एव वेदेषु। षष्ठ्यन्यविभक्तियोगे तु वेदेष्वपि केवलपतिशब्दस्य न घिसंज्ञा, अतो लौकिकप्रयोगे केवलपतिशब्दस्य घिसंज्ञा न भवतीति पतिनेत्यादिप्रयोगोऽस्मदादिभिर्न कर्तव्य इति निष्कृष्यते।

**कृतज्ञताज्ञापनम्**

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च परामर्शं प्रदाय महदुपकारं कृतवद्भ्यो विज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च सश्रद्धं सधन्यवादञ्च कृतज्ञतां व्यनज्मि।

**सन्दर्भग्रन्थसूचीः**

ऋग्वेदसंहिता ( ई.१९३६), *श्रीमत्सायणाचार्यविरचितभाष्यसमेता,* २–५ मण्डलात्मको द्वितीयो भागः, पूना, भारतः : वैदिकसंशोधनमण्डलम्, तिलक–महाराष्ट्र–विद्यापीठम्।

ऋग्वेदः, *श्रीमत्सायणाचार्यविरचितभाष्यसमेतः,* १० मण्डलात्मको भागः, ऋग्वेदः (विकिस्रोतःhttps://sa.m.wikipedia.org)

कैयटः; (२०२०) *भाष्यप्रदीपः,* पतञ्जलिविरचितं व्याकरणमहाभाष्यम् ( द्वितीयो भागः ), रोहतक : हरयाणा– साहित्य-संस्थानम्।

दीक्षितः, भट्टोजिः (ई २००८), *वैयाकरणसिद्धान्तकौमुदी* (मूलमात्रम्, पु.मु.सं.), वाराणसी : चौखम्बा विद्याभवन।

दीक्षितः, भट्टोजिः (ई १९९७), *प्रौढमनोरमा* (चतुर्थ संस्क.), वाराणसी : वाणीविलास प्रकाशन।

दीक्षितः, वासुदेवः(व्या) (ई १९९६), *वैयाकरणसिद्धान्तकौमुदी*, बालमनोरमाव्याख्यया समलङ्कृता, कारकान्तः प्रथमो भागः, वाराणसी : चौखम्बा सुरभारती प्रकाशन।

नागेशः(२०५३), *लघुशब्देन्दुशेखरः* (अव्ययीभावान्तः) , वाराणसी : चौखम्बा संस्कृत संस्थान।

नागेशः(२०५३), *परिभाषेन्दुशेखरः* (अव्ययीभावान्तः) , वाराणसी : चौखम्बा सुरभारती प्रकाशन।

पतञ्जलिः (ई १९९९) *व्याकरणमहाभाष्यम्*, षष्ठोऽध्यायः, दिल्ली : प्रतिभा प्रकाशन।

पतञ्जलिः ; (वै २०२०), *व्याकरण-महाभाष्यम्*, द्वितीयो भागः, रोहतक : हरयाणा-साहित्य-संस्थानम्।

पाणिनीयसूत्रपाठः (अष्टाध्यायी ) (२०४७), हरिवंशकुमारपाण्डेयः (सम्पा), वाराणसी : भारतीय विद्या संस्थान ।

पाराशरस्मृतिः (संस्क. २, ई १९९८) , वाराणसी : चौखम्बा विद्याभवन।

बुद्धिपादः, जिनेन्द्रः (ई१९६५) *न्यासापरपर्यायकाशिकाविवरणपञ्चिका*, काशिकावृत्तिः, वाराणसी : प्राच्यभारतीप्रकाशनम् ।

बृहद्दैवज्ञरञ्जनम् (ई १९९९), *रामदीनपण्डितसङ्गृहीतम्*, बम्बई : खेमराज श्रीकृष्णदास प्रकाशन।

मिश्रः, हरदत्तः (ई१९६५) *पदमञ्जरीव्याख्या*, काशिकावृत्तिः, वाराणसी : प्राच्यभारतीप्रकाशनम् ।

रामरक्षास्तोत्रम् (संस्क. ३०, २०४१ ), बुधकौशिकविरचितम्, गोरखपुर : गीताप्रेस।

रुद्राष्टाध्यायी (२०७२), गोरखपुर : गीताप्रेस।

वामन–जयादित्यौ (ई १९६५), *काशिकावृत्तिः*; वाराणसी : प्राच्यभारतीप्रकाशनम् ।

शब्दकल्पद्रुमः, एन्ड्रोइडसंस्करणम् ।

शरणदेवः (१९८५), *दुर्घटवृत्तिः*, वाराणसी : रत्ना पब्लिकेसन्स, कमच्छा।

शर्मोपाध्यायः, सभापति (व्या.) (ई १९६६), *वैयाकरणसिद्धान्तकौमुदी*, लक्ष्मी व्याख्योपेता, द्वितीयांशः, वाराणसी : मोतीलाल बनारसीदास ।

श्रीमद्वाल्मीकीयरामायणम् (संस्क. ११, २०४९) , द्वितीयो भागः, गोरखपुर : गीताप्रेस, गोविन्द भवन कार्यालय ।

हेगडे, जनार्दन: (२००८) , *शुद्धिकौमुदी* ( परिष्कृतं परिवर्धितं संस्करणम् ) बेङ्गलूरु : संस्कृतभारती।

# मुक्तौ प्रमेयतत्त्वज्ञानहेतुविचारः

**तुलसीपौडेलः**

उपप्राध्यापकः, न्यायविभागस्य

पिण्डेश्वरविद्यापीठम्, धराननगरम्, नेपालः।

Email : - shubharahos@gmail.com

**लेखसारः**

अस्मिन् शोधालेखे न्यायशास्त्रे प्रतिपादितानां मोक्षोपयोगित्वेन निर्दिष्टानां द्वादशप्रमेयाणां विशेषतो मोक्षहेतुत्वेन प्रतिपादनमस्ति। न्यायसूत्रे आत्मादयो द्वादशः पदार्थाः प्रमेयत्वेन गृह्यन्ते। ते च आत्मा, शरीरम्, इन्द्रियाणि, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्याभावः, फलम्, दुःखम्, अपवर्गश्चेति। कथमेतेषामेव प्रमेयत्वेन ग्रहणं क्रियत इति अस्मिन् शोधालेखे विवेचितं वर्तते। तथा च प्रमेयाणां निरूपणम्, मुक्तौ प्रमेयतत्वानां ज्ञानम्, तस्य हेतुता मुक्तौ भवति न वेति शोधालेखस्य प्रतिपाद्यो विषये वर्तते। सर्वमपि विचारः प्रामाणिकग्रन्थानुसारं विहितमस्ति। एतस्मिन् विषये विशेषान्वेषणम् अस्मिन् शोधालेखे कृतमस्ति। प्रमेयाणां व्याख्या विश्लेषणञ्च प्रचलितपद्धतिमनुसृत्यैव कृतमस्ति। ताः पद्धतयः आगमननिमनविश्लेषणादयो वर्तन्ते। न्यायदर्शनपरिचयपूर्वकं न्यायसम्मतप्रमेयं सम्यग् समालोच्य मुक्तौ आत्मादिप्रमेयपदार्थानां यथार्थज्ञानमावश्यकमिति निष्कर्षो विहितास्य शोधालेखस्य।

**शब्दकुञ्जी** – प्रमेयः, निश्रेयस्, मोक्षः, तत्त्वज्ञानम्, आत्मा।

**विषयपरिचयः**

प्रेक्षार्थकदृशिर्धातोः भावे करणे चार्थे ल्युट्यनादेशे दर्शनशब्दो निष्पद्यते। विवेचकैः दर्शनशब्दस्य विवेचना विविधया पद्धत्या विभिन्नार्थेषु च कृता दृश्यते। तेष्वर्थेषु 'दृश्यते ज्ञायते अनेन इति' करणार्थे निष्पन्नः दर्शनशब्दः विशेषप्रयुक्तो दृश्यते। अनया व्युत्पत्त्या दर्शनशब्दस्यार्थः ज्ञानस्य साधनं भवति। प्रसङ्गात् कतिपयावस्थासु दर्शनशब्दस्यार्थः दृष्टिः ज्ञानमपि क्रियते। प्रदर्शितव्युत्पत्त्यनुसारेण – दर्शनं नाम यथाश र्थज्ञानस्य साधनम्। अनया व्युत्पत्त्या – येन साधनेन समस्तवस्तूनां यथार्थज्ञानं जायते तदेव दर्शनमिति

दर्शनशब्दस्यार्थः प्रस्फूटितो भवति। तानि च दर्शनानि असंख्यकानि, तथापि मुख्यत्वेन द्वादशदर्शनानि सुप्रसिद्धानि। तेष्वपि च आस्तिकनास्तिकभेदेन दर्शनद्वयमुपलभ्यते। वेदस्य प्रामाण्यमङ्गीकृत्य तदनुकूलसिद्धान्तप्रतिष्ठापकानि दर्शनानि आस्तिकदर्शनानि। वेदस्य प्रामाण्यमनङ्गीकृत्य तद्विपरीतमतप्रतिष्ठापकदर्शनानि च नास्तिकदर्शनानि भवन्ति। तथा च नास्तिकदर्शनानि चार्वाकदर्शनम्, बौद्धदर्शनम् जैनदर्शनम् चैतानि लोके सुप्रसिद्धानि सन्ति। एतेषामेव नास्तिकशब्देन लोके व्यवहारः क्रियते। नास्तिकदर्शने बौद्धदर्शनस्यापि माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकेति चत्वारो भेदा वर्तन्ते। तानि च आहत्य षट्संख्यकानि नास्तिकदर्शनानि। न्यायवैशेषिकसांख्ययोगमीमांसावेदान्तदर्शनानि आस्तिकदर्शनानि। तेषु आस्तिकदर्शनेषु न्यायवैशेषिकयोः सर्वशास्त्रोपकारकत्वात् दर्शनक्षेत्रे महत्त्वं सातिशयं गौरवास्पदमस्ति। तत्र गौतमप्रणितं न्यायशास्त्रं साम्प्रतं पौरस्त्यदर्शनस्य प्रवेशमार्गो वर्तते। न्यायपथानुगमनेन पौरस्त्यवाङ्मयस्य यथार्थबोधो जायत इति। साम्प्रतं न्यायदर्शनमाश्रित्य मुक्तौ प्रमेयतत्त्वज्ञानहेतुविचारः इति शीर्षकमादाय शोधलेखलेखनप्रारम्भात् न्यायदर्शनस्य सङ्क्षेपेण परिचयः प्रस्तूयते।

**न्यायदर्शनम्**

इदं दर्शनमत्यन्तं प्राचीनतमम्। नि-उपसर्गपूर्वक-गत्यर्थकात् इण् धातोः भावार्थे करणार्थे वा घञ् प्रत्यये जाते न्यायशब्दो निष्पद्यते। न्यायदर्शनस्यास्य प्रवर्तक आचार्यः गौतमो वर्तते। अस्यैवापरा संज्ञा अक्षपादोऽपि प्रचलितो विद्यते। अनेन सर्वप्रथमं न्यायसूत्रं विरचितम्। तदातनतः अधुना यावत् न्यायशास्त्रस्य निर्मला धारा गण्डकीव निरवच्छिन्नगत्या भुवि प्रचलन्ती दृश्यते। 'नीयते प्राप्यते यथार्थवस्तुज्ञानम्' येन स न्यायः इति न्यायशब्दस्यार्थः। भाष्यकारेण प्रमाणैरर्थपरीक्षणं न्याय इति भाष्ये प्रतिपादितमस्ति (न्यायभाष्यम्, ई.१९८६, पृ.४)। लोके न्यायशब्दस्य प्रयोगो दृष्टान्तार्थाय अपि कृतो दृश्यते। यथा सुन्दोपसुन्दः, काकतालीयः इति। लौकिकन्यायार्थाय अपि प्रयोगो मिलति यथा– बीजाङ्कुरन्यायः प्रशिद्धो वर्तते। परन्तु ते अर्थाः दर्शनस्य नैव पोषकाः। न्यायशब्दस्य निर्वचनादिकं न्यायभाष्ये विशेषरूपेण प्रतिपादितं दृश्यते। भाष्यकारेण न्यायस्यैवापरं नाम आन्वीक्षिकीशास्त्रमिति उक्तम्। 'प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्तते इत्यान्वीक्षिकी' (न्यायदर्शनम्, पृ. ०४ )। कतिपयस्थलेषु न्यायशास्त्रस्य तर्कशास्त्रत्वेन व्यवहारः कृतोऽपि दृश्यते । अन्नंभट्टेन केशवमिश्रेण च तर्कशब्दस्यैव प्रयोगं विधाय स्वकीयग्रन्थस्य संज्ञा निर्धारिता। तर्कसंग्रहकारस्य व्याख्यातृणा तर्कस्य निर्वचनम् – 'तर्क्यन्ते प्रमितिविषयी क्रियन्ते' इति विहितमस्ति (तर्कसंग्रहः, पृ.२ )। तर्कस्य शास्त्रं तर्कशास्त्रम्। तदेव न्यायशास्त्रम्। न्यायविद्या हेतुविद्या च कथ्यते। एतावता च विमर्शणेन न्यायशास्त्रस्य तर्कशास्त्रम्, आन्वीक्षिकी, हेतुविद्या च एतानि नामानि पर्यायत्वेन प्रचलितानि दृश्यन्ते।

एतादृशस्य न्यायशास्त्रस्य विकाशः प्राचीननव्यभेदेन द्विविधया पद्धत्या चाभूदिति। प्राचीनन्याये पदार्थनिरूपणं विशेषतः क्रियते। अतः एव तत्वज्ञानविषयकमीमांसा प्राचीनन्यायस्य प्रतिपाद्यो विषयः। नव्यन्याये प्रमाणमीमांसायाः महत्तरं विवेचनं कृतं दृश्यते। प्रमाणानां गभीरविवेचनम्, लक्षणपरिष्कारशैली, भाषापरिष्करणञ्च नव्यन्याये दृश्यते। एतादृशं न्यायशास्त्रं सर्वविद्यानां प्रदीपत्वेन लोके सुपरिचितोऽपि वर्तते। उक्तञ्च न्यायभाष्ये– प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां विद्योक

देशे प्रकीर्तिताः।। (न्यायभाष्यम्, ई.१९८६, पृ. ८)। न्यायशास्त्रस्य प्रदीपकत्वं सर्वैरपि अनुभूतो विषय एव। न्यायशास्त्राध्ययनं विना शास्त्रान्तरे प्रवेशः क्लेशकरोऽनुभूयते। तेन न्यायशास्त्रस्य प्रदीपकत्वं सिद्ध्यतीति। न्यायशास्त्रं विना नास्तिकानां कुतर्कानां निरसनमपि क्लेशकरमेव भवति सर्वदैव। एतदर्थमपि न्यायशास्त्रस्योपयोगित्वं सर्वथा सुग्राह्यमेव। न्यायदर्शनस्य मुख्योद्देश्यं नास्तिकमतखण्डनपूर्वकं वेदसंरक्षणमस्ति। तदतिरिक्तं न्यायस्य भाषाशैल्यादयोऽनुकरणीया वर्तन्ते। सर्वैरपि दर्शनशास्त्रकारैः न्यायशास्त्रानुकरणं कृतमेव। एवञ्च न्यायदर्शनस्य मुख्योद्देश्यत्वेन परमनिःश्रेयस् अपि गृहीतं भवति। सूत्रकारेणैव तस्य न्यायशास्त्रस्य मुख्योद्देश्यत्वेन निर्दिष्टमस्ति (न्या.सू १।१।१)। मुक्तिः निश्रेयसः मोक्षः एते समानार्थकाः। मोक्षस्य कृते तावत् प्रमाणैः प्रमेयादिपदार्थपरिशीलनं प्रथमं कर्तव्यम्। तेन परीशीलनेन मननेन वा प्रमाणप्रमेयादिषोडशपदार्थानां तत्त्वज्ञानं भवति। तेषां तत्त्वज्ञानान्तरं मोक्षप्राप्तिर्भवतीति सूत्रकारस्य वचनम्। प्रमेयत्वेन सर्वमपि पदार्थजातं स्वीकर्तुं शक्नुमः। तथापि तत्त्वज्ञानस्योपकाराय न्यायदर्शने आत्मादिद्वादशप्रमेयाणि प्रतिपादितानि। एतेषां प्रमेयाणां प्रतिपादनं दर्शनेऽस्मिन् महत्त्वपूर्णविषयत्वेन गृह्यते। अत्र च विचारणीयो विषयोऽयं न केवलं न्यायशास्त्रे अपितु पौरस्त्यदर्शनेष्वपि प्रमेयाणां महत्त्वं विशेषेण वर्तते। साङ्ख्याचार्येण ईश्वरकृष्णेनोक्तम् यत् प्रमेयाणां सिद्धिः प्रमाणद्वारा एव भवतीति। एवञ्च प्रमेयाणां सङ्केतः श्रीन्यायभास्यकारैरपि भाष्यारम्भे कृतं वर्तते यथा- 'प्रमाणतोऽर्थः प्रतिपत्तौ प्रवृत्तिसामर्थ्यात्' इति (न्यायभाष्यम्, पृ. १)। अत्र अर्थशब्देन प्रमेयाणां सङ्केतः कृतो वर्तत इति। अनेन च ज्ञायते प्रमेयज्ञानाय प्रमाणस्य प्रवर्तनमभूदिति। तेन प्रमेयपदार्थः मुख्यः। तस्य साधनं प्रमाणम् इति। तथैव प्रमेयः साध्यस्थले वर्तमानो दृश्यते सर्वत्र दर्शनशास्त्रे। अस्य शब्दस्यार्थः – प्रमाया विषय प्रमेय इत्येव भवति। भाष्यकारैरुक्तं यत् – योऽर्थः प्रमीयते तत् प्रमेयम्। (न्यायभाष्यम्, पृ.३) अर्थात् यः पदार्थः ज्ञानविषयी भवति तत् प्रमेयम्। अनया सर्वमपि पदार्थजातं प्रमेयत्वेन व्यवहृतं भवति, यदुपरि उक्तं तदनेनेन प्रमेयनिर्वचनेन लभ्यते। । परन्तु मुक्त्यर्थं सकलवस्तुज्ञानोपादानं नैवावश्यकम्। तथा च तदर्थमाचार्येण गौतमेनैव द्वादशानां आत्माशरीरेन्द्रियार्थबुद्धमनःप्रवृत्तिदोषप्रेत्याभावफलदुःखापवर्गानां ज्ञानं विशेषहेतुः भवतीति प्रतिपादनाय प्रमेयरूपेण पृथगुपदिष्टम् (न्या.सू. १।१।९)। प्रमेयत्वेन आत्मादिपदार्थानां ज्ञानमावश्यकमस्तीति न्यायदर्शने प्रतिपाद्यते। परन्तु अत्र विशेषज्ञानाय एतेषां महत्वप्रतिपादनाय तथा सूचितमिति दृश्यते। तथा च न्यायशास्त्रे प्रमाणादिषोडशपदार्थानां तत्वज्ञानात् निश्रेयसः प्राप्तिर्भवतीति वर्ण्यते। ते प्रमाणादिपादार्था अधुना विषयगौरवात् नैव चर्च्यन्ते। तत्वज्ञानानन्तरं यः मोक्षलाभो भवति सः कीदृशः इति विचार्यते चेत् तस्य कृते श्रीमता सूत्रकारेणैव उक्तम् – 'तदत्यन्तविमोक्षऽपवर्गः' (न्या. सू. १।१।२२।)। सूत्रस्थितेन तत्-शब्देन दुःखस्य ग्रहणं भवति। तस्माद् विमुक्तिः अपवर्गो भवति। तथा च न्यायदर्शनस्य मोक्षः सुखदुःखानुभवविहीनो भवतीति। भासर्वज्ञं विहाय सर्वैरपि नैयायिकैः मोक्षस्य एवमेवास्था स्वीक्रियते। कतिपयैश्च दार्शनिकैः न्यायवैशेषिकस्य मोक्षावस्थायाः एतादृशीं स्थितिं विज्ञाय तस्याः परिहासः क्रियते।

मुक्तौ प्रमेयतत्त्वज्ञानहेतुमधिकृत्य प्रकारान्तरेण बाहुल्येनैव च प्राच्यार्वाच्यैः विद्वद्भिश्च शोधानुसन्धानं विहितं दृश्यते। तत्र च डा. दयाशङ्करशास्त्रिवर्येण मिथ्याज्ञानं हि संसारकारणम्, तस्य विनाशद्वारा

अपवर्गस्य प्राप्तिर्भवतीति प्रतिपादितम्। तथा च आत्मादिप्रमेयाणां विपरीतज्ञानं हि मिथ्याज्ञानं भवति। आत्मादिप्रमेयाणां यथार्थज्ञानञ्च तत्त्वज्ञामिति उक्तं वर्तते (शास्त्री, ई. २००४, पृ.२८२)। परन्तु तत्र एतेषामेव ज्ञानं कथं मुक्तौ हेतुत्वेन स्वीक्रियते इति तत्र नैवोपपादितम्। तथा च डा. रमाशङ्करत्रिपाठीवर्येणाऽपि जन्ममरणरूपदुःखस्य सर्वदा विनाश एव मोक्षशब्देन निगद्यते इत्युक्तमस्ति। तदर्थं श्रवणमनननिदिध्यासनानि साधनानि सहायकानि भवन्तीति प्रतिपादितम् (त्रिपाठी, वि.सं. २०५७, पृ. २१२ )। एवञ्च तत्र प्राध्यापकेन पद्मप्रसादभट्टराईमहोदयेनाऽपि मिथ्याज्ञानस्य नाशः तत्त्वज्ञानेन भवति, तत्त्वज्ञानञ्च मोक्षस्य कृते हेतुर्भवति इत्युक्तम् (भट्टराई, वि.सं. २०७४, पृ. ५१)। तेन तत्वज्ञानेन दोषादिनां नाशो भवतीति तत्र दिङ्मात्रं निर्देशितं वर्तते। एते च मुक्तौ प्रमेयतत्त्वज्ञानहेतुत्वविषये मुख्यतया समुपलब्धाः धारणाः। एतासु कुत्रापि प्रमेयतत्त्वानां व्यख्यानम्, तेषां तत्र मुक्तये हेतुत्वकथनादिकञ्च मया नोपलब्धम्। एवञ्च अस्य शोधालेखस्य शीर्षकसम्बन्धस्य सोधानुसन्धानादिकं न कैरपि कृतं दृश्यते, अधुना यावत् मया न दृष्टमपि। तथा च मया न कुत्रापि मोक्षस्य कृते आत्मादिप्रमेयाणां ज्ञानं हेतुर्भवतीति विवेचनं सम्प्राप्तम्। प्रमेयतत्वज्ञानं न कैरपि सरलगिरा कुत्रापि प्रकटीकृतं च। आत्मादिप्रमेयाणां तत्त्वज्ञानं मोक्षोपयोगिरूपेण याथार्थ्यं प्रतिपादनाय शोधालेखनस्यारम्भः साम्प्रतं विधीयते।

**समस्याकथनम्**

'मुण्डे मुण्डे मतिर्भिन्ना' इति वचनेन सर्वैरपि अनुसन्धानकर्तृभिः स्वरूच्यनुरोधेन क्लीष्टमार्गानुसृत्य विषयाः भिन्नशैलीषु विवेचिताः दृश्यन्ते। तेन सहजबोध्याः विषयाः क्लेशकरा अभूवन्। एवं न्यायदर्शनसापेक्षेण मुक्तौ प्रमेयतत्त्वज्ञानहेतु इत्यस्मिन् विषयेऽपि काचन समस्याः समुपस्थिताः सन्ति। तथैव मोक्षहेतुत्वेन सर्वजनोपादेयेषु अत्यावश्यकीभूतेषु आत्मादिप्रमेयेषु चापि अतीव काठिन्यता समागता। अथ च सर्वेषामपि न्ययदर्शनाध्ययनजिज्ञासूनां कृते विषयाश्चेते क्लिष्टकरा अभुवन्। इयञ्चावस्था मुख्यसमस्यारूपेणात्र परिदृष्टा। समस्तन्यायदर्नस्यैव एका समस्यात्र दृश्यते, यतो हि – प्रमेयत्वेन सर्वेऽपि पदार्थाः परिगणिताः। परन्तु ते सर्वेऽपि मोक्षोपयोगित्वेन नैव गृह्यन्ते। आत्मादिद्वादशप्रमेयाणि एव मोक्षोपयोगिनः सन्ति। परन्तु आत्मादिपदार्थाः एव मोक्षोपयोगित्वेन गृह्यन्ते इति स्पष्टं व्युत्पादनं न कैरपि आधुनिकैः विवेचकैः कृतम्। तथा च प्रमेयाणां स्पष्टं निरूपणमपि न कैरपि कृतम् दृश्यते। इयमप्यन्यात्र समस्या मुख्यरूपेण दृश्यमाना वर्तते।

उपर्युक्तां समस्यां संगृह्य तासां द्वैविध्येन वर्गीकरणं चाधः कृतो वर्तते–

१. न्यायदर्शने के प्रमेयाः ?

२. मुक्तौ प्रमेयतत्त्वज्ञानहेतुः कथं भवतीति ?

**उद्देश्यम्**

न्यायशास्त्रे प्रतिपादितानां प्रमेयाणां मोक्षहेतुत्वेन प्रतिपादनम्. तथा च तेषां सुबोध्यविधया सरलभाषया सर्वग्राह्यत्वधीया विवेचनञ्चात्र मुख्योद्देश्यमस्ति। तथा च प्रमेयत्वेन सर्वेऽपि पदार्थाः संगृह्यन्ते चेदपि मोक्षोपयोगित्वेन च इमानि आत्मादीनि द्वादशप्रमेयाणि एव गृह्यन्ते इति प्रतिपादनमपि अत्रोद्देश्यत्वेन गृहीतो

वर्तते। एवमेव आत्मादिप्रमेयाणां क्रमशः प्रतिपादनं कृत्वा तेषां याथार्थस्वरूपप्रदर्शनमपि अस्यालेखस्य उद्देश्यत्वेन परिग्रहणं क्रियते। तथा च उद्देश्यं चाधः निर्दिश्यते –

१. न्यायदर्शने प्रतिपादितानां प्रमेयाणां निरूपणम्।

२. मुक्तौ प्रमेयतत्त्वानां ज्ञानहेतुत्वनिरूपणम्।

**अनुसन्धानविधिः**

अस्यानुसन्धानालेखस्य कृते दर्शनविषयाध्ययनसहयोगित्वेन उपलब्धा विविधविषयाः स्वीक्रियन्ते। अतोऽनुसन्धानालेखस्य निष्कर्षरूपेण फलप्राप्त्यर्थं पुस्तकलय्याद्यनुसन्धानविधिरवलम्वितो वर्तते। आलेखस्य कृते उपयोगीभूता विधयश्चाधो निर्दिष्टाः सन्ति।

**सामग्रीसङ्कलनविधिः**

अस्य शोधालेखस्य कृते विविधसामग्रीणां सङ्कलनाय पुस्तकालयीयाध्ययनविधिरेव प्रामुख्यं वर्तते। तत्र च प्राच्यदर्शनसम्बद्धविविधग्रन्थाः, प्रमेयविषयकाः संस्कृतमूलाकारग्रन्थाः, प्राथमिकसामग्रीत्वेन स्वीकि्रता वर्तन्ते। तदतिरिक्तं नैकविधपूर्वीयदर्शनानुसन्धातृभिः प्रमेयविषयकग्रन्थानां कृतशोधग्रन्थानामपि अवलोकनं विधाय च ततः आवश्यकप्रमेयसम्बद्धाविषयाः द्वितीयसमग्रीत्वेन ग्रहीष्यन्ते।

**अध्ययनविश्लेषणविधिः**

अस्मिन् शोधालेखे विश्लेषणात्मकविधेः प्रयोगः कृतो वर्तते। तथा च आवश्यकमागमनात्मकविधेर्निःगमनात्मकविधेश्च प्रयोगं विधाय व्याख्यात्मको विश्लेषणात्मको विधिश्चाङ्गीकृतो वर्तते। एवञ्च आधुनिधकवैज्ञानिकानुसन्धानविधिञ्चावलम्ब्य विविधसमस्यायाः परिहारो विहितो वर्तते। तदर्थं विद्वज्जनसम्पर्कः, तैस्सह परामर्शश्च आवश्यकस्थले क्रितो वर्तते।

**शैद्धान्तिकाधारः**

सन्ति न्यायसूत्रभाष्यादिषु प्रमेयविषये जातानि बहुनि चिन्तनानि। किन्तु महर्षिगौतमप्रणीते न्यायसूत्रे, वात्यास्यायनविरचिते भाष्यग्रन्थे, उद्योतकरप्रणीते न्यायवार्तिके तथा च अन्यैश्च न्यायमञ्जर्यादिष्वपि प्रमेयमधिकृत्य विस्तरतो ग्रन्थाः प्रणीताः। तेषु ग्रन्थेषु वर्णिताः प्रमेयविषयाः तत्त्वबोधाय आवश्यकीभूताः। प्रमेयादीनां यथार्थज्ञानाय प्रमाणस्यावश्यकतां विलोक्य प्रथमं दर्शनेऽस्मिन् प्रमाणानि निरूपितानि। न्यायदर्शनसम्बन्धा विषयाः अतीव गभीराः परिश्रमसाध्याश्च। तेषां सूक्ष्माध्ययनं विना यथार्थरूपेण वर्णयितुं न पारयामः। इदानीं विषयानुरोधेन न्यायोक्ताः मोक्षस्य कृते प्रयोजनभूताः द्वादशविधाः प्रमेयाः चिन्तनविषयत्वेन स्वीक्रियन्ते। मोक्षोपयोगित्वेन तेषां सर्वैरपि नैयायिकैः प्रतिपादितं दृश्यते। उक्तान् विषयान् न्यायवैशेषिकप्रतिपादित-सिद्धान्तानुसारेण शोधालेखनं कृतं वर्तते।

**विषयविश्लेषणम्**

कणादप्रणिते वैशेषिकदर्शने पदार्थाः सप्त स्वीक्रियन्ते। तत्र च तेषां प्रयोजनं तत्त्वस्य ज्ञानोत्पादनाय एव वर्तत इत्यत्रापि न केषामपि विप्रतिपत्तिः। न्यायवैशेषिकं समानतन्त्रमित्युक्तत्वात् वैशेषिके सप्त, न्याये च षोडशः पदार्थाः प्रतिपाद्यन्ते। वैशेषिकमतानुसारेण तेषु पदार्थेषु प्रथमं द्रव्यमस्ति। द्रव्यस्यापि नव विभागाः

कृताः। नवसु द्रव्येषु अष्टम द्रव्यत्वेन आत्मपदार्थो निरूपितो वर्तते ( वै.सू.१।१।५ )। एवं च दर्शनग्रन्थस्य प्रारम्भे स्थूलद्रव्याणि निरूपितानि। तानि पञ्चमहाभूतानीति नाम्नापि व्यपदिश्यन्ते। तदनन्तरं विभुत्वेन वर्तमानाः सजातीयाः आकाशकालदिशो निरूप्यन्ते। तदनन्तरं सूत्रकारैः ज्ञानाश्रयत्वेन आत्मपदार्थो निरूप्यते। ज्ञानाश्रयत्वेन आत्मनो विलक्षणत्वात् अन्येभ्य आत्मा पृथङ्निरूपितो दृश्यते। तत्पश्चात् अणुस्वरूपस्य मनसो निरूपणं वर्तते। आत्मा अष्टमद्रव्यतया क्रमतो निरूपितो वर्तते इति अत्र प्रदर्शितम्। वैशेषिकदर्शने आत्मनिरूपणं तृतीयाध्याये समुपपादितमस्ति (वै.सू.३।२।१) ग्रन्थस्याध्यायोऽयं विस्तरेण प्रतिपादितश्चास्ति। अत्र विशेषत आत्मतत्त्वविचारस्य प्रधानस्थानं वर्तते। अध्यायेऽस्मिन् अतीव गहनतया आत्मतत्त्वस्य साधकानि लिङ्गानि प्रदर्शितानि दृश्यन्ते (वै.सू.३।२।४)। वैशेषिकमते आत्मा चरमं प्रमेयं वर्तते। तथैव न्यायदर्शनेऽपि प्रमाणादिषोडशः पदार्थाः निरूपिताः सन्ति। तत्र प्रमाणानि निरूप्य प्रमेयाणि निरूप्यन्ते। ते एव मोक्षस्य कृते हेतवो भवन्तीति अग्रे प्रतिपादिता सन्ति। प्रथमं कानि प्रमेयाणि ? इति जिज्ञासायाः समाधानं विधाय तेषां क्रमेण विवेचनं कर्तव्यमेव भवति। तदधिकृत्य अधुना प्रमेयपदार्थो निरूप्यते।

**न्यायदर्शने प्रतिपादितानां प्रमेयाणां निरूपणम्**

न्यायदर्शनेऽपि आदौ प्रमाणादिषोडशपदार्थाः निरूपिताः सन्तीत्युक्तमेव। प्रमाणानि चत्वारि न्याये स्वीकृतानि। तेषां विवेचनञ्च दर्शनस्यास्य वैशिष्ट्यमस्ति। तथा च न्यायदर्शने प्रथमं प्रमाणं निरूप्य पश्चाच्च प्रमेयपदार्थः निरूपितः। तानि च द्वादशसङ्ख्यकानि। तेषु चादिमं प्रमेयं आत्मा वर्तते (न्या.सू. १.१.९)। अत्र न्यायदर्शने प्रतिपादितानां प्रमेयाणां सूक्ष्मरूपेण विवेचनां विधाय मोक्षाप्तौ तज्ज्ञानस्य हेतुत्वविषये चर्चा विधीयते।

**प्रमेयम्**

प्रमेयविचारारम्भे किं नाम प्रमेयम् ? इति जिज्ञासा प्रथमं उदेति। अस्मिन् विषये भासर्वज्ञेनोक्तं यथा - 'यत् विषयकं ज्ञानमन्यज्ञानानुपयोगित्वेनैव निःश्रेयसाङ्गं भवति, मिथ्याज्ञानञ्च संसारं प्रतनोति, तत्प्रमेयब म्' ( न्यायभूषणम्, ई.२००४, पृ .४३६) अर्थात् यद्विषयकं ज्ञानमन्यविषयकज्ञानोत्पत्तौ अहेतुर्भूत्वा साक्षात् निःश्रेयसाङ्गं भवति तदेव प्रमेयम्। तथा च यथार्थज्ञानस्य विषयकाणि प्रमेयाणि इत्यर्थावबोधो जायते। यथार्थज्ञानस्य विषयाः घटपटादिपदार्थाः भवन्ति। ते च प्रमेयत्वेन व्यवहर्तुं शक्यन्ते एव। प्रमेयकथनात् प्रमायाः विषयत्वेन सर्वमपि पदार्थं स्वीकुर्मः। प्रमेयस्य न्यायदर्शने विस्तृतं चिन्तनमभूत्। प्रमेयविषयकनिरूद पणं तेषां स्वरूपप्रदर्शनञ्च नवीननैयायिकापेक्षया प्राचीननैयायिकैः सुष्ठु कृतं विद्यते। परन्तु मोक्षोपयोगित्वेन च न्याये द्वादशविधानि आत्मादिप्रमेयाणि आचार्यैः प्रोक्तम्। तेषामेवाधुना चाधः क्रमशः प्रतिपाद्यते।

**आत्मा**

द्वादशविधप्रमेयेषु आदौ आत्मनो ग्रहणेन ज्ञायते प्रमेयेषु आत्मनो स्थानं महत्त्वपूर्णमस्तीति। तत्प्राधान्यं ज्ञापनाय हि तस्य ग्रहणं प्रारम्भे एव विहितमिति। प्रकर्षेण मेयः इत्यर्थलाभेनापि आत्मनो निरूपणं सर्वदा प्राधान्यं भवतीति ज्ञायते। प्रमेयेषु आत्मनः प्राधान्यं मोक्षहेतुत्त्वेन परिगृहीतमिति। अस्य लक्षणञ्च ज्ञानस्याधिकरणमिति। ज्ञानाश्रयता तत्रात्मनि भवतीति। अस्य भेदो द्विविधो वर्तते। जीवात्मा परमात्मा

चेति। आत्मा सकलेन्द्रियाधिष्ठातापि अस्ति। न्यायसिद्धान्तमुक्तावलीकारेण- 'आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्' इति आत्मनिरूपणावसरे प्रोक्तम् (विश्वनाथ, कारिकावली, का. ४७)। तर्कभाषाकारेण च आत्मनो लक्षणम् - 'आत्मत्वसामान्यवान् आत्मा' इति विहितम् (तर्कभाषा, ई.२००३ पृ.१५०)। आत्मा च मानसप्रत्यक्षविषयः, तथापि शब्दानुमानप्रमाणाभ्यामपि आत्मा साध्यते। महर्षिणा गौतमेन सूत्रे उक्तम् - 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्' इति। एतल्लक्षणे प्रयुक्तानि ज्ञानेच्छाद्वेषप्रयत्नानि केवलमात्मनि भवन्ति, तथा च सुखदुःखद्वेषाश्च संसारबद्धजीवात्मनि भवन्तीति वृत्तिकारैः विश्वनाथैः समुपदिष्टम्। एतादृश आत्मा विभुः नित्यश्चास्ति। जीवात्मा प्रतिशरीरं तिष्ठति। तेन तस्य अनन्ता भेदाः स्वीकर्तव्याः। एवञ्च परमात्मनो भेदो नास्ति। स एक एवेति।

**शरीरम्**

सूत्रकारैः शरीरस्य लक्षणम् - चेष्टेन्द्रियार्थाश्रयः शरीरमिति प्रोक्तम् (न्या. सू १/१/११)। चेष्टायाः इन्द्रिक्षयाणाम् अर्थानाञ्चाश्रयः शरीरम्। शरीरमाध्यमेन आत्मा सुखदुःखयोश्चोपभोगं करोति। इष्टप्राप्तये अनिष्टनिवृत्तये च या प्रवृत्तिरस्ति सा एव चेष्टा वर्तते। चेष्टाया आश्रयः शरीरमस्ति। अन्त्यावयवी शरीरमित्यपि शरीरस्य लक्षणमस्ति।

**इन्द्रियम्**

इन्द्रियाणि ज्ञानकरणानि भवन्ति। इन्द्रियाणि च भूतेभ्यो जायन्ते (न्यायसूत्रम्- १/१/१२) आत्मा बाह्यरूपादिविषयाणां ग्रहणाय इन्द्रियमपेक्षते। भोगसाधनत्वेन परिगृहीतानि बाह्येन्द्रियाणि पञ्चविधानि। बाह्यभिन्नमान्तरिकं मनः इन्द्रियमपि आहत्य ज्ञानेन्द्रियाणि षड्विधानि सन्ति। पृथिव्यादिभ्य एकैकशः भूतेभ्यः एतानि बाह्येन्द्रियाणि समुद्भूतानि वर्तन्ते। यथा च पृथ्वीतः घ्राणेन्द्रियम्, जलाच्च रसनेन्द्रियम्, तेजसः चक्षुरिन्द्रयम्, वायुतः त्वगिन्द्रियम्, श्रोत्रेन्द्रियरूपात् आकाशात् शब्दः समुद्भुतोऽस्ति। तथा च मनस अन्तरेन्द्रियत्वं दर्शनेऽस्मिन् स्वीकृतो वर्तते। मनसा च सुखदुःखादयऽनुभूयन्ते।

**अर्थाः**

अर्थाः पदार्थाः षड्विधा भवन्ति। ते च द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः (तर्कभाषा, पृ.१३०)। तत्र द्रव्यपदार्थस्य निरूपणं समवायिकारणत्वेन निरूपितं वर्तते। तथा च नव विधानि द्रव्याणि भवन्ति। एवं च सामान्यवत्वेन असमायिकारणत्वेन च गुणाः निरूपिताः सन्ति। चतुर्विंशतिसंख्यका गुणाः भवन्ति। पञ्च विधानि कर्माणि सन्ति। सामान्यस्य च द्विविधो भेदो भवति। नित्यद्रव्यवृत्तयो विशेषा अनन्ताः। नित्यसम्बन्धः समवायोऽस्ति, स च एक एव। अभावविषये तु उक्तमस्ति यत् - निषेधमुखप्रमाणगम्यत्वं भवति। स च अभावस्वरूपः (तर्कभाषा, पृ.१८४)।

**बुद्धिः**

उपलब्धिः प्रत्ययः ज्ञानञ्चेति शब्दैर्यत् अभिधीयते तदेव बुद्धितत्वमस्ति। तत्र तर्कभाषाकारेण अर्थप्रकाशशब्देन बुद्धेः निरूपणं कृतम् (तर्कभाषा, ई. २००३, पृ. १७१)। वस्तुतः प्रत्ययः, उपलब्धिः ज्ञानमित्यादयः शब्दाः बुद्धेरेव पर्यायाः। एतेषु भेदो दर्शनेऽस्मिन् न स्वीक्रियते यथा सांख्यादिमते भेदो वर्तते। बुद्धि आत्मनो विशेषगुणत्वेन च परिगृहीतो वर्तते। स्मृतिरनुभवाभ्यां द्विविधो भेदो बुद्धेः प्रतिपादितं विद्यते।

**मनः**

सुखादिगुणानां ग्रहणाय बाह्यचक्षुरादीन्द्रियैः असम्भवात् तदतिरिक्तमन्यत् करणं स्वीकरणीयं भवति। तदेव करणं मनोऽस्ति। तथा च एकस्मिन् काले अनेकज्ञानासम्भवात् पृथगन्यदपि सहायकं कारणं मन्तव्यमेव। सुखादीनां साक्षात्कारे मनः करणं भवतीति। कारिकावलीकारेणापि समुपदिष्टं वर्तते (कारिकावली, ८५)। तथा युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति न्यायसूत्रकारस्य वचनमस्ति। एतावता च मनस इन्द्रियत्वं सिद्ध्यति। ज्ञायते अनेन इति व्युत्पत्या मनसः ज्ञानसाधनत्वमपि सिद्ध्यति। तथा च मनस अणुत्वात् एकस्मिन् काले अनेकज्ञानस्यानुपत्तिरपि सिद्ध्यति।

**प्रवृत्तिः**

वाक्बुद्धिशरीरेभ्यः कार्यारम्भः प्रवृत्तिरस्ति। न्यायसूत्रे 'प्रवृत्तिवाग्बुद्धिशरीरारम्भः' इति उक्तमस्ति (न्या. सू. १/१/१७)। भाष्यकारेणात्र सूत्रस्थबुद्धिशब्देन मनसो ग्रहणं कृतम्। बुद्ध्यते अनया इति बुद्धिः। व्युत्पत्या च मनसः एव ग्रहणं भवति। मनसा, वचसा, कायेन च कृतो व्यापारः प्रवृतिरस्ति। प्रवृत्तिः इत्यनेन पुण्यपापयोर्ग्रहणं भवति। तयोरेव अदृष्टशब्देन ग्रहणं भवति। दशविधश्च धर्माधर्मौ भवत इति भाष्ये प्रतिपाद्यते (न्यायभाष्यम्, वि.सं. २०४७, पृ.५४ )

**दोषः**

प्रवृत्तिहेतुरेव दोषशब्देनोच्यते। 'प्रवर्तनालक्षणा दोषाः' (न्या.सू.१/१/१८)। प्रवर्तने कारणीभूता गुणाः रागादायः। ते चात्र दोष-शब्देन निगद्यते। भाष्यकारैः प्रतिपाद्यते यत् - इमे रागदयो गुणाः पुरुषं पुण्यकर्मणा सह वा पापकर्मणा सह सदैव प्रेरयन्ति। यत्र मिथ्याज्ञानं जायते तत्र कारणत्वेन रागदोषौ गृह्येते। एतेऽपि आत्मनो गुणा इति। एते च वैराग्योत्पादनाय कारणानि भवन्तीति तत्र व्याख्याग्रन्थेषु प्रतिपादितमस्ति। वस्तुतो तत्वज्ञानानन्तरं मिथ्याज्ञानं विनश्यति। मिथ्याज्ञानविनाशानन्तरं रागादयः दोषाऽपि विनश्यन्ति। एवं यद्यपि दोषाः अनादयः तथापि एते विनाशशालीनः (न्या.भा.४/१/०२)।

**प्रेत्याभावः**

पुनरुत्पत्तिः प्रेत्यभावः। पुनर्जन्म प्रेत्यभावोऽस्तीति ज्ञायते। पुनर्भावस्तु आत्मनो भवतीति। शरीरञ्च भौतिकम्। तस्य विनाशशालित्वं सर्वैरनुभूयते। आत्मनोऽविनाशित्वं दर्शनेस्मिन् स्वीकृतं वर्तते। तथा च अत्र पुनर्भावशब्देन आत्मनो शरीरादिना सह वर्तमानस्य सम्बन्धस्य परिवर्तनमस्ति। न्यायदर्शनसम्बन्धिदार्शनिरकैः इन्द्रियादिना युक्तस्य नवीनशरीरस्य प्राप्तिः पुनर्जन्म भवतीति प्रतिपादितो वर्तते (शास्त्री, पृ.२७३)।

**फलम्**

भाष्यकारैः सुखदुःखसम्वेदनं फलमिति प्रोक्तम्। तच्च रागादिदोषप्रवृत्तिजनितोऽर्थरूपमस्ति (वात्स्यारयन, पृ.२६) तादृशं फलं हेयोपादेयभेदेन द्विविधमस्ति। साधनरतानां जनानां तु द्विविधमपि फलं हेयकोटाम्वेव निवशतीति। यतो हि साधनरतस्य पुरुषस्य सुखदुःखोपभोगे सर्वथा वैराग्यमनुभूयते।

**दुःखम्**

'बाधनालक्षणं दुःखमिति' सूत्रकारेण प्रोक्तम्। बाधना च पीडातापादयः वर्तन्ते। सा च पीडा सर्वस्मिन्

वस्तुनि अनुषक्तं वर्तते इति साधकैः तस्यानुभवः कृतो वर्तते। इदं जगत् तादृशं पश्यन् साधकः तत्परिहर्तुं प्रयतते।

**अपवर्गः**

अपवर्गस्य कृते भाष्यकारेण विमुक्तिशब्दः प्रयुक्तो वर्तते (न्यायभाष्यम्, वि.सं. २०४७, पृ. ५९) । तथा च कस्माद् विमुक्तिः इति जिज्ञासायां सूत्रकारेणैव जिज्ञासायाः समाधानं प्रोक्तम्। तच्च सूत्रम् 'तदत्यन्तविमोक्षोऽपवर्गः' इति। भाष्यकारेण जन्मना दुःखेन च अत्यन्तविमुक्तिः अपवर्ग इत्युक्तम्। न्यायनये एतावदेव अपवर्गस्वरूपं स्वीकृतं दृश्यते। तत्र तर्कभाषाकारेण अपवर्गस्यार्थः मोक्ष इति विहितोऽस्ति। तथा च तत्र एकविंशतिप्रभेदस्य दुःखस्य चात्यान्तिकी निवृतिः मोक्ष इत्युक्तम्। दुःखस्य एकविंशतिभेदाः - शरीरम्, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखं दुःखञ्चेति। एतादृशैः पदार्थैः सह सम्बन्धरहितः पुरुषो मोक्षानुभवं करोति। तदा नित्यसुखाद्यनुभवो भवतीति वादः भाष्ये निरस्तीकृतं विद्यते। न्यायदर्शने जड इव अपवर्गस्य स्वरूपं प्रतिपादितो वर्तते। तदा सुखाद्यनुभवस्य निषेधः कृतो वर्तते। अस्मिन् विषये न्यायग्रन्थे बहुविस्तरेणोपपादितम्। परन्तु भासर्वज्ञेन भाष्यकाराद् पृथग्गेव सुखाभिव्यक्तिर्भवतीति वादः स्वीयग्रन्थे प्रोक्तो वर्तते। एवमेतत् द्वादशविधं प्रमेयं न्यायदर्शने प्रतिपादितमस्ति।

**मुक्तौ प्रमेयतत्त्वज्ञानहेतुत्वप्रतिपादनम्**

न्याये वैशेषिके च अपवर्गप्राप्तिः प्रमुख उद्देश्यो वर्तते। अपवर्गप्राप्तिः प्रमेयपदार्थतत्त्वज्ञानात् भवति। परन्तु चात्र प्रमेयत्वेन सर्वेऽपि विषयाः स्वीकर्तुं शक्नुमः। तथा स्वीकृतत्वे मुक्त्यर्थं तेषां सर्वेषामपि पदार्थानां ज्ञानं कारणत्वेनावश्यकं भवतीति मन्तव्यम्। परन्तु सर्वेषामपि पदार्थज्ञानं मोक्षोपयोगित्वेन मोक्षकारणत्वेन वा सर्वैरपि स्वीकर्तव्यमिति न कुत्रापि प्रतिपादितं दृश्यते। अतः मोक्षोपयोगित्वेन तेषामेव पदार्थानां ज्ञानमावश्यकम् येषां ज्ञानेन तत्त्वज्ञानं भवतीति। तथा च न्यायदर्शने आत्मादिद्वादशपदार्थाः पृथङ्निरूपिताः सन्ति। ते प्रमेयत्वेन पाठिता इति। किमर्थं पृथक्निरूपिताः इति चेत् तेषां ज्ञानं मोक्षस्य कृते प्रयोजनमस्तीति ज्ञापनाय एव पृथङ्निरूपितं दृश्यते। अतः आत्मादिप्रमेयस्य ज्ञानमेव मोक्षहेतुः इति मन्तव्यं भवतीति। भाष्यकारैश्चोक्तं यत् – तत्त्वज्ञानं निःश्रेयसाधिगमार्थं यथाविधं वेदितव्यमिति। ( वात्स्यायन,पृ. ९) आत्मादयो मोक्षहेतुत्त्वेन प्रमेयाः गण्यन्ते। एवञ्च द्रव्यादयो ज्ञानविषयत्वेन मेयाः इति। आत्मादयो तावत् मोक्षविषयत्वेन प्रमेया इत्यर्थो गृहीतव्य इति दृश्यते। सकलद्रव्यज्ञानं मोक्षहेतुः भवितुं न शक्नोति। न्यायपरिशुद्धिकारैश्च एतद्विषये स्पष्टोक्तं वर्तते यत् – यदज्ञानात् संसारः यज्ज्ञानात् निवृत्तिः तत्प्रमेयमिति (न्यायपरिशुद्धिः पृ.९)। तेन च ज्ञातव्यमेव हि यत् भाष्यकारोक्तं आत्मादिज्ञानमेव मोक्षहेतुत्त्वमिति मन्तव्यम्। उद्योतकरेण न्यायवार्तिकेऽपि उक्तमस्ति यत् आत्मादि- एव प्रमेयम्. मुमुक्षुणा ज्ञेयमिति (सन् १९९५, पृ. १८१) श्रीमता जयन्तट्टेनापि प्रतिपादितं यत् सर्वेऽपि वैशेषिकोक्ताः पदार्थाः न प्रमेयाः। अपितु न्यायदर्शने प्रतिपादिताः आत्मादिपदार्था एव प्रमेया इति। जयन्तस्याभिप्रायो वर्तते यत् प्रमायाः विषयीभूतमेव प्रमेयमिति। तथा च 'प्रमीयते इदमिति' व्युत्पत्तिलाभेन सन्दर्शितः पदार्थः न प्रमेयमिति। मोक्षोत्पत्तौ हेतुभूताः विषयाः एव प्रमेयत्त्वेन निर्दिष्टा इति दृश्यते। अनेन च प्रमेत्वेन आत्मादयो गृह्यन्ते चेद् तर्हि न्यायशास्त्रे अतीव महत्त्वेन गौरवादरेण च किमर्थं प्रमाणानि समुपदिष्टानि। तेषां कुत्र नियोग

इति जिज्ञासायां समाधीयते यत् -प्रमाणादीनां ज्ञानं विना न तत्त्वज्ञानम्। तथा च परम्परया प्रमाणादीनामपि मोक्षप्रयोजनमस्ति। प्रमाणादिज्ञानं परम्परया मोक्षस्य कृते उपयोगी भवतीति तु मन्तव्यमेव। प्रमाणादीनि विज्ञाय एव आत्मज्ञानं सम्पाद्यते ततो मोक्षं प्राप्स्यते। मोक्षस्य कृते साक्षाद्धेतुः आत्मादिज्ञानं भवति। आत्मादितो व्यतिरिक्तानां पदार्थानां परम्परया मोक्षाय प्रयोजकं मन्तव्यम्। नव्यन्यायप्रवर्तकानामित्येवा भिप्रायः तत्र दृश्यते। यथा - प्रेक्षावत्प्रवृत्यर्थं प्रमाणादीनां तत्त्वज्ञानात् निःश्रेसाधिगमः इत्यादौ असूत्रयत् इति (न्यायतत्त्वचिन्तामणिः)। जिज्ञासूनां आत्मज्ञानेच्छुकानां सर्वेषामपि न साक्षात् प्रमेयाणां आत्मादीनां बोधो भवति। भवति चेदपि अतीव क्लेशेन भवति। तच्च न्यायसम्बद्धकतिपयग्रन्थप्रतिपादनेन ज्ञायते। अनेन विमर्शणेन मोक्षहेतुत्वेन आत्मादिप्रमेयाणां तत्त्वज्ञानं परमावश्यकमस्तीति ज्ञायते।

**निष्कर्षः**

अस्माकं भूमौ न्यायररूपा दर्शनशास्त्रीया महती गण्डकीधारा अनादितकालाद् नितरां मुक्तिमार्गं सञ्चालयन्ती प्रदर्शयन्ती च प्रवहति वर्तते एव। अस्या द्वादशविधविभक्ता धारा मुक्त्यर्थमेव सकलप्राणिनं तत्र च जीवात्मानं विशेषत उपदिशति। विशेषतो न्यायवैशेषिकयोः आत्मादिद्वादशप्रमेयमुपरि निर्दिष्टमेव। तेषां तत्त्वज्ञानेन निःश्रेयसप्राप्तिर्भवतीति शास्त्रकाराणां दिङ्निर्देशनमपि विषयप्रतिपादनकाले प्रदर्शितमेव। तत्त्वज्ञानस्यार्थः वस्तूनां यथार्थज्ञानमस्ति। न्यायमते प्रमेयरूपेण तत्त्वज्ञानोपयोगित्त्वेन च प्रमेयादिः द्वादशपदार्थाः न्यायसूत्रकारैरेव न्यायसूत्रे प्रतिपादिताः। ते आत्मादयः प्रमेयत्वेन परिगृहीताः। तत्त्वज्ञानविषयीभूताश्च ते। यथार्थज्ञानेनैव मिथ्याज्ञानं विनश्यतीति। प्रमाणबलेन आत्मादिप्रमेयाणां बोधो भवतीति। प्रमाणादिपदार्थापि प्रमेयसाधनत्वेन निश्रेयस्प्राप्तये पारम्पर्येण हेतुस्थाने निबद्धा भवन्तीत्यपि उपरि सुष्ठूपपादितमेव। प्रमेयाणां याथार्थ्यज्ञानानन्तरं दुःखानि विनश्यन्ति। तानि च दुःखानि एकविंशतिसंख्यकानि न्यायदर्शने उक्तानि सन्ति। दुःखात्यन्ताभाव एव अत्र मोक्षशब्देन व्यपदिष्टो भवतीति। नवीननैयायिकैरपि अपवर्गार्थं आत्मादितत्त्वानां यथार्थज्ञानं कारणत्त्वेन स्वीक्रियते। आचार्यभासर्वज्ञैः प्रोक्तं यत् 'मिथ्याज्ञानं संसारं प्रतनोतीति। तत्तु सत्यमेव अनात्मनि आत्माज्ञानम्, सुखरहिते वस्तुनि सुखादिज्ञानं मिथ्याज्ञानमेव। तेन जीवात्मानं संसारपथमेव प्रचालयति। अनादिकालादेव जीवात्मा इममेव चक्रं समारुह्य भवचक्रे निबद्धो वर्तते। तस्य कारणं तु अज्ञानमेवाऽस्ति। अज्ञानवशादेव जीव संसरादुःखपङ्कनिमग्नो दृश्यते। स्वयं दुःखात् बहिरागन्तुमशक्तश्च जीवो दृश्यते। दुःखाद् बहिर्निष्काशनाय भ्रमः एव बाधकत्त्वेन हेतुः भवति। सः एव भ्रमो वस्तुत आत्मा भ्रमोऽस्ति। आत्मा कः ? शरीरं किम् ? इत्यादिज्ञानं जीवात्मा यदा प्रमाणादिनां साहाय्येन करोति तदा मिथ्याज्ञानं विनश्यतीति ग्रन्थेषु प्रष्टोक्तमुपलभ्यते। इदमपि च तादृशमिथ्याज्ञाननाशाय आत्मादिप्रमेयाणां वास्तविकं ज्ञानमावश्यकमिति नितरां बोध्यो भवीति। तदेव तत्वज्ञानमस्ति। तेन च मोक्षप्राप्तिर्भवति। मोक्षश्च दुःखात्यन्तनिवृत्तिरस्ति। तदर्थं प्रमेयत्वेन परिगृहीतानामात्मादीनां तत्वज्ञानमावश्यकमिति। अयमेव विषयः अत्र शोधालेखने विशेषाध्ययनेन स्पष्टीभवतीति। एतावता च वस्तुतो गौतमीयस्य न्यायशास्त्रस्य तत्त्वज्ञानमेव मुख्योद्देश्यमस्तीति। तत्त्वज्ञानाय एव पदार्थाः उपदिष्टाः। न्यायस्य समानतन्त्रत्वेनोपदिष्टे वैशेषिकेऽपि आदौ स्थूलपदार्थं विचार्य क्रमशः सूक्ष्मपदार्थनिरूपणं कृतं दृश्यते। तथा च न्यायेऽपि विषयेऽस्मिन् नैव विप्रतिपत्तिः। न्यायवैशेषिकतन्त्रयोः समानतन्त्रत्त्वेन

उभयोरपि दर्शनयोः मोक्षहेतुत्वेऽपि साम्यमवलोक्यत एव। तेन च मुक्तिविषयेऽप्यनयोः नास्ति वैमत्यम्। निःश्रेयसहेतुत्वेऽपि समाना एव धारणा। प्रमेयत्वने परिगणिताः विषयाः वैशेषिकेऽपि तथैव स्वीकृताः सन्ति यथा न्याये स्वीकृता वर्तन्ते। अन्त्ये निष्कर्षत्वेन इदमेव वक्तव्यं भवति यद्- न्यायवैशेषिकयोः निःश्रेयसे आत्मादिप्रमेयज्ञानं सुतरामावश्यकमेव। न केवलं न्यायशास्त्रे एव मोक्षस्य कृते तेषां तत्त्वज्ञानमावश्यकमपितु सकलपौरस्त्यदर्शनस्य कृतेऽपि तदावश्यकमिति निष्कर्षत्वेन मन्तव्यमेव हि।

**सन्दर्भग्रन्थसूचीः**

अन्नम्भट्टः( त्रितीयआवृत्ति) *तर्कसंग्रहः* (तृतीय आवृति), श्रीकृष्णवल्लभाचार्यः, वाराणसी : व्यास प्रकाशन।

केशवः ( ई. २००३) *तर्कभाषा* ( पण्डित रुद्रधर झा), वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।

गौतमः (ई. १९८५) *न्यायदर्शनम्,* (भाष्यवार्तिकतात्पर्यटीकावृत्तिसहितम्), दिल्ली : अमरेन्द्रमोहन तर्कतीर्थ, तारानाथ न्यायतर्कतीर्थ, मुन्सीराम मनोहारलाल पब्लिसर।

मुसलगाँवकर, गजाननशास्त्री (पु. सं.,२००३), *न्यायसिद्धान्तमुक्तावली,* वाराणसी : चौखम्बा सुरभारती प्रकाशन।

योगीन्द्रानन्दः, स्वामी ( ई. २००४), *न्यायभूषणम्,* (पुनर्मुद्रित संस्करण) चौखम्बा विद्याभवन।

विद्याभूषण, श्रीआशुबोध, विद्यारत्न, श्रीनित्यबोध (ई.१९८६), *न्यायदर्शनम,* वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।

शास्त्री, दयाशङ्करः (ई. २००४), *उद्योतकर का न्यायवार्तिक एक अध्ययन,* वाराणसी : चौखम्बा विद्या भवन।

शास्त्री,आचार्य ढुण्डिराज (पुनर्मुद्रित २०६८), *वैशेषिकदर्शन प्रशस्तपादभाष्य,* वाराणसी : चौखम्बा संस्कृतसंस्थान।

शास्त्री,आचार्य ढुण्डिराज ( वि.सं. २०४७), *न्यायदर्शनम्,* वाराणसी : चौखम्बा संस्कृतसंस्थान।

# अनुसन्धानात्मक लेखसम्बन्धी नीति :

पण्डित श्रीलोकनाथ लुइटेल स्मृति-प्रतिष्ठान/**लोकदर्पण** जर्नलका लागि निम्नलिखित प्रकाशन नीतिभित्र रही अनुसन्धानमूलक लेख पठाउनुहुन लेखकहरूलाई अनुरोध छ -

१. लेख ३००० देखि ५००० शब्दसम्मको हुनुपर्ने छ।
२. लेख नेपाली, संस्कृत र अङ्ग्रेजी भाषामा प्रकाशन गरिने छ।
३. नेपाली र संस्कृत भाषाको लेख युनिकोड- kokila फन्टको १६ आकारमा र अङ्ग्रेजी भाषाको लेख Times New Roman फन्टको १२ आकारमा A-४ आकारको पृष्ठमा चारैतिर एक इञ्च खाली छाडी MS Word File मा शुद्ध भाषामा टाइप गरी पठाउनुपर्ने छ।
४. हस्तलिखित लेखलाई स्वीकार गरिने छैन।
५. लेख पहिले कुनै जर्नल वा पत्रिकामा प्रकाशन नभएको हुनुपर्ने छ।
६. लेख तोकिएको मितिमा इमेल ठेगानामा पठाउनुपर्ने छ। म्याद नाघी आएको लेख स्वीकार्य हुने छैन।
७. लेख American Psychological Association (APA) सातौँ संस्करणको लेखनढाँचाअनुसार हुनुपर्ने छ।
८. प्रत्येक अनुच्छेदको पहिलो पङ्क्ति टाइपनियमअनुसार Indented (केही भित्रबाट सुरु गरिएको) हुनुपर्ने छ।
९. लेख समसामयिकता एवम् मौलिकतामा केन्द्रित हुनुपर्ने छ। मौलिकताका विषयमा लेखक स्वयम् जिम्मेबार हुनुपर्ने छ। यस सम्बन्धमा प्रकाशक र सम्पादक जवाफदेही हुने छैनन्।
१०. लेखमा लेखसार, विषय परिचय, सैद्धान्तिक पर्याधार, अनुसन्धानविधि, सामग्री सङ्कलनको नतिजा, विश्लेषण, निष्कर्ष तथा सन्दर्भसामग्री सूची प्रस्ट रूपमा समावेश गरिएको हुनुपर्ने छ।
११. पूर्वीय वाङ्मयअन्तर्गका वेद, वेदाङ्ग, वेदान्त, धर्म, संस्कृति, कला, साहित्य, धर्मशास्त्र, राजनीतिशास्त्र, अर्थशास्त्र, आयुर्वेद, योग, प्राकृतिक चिकित्सा, समाजशास्त्र, पाश्चात्त्य दर्शन, आधुनिक चिकित्सा विज्ञान एवम् जुनसुकै क्षेत्रको र समसामयिक राजनीति, अर्थनीति, सामाजिक गतिविधिहरूका बारेमा गरिएका अनुसन्धानमूलक लेखहरूलाई स्वीकार गरिने छ तर लेख कुन विषय र विधाको हो भन्ने कुरा स्पष्ट पारिएको हुनुपर्ने छ।

**शीर्षक**

- सङ्क्षिप्त, स्पष्ट, सूचनामूलक र प्राज्ञिक जिज्ञासायुक्त हुनुपर्ने छ।
- बढीमा दश शब्दसम्मको हुनुपर्ने छ।
- मुखपृष्ठको सिरानको बिचमा २६ प्वाइन्टमा राखिएको हुनुपर्ने छ।

**लेखसार**

- बढीमा १५० शब्दसम्मको हुनुपर्ने छ।
- अति सङ्क्षिप्तमा परिचय, उद्देश्य, अध्ययन विधि, विश्लेषणको आधार (सैद्धान्तिक पर्याधार) र निष्कर्ष उल्लेख हुनुपर्ने छ।

- लेखसारमा कुनै सन्दर्भ (citation) प्रयोग नगरिएको हुनुपर्ने छ।

**शब्दकुञ्जी -** बढीमा पाँचओटा पारिभाषिक शब्द वा शब्दावलीको सूची शब्दकुञ्जीमा उल्लेख हुनुपर्ने छ।

**मूल लेख**

**विषय परिचय :** सङ्क्षिप्त विषय परिचय, समस्या पहिचान, उद्देश्य, औचित्य तथा स्पष्ट रूपमा अनुसन्धान अन्तराल (Research Gap)/पूर्वकार्य समीक्षासहितको परिचय ६०० देखि ९०० शब्दसम्मको हुनुपर्छ।

**अनुसन्धान विधि :** अनुसन्धान विधि, अध्ययन क्षेत्र, सामग्री सङ्कलन, परीक्षण, प्रयोग, तालिकीकरण, विश्लेषणको ढाँचा यस खण्डमा हुनु जरुरी छ। यो खण्ड करिब ३०० देखि ५०० शब्दसम्मको हुनुपर्ने छ।

**सैद्धान्तिक पर्याधार :** कुन सिद्धान्तलाई आधार मानेर सङ्कलित सामग्रीको विश्लेषण गरिने हो भन्ने आधार निर्माण हुनु जरुरी छ। यो खण्ड ५०० देखि ८०० शब्दसम्मको हुनुपर्ने छ।

**पूर्वकार्य समीक्षा :** यसलाई सङ्क्षिप्त ढङ्गले साररूपमा विषय परिचयभित्र नै समेट्नुपर्ने छ।

**विश्लेषण :** यस खण्डमा सङ्कलित सामग्रीलाई विभिन्न कोणबाट विश्लेषण गरी उद्देश्यप्राप्तिमा पुग्नुपर्छ। यो खण्ड १३०० देखि २३०० शब्दसम्मको हुनुपर्ने छ।

**निष्कर्ष :** यस खण्डमा प्राप्तिको मूल कुरा समावेश गरिएको हुनुपर्छ। यो खण्ड २५० देखि ३५० शब्दसम्मको हुनुपर्ने छ।

**सन्दर्भसामग्री सूची :**

- APA सातौँ संस्करणको पद्धतिमा राखिएको सन्दर्भलाई अकारादि वर्णानुक्रममा सूचीकरण गरी लेखको अन्तमा राखिएको हुनुपर्ने छ।
- जर्नल, लेख, पुस्तक, शोधग्रन्थ आदि आफूले पाठमा प्रयोग गरेका सामग्रीलाई APA पद्धतिमा नै उल्लेख गरिएको हुनुपर्ने छ।
- पाठमा सन्दर्भाङ्कन गरिएका सामग्रीलाई मात्र सन्दर्भसामग्री सूचीमा राखिएको हुनुपर्ने छ।

**प्रकाशन प्रक्रिया :**

- लेखप्राप्ति,
- सम्पादकमण्डलबाट प्रारम्भिक परीक्षण,
- सुधारका लागि लेखकलाई फिर्ता,
- सुधारसहित सम्पादकमण्डललाई लेखप्राप्तिपछि समीक्षाका निम्ति विज्ञकहाँ पठाइने,
- विज्ञको सुझावअनुसार लेख सुधार तथा परिमार्जनका निम्ति पुनः लेखकलाई पठाइने,
- परिमार्जन गरी आएका लेखलाई परीक्षण गरेर एकरूपता कायम गरी स्वीकृत लेखलाई प्रकाशन गर्ने।
- मापदण्डभित्र नपरेका लेखहरू छापिने छैनन् र फिर्ता पनि गरिने छैन।

**लेखको सुरुमा मुखपृष्ठ (cover page) बनाई त्यसमा शीर्षक, लेखकको नाम, पद, कार्यरत संस्था, सम्पर्क ठेगाना (इमेल) राखिएको हुनुपर्ने छ। लेखमा लेखकको परिचय खुल्ने अन्य कुनै पनि कुरा नराखिएको हुनुपर्ने छ।**

**लेख पठाउने इमेल ठेगाना - psllsp97@gmail.com**